नातिदूरे न चासन्ने मृगयूथनिपीडिता ॥ १३
मयूरनादिता रम्याः प्रांशवो बहुकन्दराः ।
दृश्यन्ते गिरयः सौम्य फुल्लैस्तरुभिरावृताः ॥ १४

G. 3. 21. 13
B. 3. 15. 14
L. 3. 20. 14

5, Ñ2 V B D5.7 subst. and read after 4[ab] ( V2 alone reads l. 3 after 4 ) :

263* संनिकृष्टं च यत्र स्यात्समिदेधःफलोदकम् ।
वनं रम्यं च सौमित्रे स्थलीरम्यं च यद्भवेत् ।
संनिकृष्टं च यत्र स्यादिध्मपुष्पफलागमः ।

[ B3 reads in marg. l. 1 after l. 3. —(l. 1) D5 संनिकृष्टश्च. V1 B3 ( marg. also as above ) इध्मपुष्प-; V2 इध्ममेध:- ( for समिदेधः- ). —(l. 2 ) V D5 स्थलं ( for स्थली- ). B3 -धन्यं ( for -रम्यं ). —(l. 3 ) V B2-4 D7 संनिकृष्टश्च; D6 संनिकृष्टस्य. Ñ2 V B D5.7 इध्म( B4 दिव्य )पुष्पफलागमः ( for the post. half ). ]

6 [a]) Ñ1 स ( for तु ). —[b]) Ś1 सहिता°; Ñ V B D1-3.5.7 M2 संहता°; T3 संयुता° ( for संयताञ्जलिः ). —[c]) B1 ससीतं तत्र काकुत्स्थम्.

7 D4 om. ( hapl. ) 7-9. —[a]) Ś1 V2 B D1-3 धर्मज्ञ ( for काकुत्स्थ ). —[b]) D3 वर्षायुतं ( for °शतं ). —D1 om. 7[c]-8.—[c]) M3 रुचिते ( for रुचिरे ). —For 7[cd], Ś1 Ñ V B D2.3.5.7 subst. :

264* स्वयमेव रुचिर्देशे क्रियतां यत्र रोचते ।

[ Ñ2 D5.7 शुचौ ( for रुचिर् ). Ś1 देशो. D5 यदि ( for यत्र ). ]

8 D1.4 om. 8 ( cf. v.l. 7 ). —[a]) Ñ2 V1 B2.3( after corr. as in text ).4 D5.7 स प्रीतस्. —[b]) G1 M3 महात्मनः ( for °द्युतिः ). —[c]) Ñ2 V B D5.7 विमृश्य ( for विमृशन् ). —[d]) B2 -गुणाधिकं ( for °न्वितम् ). —After 8, V2 B3 (m.) ins. :

265* तं च देशं समाक्रम्य देशभागं विशारदः ।
देवतानां यथाभागं विभज्य स्थानमात्मवान् ।
ततः सौमित्रिसहितः सीतया च स राघवः ।
गोदावरीं पुरस्कृत्य निवेशमकरो पुनः ।

9 D4 om. 9 ( cf. v.l. 7 ). —[a]) Ñ2 V B D5.7 स तं रुचिरपानीयं. —[b]) T1 -कर्मणे ( for °णि ). —[c]) Dg1 T2.3 Cg हस्तौ; Dm1 M1 हस्तं; Cr.k.t as in text ( for हस्ते ). Ś1 Ñ V B D1-3.5.7 प्रगृह्य हस्तं हस्तेन. —[d]) Ñ2 V B लक्ष्मणम्; D5.7 वचनम् ( for सौमित्रिम् ).

10 [a]) Ñ2 V1 B D5.7 शुभः; V2 शुचिः ( for समः ). —[b]) B3 युतः ( for वृतः ). —[c]) Ñ2 Dt1 D1.6 T3 रम्यं ( for सौम्य ). —After 10, G2 reads 13.

11 [b]) D3 पुष्पैः ( for पद्मैः ). M2 तु शुभ- ( for सुरभि- ). —[c]) Ś1 अदूरं. Ñ2 D5.7 शोभते ( for दृश्यते ). V1 M2 पुण्या ( for रम्या ). —[d]) Ś1 Ñ1 D1-3 पद्मिनी हंससेविता; Ñ2 V B D5.7 पुण्या( V1 रम्या ) गोदावरी नदी( B1 सरित् ); Dm1 D8 T G1.2 M1.3 Cv.m पद्मिनी पद्मसेविता.

12 Ñ2 B D5.7 om. 12. —[a]) D1 यथाख्याता त्वगस्त्येन. —V om. 12[cd]. —[c]) D1 पुण्या ( for रम्या ). —[d]) Ś1 D1-3 नदी पक्षिग( D1 °गु )णान्विता; Ñ1 पुण्या नदिगणान्विता.

13 G2 reads 13 after 10. —[b]) Ñ2 -संहिता; V1 B2-4 ( marg. also as in text ) D1 -कूजिता; Dm1 D8 -सेविता; ( for -शोभिता ). —Ñ1 om. ( hapl. ? ) 13[cd]. —[c]) M1 transp. न and च. Ś1 D1-3 च सौमित्रे ( for न चासन्ने ). Ñ2 V B D5.7 न च( V1 B2.3 वि ) दूरे न चाभ्यासे( D7 °शे ); Cg cites नातिदूरेण चासन्ने. —[d]) B1 मृगयूथैर् ( for °यूथ- ). Ś1 D1.3 -[ उ ]पशोभिता; Ñ2 B D5.7 -विलोडिता; V1 -विलोलितां; Dg1 M1.3 -[ अ ]वपीडिता; D2 -[ उ ]पसेविता; D4.8 Cm -निपीडिताः; G2 -[ अ ]भिपीडिता; M2 -[ अ ]भिलोलिते.

14 D2 om. 14-16[b]. —[ab]) Ś1 Ñ1 D1.3 मयूरनादिता रम्या दृश्यते बहुकंदरा; Ñ2 V B D5.7 M2 मयूराभिरुतो रम्यः ( M2 °ते रम्ये ) प्रांशुः( B1.2 D5 M2 °शु ) कंदरवान्गिरिः. —[c]) Ñ1 illeg. for न्ते गिरयः. Ś1 Ñ1 D1.3 चेमे; Dt1 D6 सौम्याः ( for सौम्य ). Ñ2 V B D5.7 M2 नानालताभि( V1 B2 °प्र )तानाढ्यः. —[d]) Ñ1 illeg.; T3 व्यक्तैस् ( for फुल्लैस् ). Ñ1 D3 बहुभिर् ( for तरुभिर् ). M2 आवृतः. Ś1 शोभिता बकुलैः कुलैः; Ñ2 V B D5.7 M3 पुष्पितैस्तरुभिर्वृतः( M3 °ताः ). —After 14, Ñ2 V2 B D5.7 read 16[ab].

G. 3. 21. 14
B. 3. 15. 15
L. 3. 20. 17

सौवर्णै राजतैस्ताम्रैर्देशे देशे च धातुभिः ।
गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः ॥ १५
सालैस्तालैस्तमालैश्च खर्जूरैः पनसाम्रकैः ।
नीवारैस्तिमिशैश्चैव पुंनागैश्चोपशोभिताः ॥ १६
चूतैरशोकैस्तिलकैश्चम्पकैः केतकैरपि ।
पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः ॥ १७
चन्दनैः स्यन्दनैर्नीपैः पनसैर्लकुचैरपि ।
धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः ॥ १८
इदं पुण्यमिदं मेध्यमिदं बहुमृगद्विजम् ।
इह वत्स्याम सौमित्रे सार्धमेतेन पक्षिणा ॥ १९
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ।
अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ २०

**15** D2 om. 15 ( cf. v.l. 14 ). Ś1 reads 15 after 18. V1 repeats( var.) $15^{ab}$ after $16^{ab}$. —$^{a}$) Ś1 Ñ1 V1 ( first time ) D1.3 राजतैरायसैस्ताम्रैर् ; Ñ2 V( V1 second time ) B D5.7 राजतैर्धातुभिश्चित्रैर्. —$^{b}$) B3 reads first देशे in marg. Ñ2 D5.7 विलक्षित:; V1( second time ) च गवांकित: ( hypm. ); V2 B3.4 गवाक्षित:; B1 शैरैर्वृत:; B2 गवान्वित:; D6 तथा शुभै:; G( ed.) च लक्षित: ( for च धातुभि: ). Ś1 D3 आका( L[ ed. ] °क )रैश्चैव धातुभि:. —Ñ2 V2 B D5.7 om. $15^{cd}$. —$^{cd}$) Ś1 नलाश्चला; D1 नगा फुल्ला; D3 नगाश्चला ( for गवाक्षिता ). G1 M2 नगा: ( for गजा: ). Ñ1 D3 -दर्पिता:; Dg1 -पंक्तिभि:; Dm1 D4.8 T1.2 M1 -पत्तिभि:; G Cr -पक्तिभि:; M2 -वर्पिभि:; M3 -वर्ष्मभि:; Cv*p*.k as in text; Cm -भित्तिभि: ( for -भक्तिभि: ). Ś1 D1 गजै: परमदर्पितै: ( for $^{d}$ ). V1 नगश्चल इवाभाति गज: परमदर्पित:. —After 15, Dm1 ins. रामाय नम:.

**16** Ś1 D2 om. $16^{ab}$ ( for D2, cf. v.l. 14 ). Ñ2 V2 B D5.7 read $16^{ab}$ after 14. —$^{a}$) Ñ V1 B1-3 Dg1 D3.5.7 शालैस्तालैस् ; B4 तालै: शालैस्. —$^{b}$) Dg1 T3 G M1 खर्जूर- ( for °रै: ). Dt1 पनसैर्द्रुमै:; D6 T3 पनसद्रुमै:. Ñ V B D1.3.5.7 खर्जूरैश्चोप( Ñ2 V1 D5.7 °रूप; B4 °रति )शोभित: ( Ñ1 D1.3 °ता: ). —After $16^{ab}$, V1 repeats $15^{ab}$ ( var. ). —D3 transp. $16^{cd}$ and $18^{cd}$. —$^{c}$) V1 वानीरैस् ( for नीवा° ). D8 in marg.; G1 तिमिभिश् ( for तिमिशैश् ). Ś1 वानीरैश्चैव जंबीरै:; Ñ1 V2 B D1-3 वानीरैश्च तिमी( Ñ1 D1 निची )रैश्च; Ñ2 D5.7 वानीरैश्च तमालैश्च; M2 नीवारैश्चापि तिमिशै:; G( ed.) वानीरैस्तिनिशैश्चैव. —$^{d}$) G1 M1 [ ए ]व; M2 [ अ ]पि ( for [ उ ]प- ). Ñ1 D2( before corr. as in text ).3 -शोभिता. Ñ2 V B4 ( m. also ) D5.7 पनसै( B4 orig. °ह्लवै )र्वकुलैर्धवै:( V1 °स्तथा; V2 illeg. for धवै: ); B1-3 G( ed. ) पलाशै( B1 पनसै )र्वंजुलै( G[ ed. ] °रर्जुनै )र्धवै:.

**17** $^{ab}$) Ś1 Ñ1 D1-3 च तथा ( for तिलकैश् ). D4 कैतकैर् ; G1 'तिंदुकैर् ( for केतकैर् ). Dg1 Dt1 T3 केतकैरपि चंपकै:; D6 कनकैरपि पंच( meta. )कै: ( for $^{b}$ ). Ñ2 V B D5.7 चंपकै: कर्णिकारैश्च तथाशोकैर्विभूषित:( B4 marg. also °शोभित: ). —$^{c}$) Ś1 Ñ V B D1-3.5.7 वृक्ष( Ś1 Ñ1 D1-3 फुल्लैर् )गुल्म( Ñ1 बहु )सहस्रैश्च. —$^{d}$) Dt1 om. ( hapl. ? ) स्तैस्तै. Ś1 Ñ1 D1-3 बहुभिर् ( for तरुभिर् ). D3 आचिता: ( for आवृता: ). Ñ2 V B D5.7 तिलकैस्तिंदुकैरपि ( B1 °स्तथा ). —After 17, Ñ2 V B D5.7 ins. :

266* दृश्यतामेष सौमित्रे नानामृगगणायुत: ।
राजता धातवो यत्र काञ्चनाश्च महागिरौ ।
आयसाश्चैव ताम्राश्च विभ्राजन्ते समन्तत: ।
अभ्यास एव शैलस्य विशाला भूमय: समा: ।
यासु तालास्तमालाश्च खर्जूराश्च सहस्रश: । [5]
वानीराश्च तिमीराश्च पुंनागाश्च नगोत्तमा: ।
देशोऽयं फलपुष्पाढ्य: प्रकृष्ट इति मे मति: ।

[ ( l. 1 ) V1 -लतान्वित:; B1 -गणैर्वृत:; B4 -गणान्वित: ( for -गणायुत: ). —( l. 4 ) D5 अभ्याशम् ( for अभ्यास ). Ñ2 D5.7 विमला ( for विशाला ). —( l. 5 ) B4 जंबूताल- ( for यासु तालास् ). D7 om. ( hapl. ) तमाला. —( l. 6 ) B4( m. also) पनसाश्च ( for पुंनागाश्च ). —( l. 7 ) Ñ2 B4( marg. as above ) D5.7 -मूलाढ्य: ( for -पुष्पाढ्य: ). Ñ2 प्रहृष्ट ( for प्रकृष्ट ).]

**18** $^{a}$) Cv स्पंदनैर् ( for स्यन्दनैर् ). Dg1 Dt1 Dm1 D6.8 T3 M1 स्यंदनैश्चंदनैर् ( by transp. ). Ś1 V2 B2 शालै:; Ñ1 चैव; V1 तालै:; L( ed. ) सालैस् ( for नीपै: ). Ñ2 D5.7 चंपकैश्चंदनैस्तालै:; D1.2 G1 चंदनै: स्पंदनै: शालैस् ( G1 नीपै: ); D3 चंदनैस्तालवृक्षैश्च; G2.3 M2.3 स्पंदनैश्चंदनैर्नीपै:. —$^{b}$) K( ed. ) Cg.k पर्णासैर् ; Cv*p*.r पर्णसैर् ( for पनसैर् ). D4 T3 G2.3 M1 Cv*p*.g.k लिकुचैर् ; T1 M3 बकुलैर् ; G1 निचुकैर् ( for लकुचैर् ). Ś1 Ñ1 D1-3 तमालैर्बकु( D3 °हु )लैरपि; Ñ2 V B( B3 [ m. also ] ) Dg1 D5.7 M2 पियालै( Dg1 पर्णकै; D5 प्रियालै; M2 पुष्पितै )र्बकुलै( B3 orig. °दरै )रपि. —D3 transp. $16^{cd}$ and $18^{cd}$. —$^{c}$) V1 धराश्व-; M3( after corr. *sec. m.* as in text ) धवाश्वि- ( for धवाश्व- ). V1 D1 ( after corr. as in text ) -कर्म-; Dg1 -पर्ण-; M2 -कर्णै:; M3 -कर्णि- ( for -कर्ण- ). —$^{d}$) D8 -पाटकै: ( for °लै: ). —After 18, Ś1 reads 15; while T2 ins. :

267* अमी शैलाश्च दृश्यन्ते समन्ताच्चित्रकानना: ।

**19** $^{a}$) Ñ2 V B D5.7 मेध्यम् ( for पुण्यम् ). Ś1 Ñ V B Dt1 D2.3.5-7 रम्यम् ; Cg as in text ( for मेध्यम् ). D1 इदं पुण्यतमं दिव्यं. —$^{b}$) Dg1 ( m. ); D1 नाना- ( for इदं ). B2 वन्य-; M3 पुण्य- ( for बहु- ). Ñ2 V B D5.7 -मृगं वनं; G( ed. )-गुणं वनं ( for -मृगद्विजम् ). —$^{c}$) Ś1 Ñ1 Dg1 Dm1 D1-3 T3 G3 इह वत्स्यामि; Ñ2 V B1.2.4 D5.7 वत्स्या( V1 °सा )मोत्रैव; B3 वत्स्यामश्चात्र ( for इह वत्स्याम ). —$^{d}$) Ś1 Ñ V B D1-3.5.7 सहानेन( B1 °येन; D2 सह तेन ) पतत्रिणा.

**20** $^{c}$) D3 नचिरेण ( for अचि° ). Ś1 भर्तुश् ( for

पर्णशालां सुविपुलां तत्र संघातमृत्तिकाम् ।
सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् ॥ २१
स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा ।
स्नात्वा पद्मानि चादाय सफलः पुनरागतः ॥ २२
ततः पुष्पबलिं कृत्वा शान्तिं च स यथाविधि ।
दर्शयामास रामाय तदाश्रमपदं कृतम् ॥ २३
स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया ।
राघवः पर्णशालायां हर्षमाहारयत्परम् ॥ २४
सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा ।
अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥ २५
प्रीतोऽस्मि ते महत्कर्म त्वया कृतमिदं प्रभो ।
प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २६
भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ।
त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम ॥ २७

G. 3. 21. 29
B. 3. 15. 29
L. 3. 20. 27

---

भ्रातुश् ). —$^{d}$ ) Ś1 स महाबलः; Ñ2 V B D5.7 सुमनोहरं ( for सुमहाबलः ).

21 $^{b}$ ) G1 [ अ ]संघात-; Cm.g संखात- ( for संघात- ). M2 समसंस्थानमृत्तिकां. —$^{c}$ ) Dg1 G2 अस्तंभां ( for सु° ). —$^{d}$ ) Dg1 Dm1 सुशोभितां ( for °भनाम् ). Cv cites this st. as in text. —For 21, Ś1 Ñ V B D1–3.5.7 subst.; while M2 ins. after 22 :

268* पर्णशालां स मतिमांश्चकार विपुलां तदा ।
मनोज्ञां राघवस्यार्थे प्रेक्षणीयां मनोरमाम् ।

[ ( l. 1 ) Ś1 V1 D2 सु-; Ñ V2 D1.3.5.7 च; M2 तु ( for स ). Ś1 D1.2 सु( D1 च )विपुलां; V1 सुम° ( for स मतिमांश् ). V B2.4 विमलां ( for विपुलां ). Ś1 D1–3 चकार स( Ś1 °राशु; D2 °र सु ) नरोत्तमः ( for the post. half ). —( l. 2 ) Ś1 Ñ1 D1–3 उपास्यां ( for मनोज्ञां ). Ś1 Ñ1 D1–3 अनुत्तमां; B4( m. also as above ) °हरां ( for मनोरमाम् ). ]

—After 21, D4 T1.2.3( om. [ hapl. ] up to l. 3 of 270* ) G2 M1 ins. :

269* निवासं राघवस्यार्थे चकार लघुविक्रमः ।

—Thereafter D4 T1.2.3( om. [ hapl. ] up to l. 3 ) M1 cont.; while Dg1 Dt1 Dm1 D6.8 G1.3 M2 ins. after 21 :

270* शमीशाखाभिरास्तीर्य दृढपाशावपाशिताम् ।
कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ।
समीकृततलां रम्यां चकार सुमहाबलः ।
निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमम् ।

[ Dg1 reads l. 1 in marg. —( l. 1 ) M1.2 शम्यैरेव ( M2 चर्मैरेकां ) समास्तीर्य ( for the prior half ). —G1 om. l. 2–3. —( l. 2 ) M1.2 -च्छदैः ( for -शरैः ). —Dg1 reads in marg. from पर्णैः up to तथा. M1 तदा ( for तथा ). T1 सुपरिच्छादितांतरां; M2 श्वापः॰ शोभितां तथा ( for the post. half ). —Dg1 om. l. 3. —( l. 3 ) M1 लघुविक्रमः ( for सुमहाबलः ). M2 समीकृततलोपेतं रमणीयं मनोहरं. —For l. 4, cf. 269*. —( l. 4 ) Dg1 G1.3 चकार लघुविक्रमः; Dm1 D8 चकारातुलविक्रमः; M1 प्रेक्षणीयामनुत्तमां ( sic ); M2 चकार परवीरहा ( for the post. half ). ]

22 $^{a}$ ) Ñ2 V B D5.7 गत्वा तु; T3 सहसा ( for स गत्वा ). —$^{b}$ ) Ś1 Ñ V B2.4 Dg1 D1–3.5.7 G1.3 M1.3 ततः; T2 G2 तथा; T3 गतः ( for तदा ). —$^{c}$ ) Ñ2 V B D5.7 [ उ ]पादाय ( for चादाय ). Ś1 Ñ1 D1–3 स्नात्वा सलिलमादाय( D3 °हृत्य ). —$^{d}$ ) G3 सफलं; M2 जलं च ( for सफलः ). Ś1 Ñ1 D1–3 ततः शीघ्रमुपागमत्; Ñ2 V B D5.7 सु( V2 B स )शीघ्रं( V1 राघवं ) पुनराययौ. —After 22, M2 ins. 268*.

23 $^{a}$ ) D1–3 तत्र ( for ततः ). Ś1 D2 दत्त्वा ( for कृत्वा ). —$^{b}$ ) Dm1 तथाविधि ( for यथा° ). Ś1 Ñ1 D1–3 शांतिकर्म च वीर्यवान्. —For 23$^{ab}$, Ñ2 V B D5.7 subst. :

271* पुष्पोपहारं कृत्वाथ हुत्वाग्निं स विधानतः ।

[ D5 तु ( for [ अ ]थ ). V1 हुत्वाग्निं तु; V2 B1 हुत्वा चाग्निं; B4 हुत्वाग्निं च. ]

—$^{c}$ ) Ś1 Ñ1 D1.2 रामस्य; D3 धर्मस्य ( for रामाय ).

24 $^{a}$ ) M3 तं दृष्ट्वा स ( by transp. ). Ñ2 V B D5.7 स तु दृष्ट्वाश्रमं रम्यम्( B4 m. also दिव्यम् ). —$^{b}$ ) Ñ2 V B1.3.4 D5.7 आगत्य; B2 आगम्य ( for आश्रमं ). Ś1 Ñ1 D1.2.4 T1.2 G2 सीतया सह ( by transp. ). —$^{c}$ ) Ñ2 V2 B2.4( marg. also as in text ) D5.7 G1 पर्णशालां च ( for °शालायां ). —$^{d}$ ) B2 आरोहयत्; D3 अहारभवत् ( sic ); D7 आवाहयत् ( for आहारयत् ). Ś1 Ñ1 D1–3 तदा; D4 T2 भृशं ( for परम् ).

25 $^{a}$ ) Ś1 Ñ V1 B3.4 D3.5.7 G2 M2 संप्रहृष्टः( D3 °ष्टं ); V2 B1.2 D2 G1.3 M1.3 स प्रहृष्टः; D1 संप्रविष्टः ( for सुसंहृष्टः ). —$^{b}$ ) Dg1 G1.2 तथा ( for तदा ). —$^{c}$ ) Ñ2 D5.7 अतिश्लक्ष्णं; B4( marg. also as in text ) अतिहृद्यं; G2 ततः स्निग्धं ( for अतिस्निग्धं ). Ś1 Ñ1 D3 सुमधुरं; Ñ2 V B1.2.4 D5.7 मनोहारि; D1.2 समधुरं ( for च गाढं च ). B3 अतिस्निग्ध-मनोहारि. —$^{d}$ ) Ñ2 D5.7 स्निग्धम्; V B श्लक्ष्णम् ( for चेदम् ). Ś1 Ñ1 D1–3 लक्ष्मणं वाक्यमब्रवीत्.

26 M3 om. 26$^{ab}$. —$^{a}$ ) Ś1 Ñ1 D1–3 सु- ( for ते ). —$^{b}$ ) Dt1 M2 अरिंदम ( for इदं प्रभो ). Ś1 Ñ1 D1-3 कृतं क्षिप्रमिदं( D1 °ह ) त्वया; Ñ2 V B D5.7 त्वया य( D7 स )-त्कृतमीदृशं. —$^{cd}$ ) Ś1 D1 प्रदेशे यन्-; Ñ1 D2 प्रसादो यन्-; D3 प्रीतिदाय- ( for प्रदेयो यन्- ). M1 Cv यन्निमित्तस् ( for °त्तं ). D3 स ( for ते ). Ñ2 V B D5.7 परिष्वंगमिमं( V B1.4 °दं ) तावत्प्रीतिदायं( B2 °नं ) गृहाण मे.

27 $^{a}$ ) Ñ2 V B D5.7 गुणज्ञेन ( for भाव° ). —$^{b}$ ) D7 om. ( hapl. ) धर्मज्ञेन. —$^{cd}$ ) Cmp नाथेन ( for पुत्रेण ). Ś1

G. 3. 21. 30
B. 3. 15. 30
L. 3. 20. 28

एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः।
तस्मिन्देशे बहुफले न्यवसत्स सुखं वशी ॥ २८

कंचित्कालं स धर्मात्मा सीतया लक्ष्मणेन च।
अन्वास्यमानो न्यवसत्स्वर्गलोके यथामरः ॥ २९

इति श्रीरामायणे अरण्यकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

Ñ1 D1-3 नाथवान्( D1 °वत् ) स ( for न संवृत्तः ). Ñ2 V B D5.7 सत्पुत्रेण त्वया तात तारि( B1 पावि )ताः पितरो मम.

28 [a]) B4 च ( for तु ). Ñ2 D5.7 एवमुक्त्वा लक्ष्मणं स. —After 28[a], B4 ins. :

272* रामो धर्मभृतां वरः।
एवं राघव उक्त्वा च.

[ After l. 1, 28[a] and l. 1 are repeated in marg. —l. 2 is in marg. ]

—B4 reads 28[b] in marg. —[b]) B4 लक्ष्मणं ( for राघवो ). Ñ2 B1.2.4 G2 लक्ष्मिवर्धनं; V2 B3 प्रीतिवर्धनं( B3 °नः ) ( for लक्ष्मिवर्धनः ). —[c]) G2 अस्मिन् ( for तस्मिन् ). —[d]) Dg1 Dt1 T2 G1 M1.3 सुसुखं; Dm1 D8 स सुखी; G3 च सुखं ( for स सुखं ). Dt1 D6 T1.3 G1.3 M सुखी; Dm1 D8 सुखं ( for वशी ). Ñ2 V B D5.7 बहुपुष्पोपशोभिते. —For 28, Ś1 Ñ1 D1-3 subst. :

273* एवमुक्त्वा तु सौमित्रिं धर्मात्मा भ्रातृवत्सलः।
बहुमूलफले देशे तस्मिन्सुखमुवास ह।

[ (l. 1) Ś1 उक्तस् ( for उक्त्वा ). —(l. 2) D2 -फलोदेशे; D3 -फले वृक्षे ( for -फले देशे ). Ñ1 D1.3 सः ( for ह ). ]

29 [a]) Dg1 D7 T2 M1.2 किंचित्. D6 च ( for स ). Ś1 Ñ1 D1-3 वैदेह्या सह( Ñ1 D2 च स; D1 च [ subm. ] ) वै पत्न्या; Ñ2 V B1 D5.7 न्यव( D5 स्तोत्र )सत्सहितो वीरः. —[b]) Ś1 Ñ1 स भ्रात्रा; D1-3 सुभ्रात्रा ( for सीतया ). —For 29[ab], B2 subst.; while V2 ins. after 29[ab]; Ñ2 B1 D5.7 subst. for 29[cd]; B3.4 subst. for 29; V1 ins. after 29 :

274* कंचित्कालं स धर्मात्मा स्वर्गे इन्द्र इवापरः।

—Thereafter V2 B2 cont.; while V1 ins. after 29[ab]:

275* तत्र तापसमुख्यानां चरतामाश्रमे तदा।
बभूव महती प्रीतिर्दृष्ट्वा रामं सलक्ष्मणम्।
तस्मिन्देशे द्रुमैर्युक्ते रामलक्ष्मणसेविते।
सम्यक्चरन्ति मुनयः स्वर्गस्था इव निर्भयाः।
नातिशीतो ववौ वायुर्नात्युष्णं तपते रविः। [5]
वसतो राघवस्यात्र दयां चक्रे पुरंदरः।
वैदेह्या च सुपत्न्या वै भ्रात्रा वै लक्ष्मणेन च।

[ (l. 2) V1 परम- ( for महती ). —(l. 3) V श्रमैर् ( for द्रुमैर् ). V1 -पालिते ( for -सेविते ). —(l. 5) V1 नातिशीघ्रं. V1 om. ववौ. —(l. 7) B2 सह ( for च सु- ). ]

—[cd]) B2 आश्वास्यमानो ( for अन्वा° ). D2 अन्वास्य न्यवसद्रामः ( for [c] ). D2 M3 -लोकं; G1 -लोको ( for -लोके ). Ś1 Ñ1 B2 D1-3 यथेश्वरः; V1 यथा सुराः; V2 महेश्वरः ( for यथामरः ). T3 अन्वावसत्पंचवट्यां पूज्यमानो महर्षिभिः. —After 29, B3 ins. :

276* तत्रस्थानां च लोकानामानन्दं च जयं मुहुः।

Colophon. D1.2 om. ( cont. the Sarga ). —*Sarga name* : Ś1 Ñ2 V B D5 पंचवट्याश्रमनिवासः; Ñ1 आश्रमकरणं; D3 पंचवटीनिवासः; D7 रामपंचवट्याश्रमनिवासः. —*Sarga no.* ( figures, words or both ) : Ś1 Ñ1 B1 om.; Ñ2 V2 B3 D7 21; V1 20; B2.4 D5 22; Dg1 Dt1 Dm1 D4.6.8 T G M1 15; D3 24; M2.3 16. —After colophon, G concludes with श्रीरामाय नमः.

## १५

वसतस्तस्य तु सुखं राघवस्य महात्मनः ।
शरद्व्यपाये हेमन्त ऋतुरिष्टः प्रवर्तते ॥ १
स कदाचित्प्रभातायां शर्वर्यां रघुनन्दनः ।
प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २
प्रह्वः कलशहस्तस्तं सीतया सह वीर्यवान् ।
पृष्ठतोऽनुव्रजन्भ्राता सौमित्रिरिदमब्रवीत् ॥ ३
अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद ।
अलंकृत इवाभाति येन संवत्सरः शुभः ॥ ४
नीहारपरुषो लोकः पृथिवी सस्यमालिनी ।
जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ ५
नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ।
कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६
प्राज्यकामा जनपदाः सम्पन्नतरगोरसाः ।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥ ७
सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ।
विहीनतिलकेव स्त्री नोत्तरा दिक्प्रकाशते ॥ ८
प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम् ।
यथार्थनामा सुव्यक्तं हिमवान्हिमवान्गिरिः ॥ ९

G. 3. 22. 9
B. 3. 16. 9
L. 3. 21. 9

### 15

D1.2 continue the previous Sarga. D8 begins with ॐ; M1 with श्रीरामाय नमः.—Before 1, Ś1 V D1–3 ins.:

277* एवं तस्य तदा याताः शरदश्च त्रयोदश ।

[ D1 जाताः ( for याताः ). D1.2 शरदोर्ध- ( for शरदश्च ). V यातो वत्सरोर्ध- ( for याताः शरदश्च ). ]

**1** $^{a}$) V1 तत्र ( for तस्य ). Ñ1 स-; V2 B3 च ( for तु ). D1 वसतोथ सुखं तत्र.—$^{b}$) Ñ2 V B D5.7 तपोवने ( for महात्मनः ).—$^{c}$) D5 शारद्व्यपाये.—$^{d}$) Ś1 दृष्टम्; D1–3 दृढम्; L( ed.) दृष्टिम् ( for ऋतुर् ). Ñ1 [ ऽ ]भवत्तदा; Dt1 D6 G1 प्रवर्तत ( for प्रवर्तते ). Ñ2 V B2–4 D5.7 प्रा( V1 प्र )वर्तत भृशं प्रियः( Ñ2 V1 °यं ); B1 प्रादुर्भूतो भृशं प्रियः.

**2** $^{a}$) Ś1 प्रवृत्तायां ( for प्रभातायां ).—$^{b}$) Ś1 Ñ1 D1–3 रजन्यां ( for शर्वर्यां ).—D3 reads 2$^{c}$–3 in marg.—$^{c}$) G3 अभिषेकाय ( for °र्थं ). Ś1 Ñ V B D1–3.5.7 M1.2 अभिषेकार्थमुत्थाय; M3 स्नानार्थं प्रययौ रम्यां.—$^{d}$) Ś1 Ñ V B D1–3.5.7 M1.2 ययौ; M3 ततो ( for रम्यां ).

**3** D3 reads 3 in marg. (cf. v.l. 2).—$^{a}$) T3 कलशहस्तं. Ś1 Ñ V2 B D5.7 च; V1 Dt1 D1–3.6 M2 तु; Dg1 G1 सन् ( for तं ).—$^{c}$) Ś1 [ ऽ ]नुव्रजद्; B2 [ ऽ ]नुययौ; D2 तु व्रजन् ( for ऽनुव्रजन् ). Dg1 D5.7 G1 भ्रातुः; T1.2 भ्रात्रा ( for भ्राता ).—$^{d}$) G1 सौमित्रिम् ( for सौमित्रिर् ). M2 रामम् ( for इदम् ).

**4** $^{a}$) Dg1 हि ( for स ).—$^{b}$) Ś1 Ñ V B D1–3.7 प्रभो; D5 प्राप्तो ( for प्रियो ). Ś1 Ñ1 D2.3.5 सदा प्रियः; Ñ2 V B D1.7 प्रियः सदा ( for प्रियंवद ).—$^{d}$) Ś1 Ñ1 D1–3 किल; Ñ2 V B D5.7 गुणैः; Dg1 शुचिः ( for शुभः ).

**5** $^{a}$) V2 B3 नीहारः; B1 नीरजः ( for नीहार- ). Ś1 D2 -परमो; M2 -वृष्टिमांल्ल् ( for -परुषो ). Ñ2 V B D5.7 वायुः ( for लोकः ). ❀ Ck : नीहार पौरुष इति नीहारेण पुरुषत्ववानित्यर्थः. ❀—$^{b}$) Ś1 Ñ2 V1 Dg1 Dt1 D2.6.7 सस्यशालिनी ( for °मालिनी ).—$^{c}$) B2 [ अ ]नुपगुप्तानि; D3 [ अ ]नुपभोज्यानि; D7 [ अ ]नुपभोगानि ( for [ अ ]नुपभोग्यानि ).—$^{d}$) Ñ1 B1.3 Dg1 Dt1 सुभोगो; T3 सुभोग्यो ( for सुभगो ). Ś1 सुभोग्यो हि तथानलः.

**6** $^{a}$) Ś1 B1.4 D2.3 नवाग्रा( D2 °ग्र्या )यण-; D1 तथाग्रयण- ( for नवाग्रयण- ).—$^{b}$) Dt1 D4.5.7 T G अभ्यर्चे (sic); D1 अर्घ्यैश्च ( for अभ्यर्च्य ).—$^{c}$) Ś1 Ñ1 D1 कृताग्रा-( Ñ1 D1 °ग्र )यणकालश्च; Ñ2 V B D5.7 कृताग्र( B1.4 °ग्रा )-यणभोक्तारः; D2.3 कृताग्र्या( D3 °ग्र )यणकालाश्च. ❀ Cr : काले आग्रयणकर्मानुष्ठानकाले कृताग्रयणिकाः कृताग्रयणकर्माणः नवान्नप्रदानार्थं यदाग्रयणं तज्जाः पूजाः तथा ताभिः पितृदेवता अभ्यर्च्य सन्तः साधवः विगतकल्मषा भवन्ति. ❀ so also in Ck. It cites नवेति.—$^{d}$) B1.4 (marg. also) सर्वे ( for सन्तो ).

**7** $^{a}$) Ś1 D3 राज्यकामा; Ñ2 B1.3.4 D1.5.7 प्राप्तकामा; M2 °माना ( for प्राज्यकामा ).

☞ V2 illeg. from जनपदाः up to 3.16.13. Ś1 जनपदान् ( for जनपदाः ).—$^{b}$) Ś1 संपन्नरसगोरसान्; D2.5 संपन्नवरगोरसान्( D5 °साः ); G( ed.) संपन्नयवगोरसाः.—$^{c}$) V1 B Dg1 D5.7 G1 विहरंति ( for विचरन्ति ).—$^{d}$) Dg1 यात्रायां; D4 T G M1.3 Cg यात्रास्था ( for °र्थं ). D5 या नद्यः पुर्यश्च संप्रति (hypm.); M2 तत्र तत्र जिगीषवः.

**8** D5 om. 8–9$^{b}$. V1 om. 8$^{ab}$.—$^{a}$) T3 G2 सेव्यमाने ( for सेव° ).—For 8$^{ab}$, Ś1 Ñ B D1–3.7 subst.:

278* अगस्त्यसेवितामाशां सेवमाने दिवाकरे ।

[ Ś1 D1–3 पुण्यां ( for आशां ). B2.3 ( before corr. as above ).4 सेव्यमाने ( for सेव° ). Ś1 Ñ1 D1.3 दिशं रवौ ( for दिवाकरे ). ]

—$^{c}$) M3 गृहीत- ( for विहीन- ).

**9** D5 om. 9$^{ab}$ (cf. v.l. 8). Ś1 om. 9.—$^{ab}$) B D7 हिमकोशा( B4 D7 °षा )ढ्या; Dt1 हेमकोशाढ्यो; D1 हिम-

G. 3. 22. 10
B. 3. 16. 10
L. 3. 21. 9

अत्यन्तसुखसंचारा मध्याह्ने स्पर्शतः सुखाः ।
दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः ॥ १०
मृदुसूर्याः सनीहाराः पटुशीताः समारुताः ।
शून्यारण्या हिमध्वस्ता दिवसा भान्ति साम्प्रतम् ॥ ११
निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः ।
शीता वृद्धतरायामास्त्रियामा यान्ति साम्प्रतम् ॥ १२
रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥ १३
ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते ।
सीतेव चातपश्यामा लक्ष्यते न तु शोभते ॥ १४
प्रकृत्या शीतलस्पर्शो हिमविद्धश्च साम्प्रतम् ।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५
बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च ।
शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः ॥ १६
खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किंचिदालम्बाः शालयः कनकप्रभाः ॥ १७

---

कौशाढ्यौ ( sic ) ( for हिमकोशाढ्यो ). B D7 नद्यः; D1 दूरः; D2.3 दूरे ( for दूर- ). B2 कोपश्; D7 पुर्यश् ( for -सूर्यश् ). Ñ B D1–3.7 संप्रति ( for साम्प्रतम् ). V1 प्रकृत्या हि सरत्काष्ठा मंदः सूर्यश्च संप्रति. —[c] ) Ñ1 यथार्हनामा. Ñ2 V1 B यथार्थ ( V1 °र्ह )कृतनामासौ; D5.7 यथावत्कृतनामासौ. —[d] ) Ñ1 D1–3 हिमेन; Dg1 हि महान् ( for first हिमवान् ). D5.7 G2 हिमवद् ( for second हिमवान् ). Dm1 reads गिरिः in marg.

10 [a] ) Cr.k.t मध्याह्ने ( for अत्यन्त- ). Ś1 Ñ1 D1–3 पूर्वाह्ने दुःखसंचारा; Ñ2 B1 D5.7 अत्यंतदुःखसंचारा; V1 आद्यंते दुःख°; B4 आद्यंतदुःख°; G( ed. ) प्रत्यूषे दुःख°. —[b] ) D8 पश्यतः ( for स्पर्शतः ). Ś1 Ñ2 V1 B D2.5.7 मध्याह्नसमये सुखाः( B3 [ marg. also ]शुभाः ); Ñ1 मध्याह्ने विषयोन्मुखाः; D1.3 मध्याह्नविषये शुभाः( D3 सुखाः ). —[c] ) Ś1 Ñ2 B3.4 D1.2 सुभगाः( B3 [ *sup. lin.* also ] °खदा ) पुण्यास् ; Ñ1 V1 सुभगा रम्यास्( V1 नित्यास् ) ( for सुभगादित्याश् ). —[d] ) G1 -सौभगाः ( for -दुर्भगाः ). Ś1 त्वरितं विनिपातिताः; Ñ B1–3.4 ( marg. also दिव्यास्त्वरितयायिनः ) D1–3.7 त्वरितव्यतिपातिनः; V1 D5 त्वरिता( D5 °तं ) व्यतिपातिनः; G and L( ed. ) त्वरिता( L[ ed. ] °तं ) व्यतियांति नः.

11 [a] ) Ś1 Ñ1 D1.2 मृदुवीर्याः ( for मृदुसूर्याः ). Ś1 च नीहाराः; Ñ Dt1 D4 T3 सुनीहाराः; V1 मनोहाराः ( for सनीहाराः ). —[b] ) M2 पटुसूर्याः ( for °शीताः ). Dt1 D6 M3 समाहिताः; G1 समावृताः ( for °रुताः ). Ś1 Ñ1 D1–3 पटुशीतोष्णमारुताः; Ñ2 V1 B1.2.4 D5.7 कटुशीतानिलान्वि( V1 °ह )ताः; B3 कटुशीता( *sup. lin.* also °ला )निला विभो. —[c] ) Ś1 Ñ1 D1–3 तमोध्वस्ता; B3.4 °ग्रस्ताः ( for हिमध्वस्ता ). —[d] ) Ñ2 V1 B1.3.4 D7 प्रत्यूषा( B1 °षे ); B2 कलुषा; D5 प्रसूया ( for दिवसा ). V1 संप्रति ( for साम्प्रतम् ).

12 G2 om. ( hapl. ) 12. —[a] ) Ñ1 -समयाः ( for -शयनाः ). D2 निवृत्तकामाशयनाः. —[b] ) Ñ2 B2–4 ( marg. also पथातीता ) D5.7 पुष्यहीना; V1 पुष्यव्यूहा; B1 पुष्पातीता; M3 पुष्यनीहा ( for पुष्यनीता ). Dg1 D4 T3 हि मारुताः ( for हिमारुणाः ). Ś1 D1–3 पुष्यनेत्राश्च रात्रयः; Ñ1 प्रवृद्धाश्चिररात्रयः. —[c] ) Ck शील- ( for शीता ). Ś1 शीता ह्यतरायामास् ; Ñ2 B Dt1 Dm1 D4–8 G1 शीतवृद्धतरायामास् ; Cm.g as in text. —[d] ) Ś1 Ñ1 B3.4 D1–3 भांति; Dg1 reads in marg. ( for यान्ति ).

13 [a] ) Ñ1 रविः सौभ्रांतसौभाग्यस् ( sic ); V1 D3.5 G1 रविः सं°; D4 G3 M1 रविसंक्रांतिसौभाग्यस्. —[b] ) D7 तरुणारुण- ( for तुषारारुण- ). —[c] ) Ś1 D2 निः( D2 नि )श्वासवान् ; Ñ2 V1 B2.3 Dg1 Dt1 Dm1 D4–7 M Cr.m.k निश्वासांध; B1 सनिश्वास; D1 निश्वासार्द्र; D3 G2 निःश्वासांत; G( ed. ) सनिःश्वास ( for निःश्वासान्ध ).

14 [ab] ) Cg ज्योत्स्नी ( for ज्योत्स्ना ). G2 शोभते ( for राजते ). Ś1 Ñ V1 B D1–3.5.7 पौ( Ś1 D2 पू )र्णमास्यामपि ( Ś1 D3 °मियं ) ज्योत्स्ना तुषारकलुषीकृता. —[c] ) Ś1 Ñ1 V1 B3.4 D1–3.5.7 तपसा क्षामा; Ñ2 तरसा क्षामा; B1 तपसा क्षीणा; M2 तपसा श्यामा ( for चातपश्यामा ). B2 शीतवातातपः क्षामा. —[d] ) Ś1 Ñ1 V1 B2.3 D1–3.5.7 दृश्यते; B4 लक्षते ( for लक्ष्यते ). Ñ2 Dt1 Dm1 D6.8 च ( for तु ). D1.3 ननु ( for न तु ). B2 शोभने ( for °ते ).

15 [a] ) Ś1 Ñ2 V1 B D1–3.5.7 शीतसंस्पर्शो; Ñ1 शीतसंपन्नो ( for शीतलस्पर्शो ). ❀ Cm : प्रकृत्या स्वभावेनाशीतलस्पर्शः । अशीतेत्युपलक्षणं । अनुष्णेपि द्रष्टव्यं । तथा चानुष्णाशीतलस्पर्श इत्यर्थः. ❀ —[b] ) Ś1 Ñ1 B1 D1–4.8 G2.3 हिमवृद्धश् ; B2 हिमवर्गश् ; T3 हिमध्वस्तश् ( for हिमविद्धश् ). Ñ2 V1 B D5.7 संप्रति ( for साम्प्रतम् ). —[c] ) Ś1 प्रयाति ( for प्रवाति ). Ś1 D6 पश्चिमे ( for °मो ). —[d] ) Ñ1 काल्यं; V1 B D1.5.7 कल्यं; D2 कल्ये ( for काले ).

16 [a] ) Ñ2 B D5.7 हिमच्छन्नानि; V1 हिमक्षुण्णानि ( for बाष्पच्छन्नानि ). —[b] ) G3 यश्च ( for यव- ). —[c] ) D2.3 G2 ह्युदिते ( for ऽभ्युदिते ). —[d] ) Ś1 D2 नदंतः; Ñ1 भवद्भिः; Ñ2 D5.7 चरद्भिः; T2 नतद्भिः ( for नदद्भिः ). Ś1 D2 क्रौंचसारसाः ( for °सारसैः ).

17 [a] ) M2 खर्जूरवृक्षाकृतिभिः. —[b] ) V1 B2.3 शिखरैः ( for शिरोभिः ). Ś1 Ñ B3.4 D5.7 पुष्पगुंठितैः; V1 D3 पुष्टतंडुलैः; B1.2 पुष्पमंडितैः; D1.2 पुष्पगुंफि( D2 °डि )तैः ( for पूर्णतण्डुलैः ). —[c] ) Ś1 आलंभाः; Ñ2 D5.7 आनम्रैः; V1 B G1.2 आलंबैः; D4 T1.2 G3 M1.2 आनम्राः ( for आलम्बाः ). —After 17, Ñ2 V1 B D5.7 ins. :

मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः ।
दूरमभ्युदितः सूर्यः शशाङ्क इव लक्ष्यते ॥ १८
अग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखः ।
संरक्तः किंचिदापाण्डुरातपः शोभते क्षितौ ॥ १९
अवश्यायनिपातेन किंचित्प्रक्लिन्नशाद्वला ।
वनानां शोभते भूमिर्निविष्टतरुणातपा ॥ २०
अवश्यायतमोनद्धा नीहारतमसावृताः ।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥ २१
बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः ।
हिमार्द्रवालुकैस्तीरैः सरितो भान्ति साम्प्रतम् ॥ २२
तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च ।
शैत्यादगाग्रस्थमपि प्रायेण रसवज्जलम् ॥ २३
जराजर्जरितैः पर्णैः शीर्णकेसरकर्णिकैः ।
नालशेषा हिमध्वस्ता न भान्ति कमलाकराः ॥ २४
अस्मिंस्तु पुरुषव्याघ्र काले दुःखसमन्वितः ।
तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ॥ २५
त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान्बहून् ।
तपस्वी नियताहारः शेते शीते महीतले ॥ २६

G. 3. 22. 27
B. 3. 16. 28
L. 3. 21. 25

279* शालिशूकपरित्रासात्किंचिदामीलितेक्षणः ।
वृषः पिबति केदारे निःश्वासाकुलितं जलम् ।

[ (l. 1) B1 -परित्रासः ( for -परित्रासात् ). D5 om. from क्षणः up to 18[d]. Ñ2 आकुंचितेक्षणः ( for आमीलिते° ).—(l. 2) V1 पयः (for जलम् ). Ñ2 B1.4 निश्वासाद्वलितं पयः ( for the post. half ). ]

18 D5 om. 18 (cf. v.l. 17). —[a]) Ś1 Ñ1 D1 G3 मयूरैर् ( for °खैर् ). Ś1 Ñ1 इव सर्पद्भिर् ; Ñ2 D1-3 अवसर्पद्भिर् ; V1 अपसर्पंति; B2.3 अपसर्पद्भिर् ( for उप° ). —[b]) Ñ1 -संवृतः; B2 -संस्कृतैः (for -संवृतैः ). —[c]) Ñ1 चिरम् ; G( ed. ) दूराद् ( for दूरम् ). Ś1 Ñ2 B2-4 Dt1 D1.2.6.7 अप्युदितः ( for अभ्यु° ). —[d]) G( ed. ) चंद्रमा इव दृश्यते.

19 [a]) Ś1 Ñ1 D1-3 आ( D1-3 अ )ग्राह्यरूपः; Ñ2 T1 G M Ct आग्राह्य°; V1 अप्राज्यवीर्यः; T2 °वीर्यं ( for अग्राह्यवीर्यः ). V1 पूर्वांगे (for °ह्णे ). —[b]) B4 marg.; D7 om. (for मध्याह्ने ). Ñ2 D5.7 स्पर्शवीर्यवान् ; D4 G2 °तः सुखं (for स्पर्शतः सुखः ). —[c]) V1 Dt1 Dm1 D6.8 T3 M3 संसक्तः; D2 marg.; Cv सरक्तः ( for संरक्तः ). —[d]) Ś1 न सूर्यः ( for आतपः ). Ñ2 V1 B D5.7 अपराह्णे तथातपः( B3 °परः ).

20 [c]) Ñ1 यदा न; M2 अधिकं ( for वनानां ). Ś1 Ñ1 V1 B D1-3.5.7 दृश्यते (for शोभते ). —[d]) B2 प्रविष्ट- ( for निविष्ट- ). Ś1 -तरुणा यथा; Ñ1 -तरुणा*दा (illeg.) ( for -तरुणातपा ). —After 20, Dg1 Dt1 Dm1 D4.6.8 S ins. :

280* स्पृशंस्तु विमलं शीतमुदकं द्विरदः सुखम् ।
अत्यन्ततृषितो वन्यः प्रतिसंहरते करम् ।
एते हि समुपासीना विहगा जलचारिणः ।
नावगाहन्ति सलिलमप्रगल्भा इवाहवम् ।

[ (l. 1) Dm1 D8 G3 संस्पृशन् ; M1 स्पर्शंस्तु; M3 स्पृशंति ( for स्पृशंस्तु ). Dt1 D6 स्पृशन्सुविपुलं. T3 पीतम् ( for शीतम् ). G1 सिंधुरः; M3 महिषाः ( for द्विरदः ). —(l. 2) Dg1 Dm1 D8 G M2.3 अत्यर्थं( M3 °र्थ- ); Cvp अत्यस्त- ( for अत्यन्त- ). G3 वन्यं; M3 नागः ( for वन्यः ). —(l. 3) M3 Cm विहंगा ( for विहगा ). —(l. 4) Dm1 D8 G M विगाहंति ( for [ अ ]वगाहन्ति ). ]

21 [a]) Ś1 Ñ1 D1-3 -तमोध्वस्ता; Ñ2 V1 B D5.7 -परिक्लिन्ना ( for -तमोनद्धा ). —[b]) V1 नीहारेण समावृताः. —[c]) Ś1 V1 B4 D2 दृश्यंते ( for लक्ष्यन्ते ). —[d]) Ś1 D2 प्रफुल्लाः; Ñ2 V1 B D5.7 समंताद्; G2 विपुला ( for विपुष्पा ).

22 [a]) B2.3 बाष्पसंपन्न- ( for °संछन्न- ). —[b]) Ś1 तेनाविज्ञेयसारसाः; V1 B2-4 रुताभिज्ञेयसारसाः. —[c]) D1.6 हिमाद्रि- (for हिमार्द्र-). Ś1 Ñ1 D1-3 -मारुतैस् ; Ñ2 Dt1 D6 G1 -वालुकास् ( for -वालुकैस् ). —[d]) Dg1 यांति ( for भान्ति ).

23 [a]) Ś1 Ñ1 तुषारपवनत्वाच्च; B3 तुषारपातनाच्चैव; D1.2 तुषारपरुषत्वाच्च. —[c]) Ñ2 V1 B D5 G2 अपात्रस्थम् ; Cm अगाधस्थम् ; Cmp as in text ( for अगाग्रस्थम् ). Ś1 D3 शैत्यादसह्यमपि च; Ñ1 D2 शैत्यादगोत्रमपि च; D1 शैत्या च गोत्रत्वमपि (sic). —[d]) B2 प्राशेन च सरिज्जलं.

24 [a]) Dt1 Dm1 D6.8 T G3 जराज्ञ( D6 [ marg.] T1 G3 Cv.g.t °ज )र्झरितैः. Ñ2 V1 B Dt1 D5-7 पत्रैः; Dm1 D4.8 T1.2 G2.3 M1 Cvp.g पद्मैः; Cmp as in text ( for पर्णैः ). ⁂ Cr : जरया कालकृतया जर्झरितानि पर्णानि येषां ते ।; Ck : जरया कालक्षितया जर्जरितानि पर्णानि येषां ते तथा. ⁂ Ś1 Ñ1 D1.2 तुषाराभिहतैः पद्मैः( Ñ1 °त्रैः ); D3 तुषारनिहतैः पद्मैः; M3 जरसा जर्जितैः पर्णैः. —[b]) Dm1 D8 G3 -पांडुभिः; G1.2 -कर्णिभिः; M1 -पंक्तिभिः ( for -कर्णिकैः ). Ś1 Ñ1 D1-3 शीर्णकर्णिककेसरैः. —[c]) D4 हिमध्वस्तैर् ; M2 हिमैर्ध्वस्ता. Ś1 Ñ V1 B D1-3.5.7 नाल( B3 [ marg. also as in Ś1 ]°व ) शिष्टा हिमैर्दग्धाः; Dg1 Dm1 D8 T G M1.3 नालशेषैः हिमध्वस्तैर् . —[d]) Ś1 [ आ ]भांति ( for भान्ति ).

25 [a]) Ñ V1 B D1-3.5.7 M2 स ( for तु ). Ś1 असौ च ( for अस्मिंस्तु ). V1 B4 Dm1 D4-8 T2 G2.3 M पुरुषव्याघ्रः. —[b]) D5 कालं ( for काले ). Ś1 दुःखस्तपस्विनि; Ñ1 D1.2 दुःखे तपस्विनां; D3 दुःखेन तश्विवान् ; M1 सुखसमन्वितः ( for दुःखसमन्वितः ). —[c]) Ś1 D2 दुःखार्तस् ( for धर्मात्मा ). —[d]) Dg1 भक्तो ( for भक्त्या ). V1 पुरुषः ( for भरतः ). Ś1 पुरा ( for पुरे ). Ñ1 (also) सुमहायशाः ( for भरतः पुरे ).

26 Ñ1 om. 26-31[b]. —[a]) Ś1 D1-3 M2 मानं च राज्यं ( by transp. ); Ñ2 D5.7 भोगांश्च राज्यं; V1 B राज्यं च

G. 3. 22. 28
B. 3. 16. 29
L. 3. 21. 26

सोऽपि वेलामिमां नूनमभिषेकार्थमुद्यतः ।
वृतः प्रकृतिभिर्नित्यं प्रयाति सरयूं नदीम् ॥ २७
अत्यन्तसुखसंवृद्धः सुकुमारो हिमार्दितः ।
कथं त्वपररात्रेषु सरयूमवगाहते ॥ २८
पद्मपत्रेक्षणः श्यामः श्रीमान्निरुदरो महान् ।
धर्मज्ञः सत्यवादी च ह्रीनिषेधो जितेन्द्रियः ॥ २९
प्रियाभिभाषी मधुरो दीर्घबाहुररिंदमः ।
संत्यज्य विविधान्सौख्यानार्यं सर्वात्मनाश्रितः ॥ ३०
जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना ।
वनस्थमपि तापस्ये यस्त्वामनुविधीयते ॥ ३१
न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति ।
ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः ॥ ३२
भर्ता दशरथो यस्याः साधुश्च भरतः सुतः ।
कथं नु साम्बा कैकेयी तादृशी क्रूरदर्शिनी ॥ ३३
इत्येवं लक्ष्मणे वाक्यं स्नेहाद्ब्रुवति धार्मिके ।
परिवादं जनन्यास्तमसहन्राघवोऽब्रवीत् ॥ ३४
न तेऽम्बा मध्यमा तात गर्हितव्या कथंचन ।
तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु ॥ ३५

---

भोगां( V1 °ग )श्च ( for राज्यं च मानं ). —$^{b}$) Ś1 D1–3 रुचिरान् ( for विविधान् ). T1.2 बलात्; G1 अपि ( for बहून् ). Ñ2 V1 B D5.7 विषयांश्चैव सर्वशः( B1–3 °तः ). —B3 repeats 26$^{cd}$ after 38$^{ab}$. —$^{d}$) Ś1 शीतः शेते; Ñ2 B1.2.4 T3 शीते शेते ( by transp. ); D2 स तु शेते ( for शेते शीते ). D7 शीते न **हीतले.

27 Ñ1 om. 27 ( cf. v.l. 26 ). —$^{a}$) Ś1 D1–3 स हि ( for सोऽपि ). Ñ2 V1 B D5.7 नूनमिमां वेलाम् ( by transp. ). —$^{b}$) D1.3 उत्थितः ( for उद्यतः ). —$^{c}$) B1.2 कृतः ( for वृतः ). Ś1 Ñ2 V1 B D1–3.5.7 भक्त्या ( for नित्यं ). —$^{d}$) Dm1 G3 स याति ( for प्रयाति ). Dg1 D5 सरयूनदीं.

28 Ñ1 om. 28 ( cf. v.l. 26 ). —$^{a}$) B1 अनंत- ( for अत्यन्त- ). Ś1 -दुःख- ( for -सुख- ). —$^{b}$) Dg1 सुखोचितः ( for हिमार्दितः ). —$^{c}$) Ś1 Ñ2 B1.4 Dg1 Dm1 D1–3.5.7.8 G3 M1.2 Cv च; V1 B2.3 वा; Cg नु ( for तु ). Cv पर- ( for [अ]पर- ).

29 Ñ1 om. 29 ( cf. v.l. 26 ). Ś1 V1 B2 D1–3 om. 29–30. —$^{ab}$) B1 श्रीमान्; K( ed. ) वीरः ( for श्यामः ). Dm1 D4.8 T2 G1.3 M2 transp. श्यामः and श्रीमान्. T3 निरुपमो ( for °दरो ). B1 शांतिशुद्धोदरो महान् ( for $^{b}$). —$^{d}$) B1.3.4 ह्रीनिषेवी; D4 ह्रीसमेतो ( for ह्रीनिषेधो ).

30 Ś1 Ñ1 V1 B2 D1–3 om. 30 ( for Ñ1, cf. v.l. 26 and for the rest, cf. v.l. 29 ). —$^{ab}$) Ñ2 D5.7 मित- ( for प्रिय- ) and जितेंद्रियः ( for अरिंदमः ). —$^{cd}$) Dg1 Dm1 D4.8 T1.2 G3 भोगान्; Ct as in text ( for सौख्यान् ). Ñ2 B4 D5.7 विविधं सौख्यम्; B3 ( marg. also as in Ñ2 ) विविधं दुःखम् ( for विविधान्सौख्यान् ). T3 न्यायं ( for आर्यं ). Ñ2 D5.7 [आ]स्थितः; G3 श्रुतं; Cg.t श्रितः ( for [आ]श्रितः ). B1 सत्यं विविधसौख्यं च आर्यं सर्वं बलाश्रितः.

31 Ñ1 om. 31$^{ab}$ ( cf. v.l. 26 ). —$^{a}$) Ś1 Ñ2 V1 B D1–3.5.7 M2 मम ( for तव ). —$^{c}$) D3 प्रसन्नम्; M2 वनस्थेन ( for वनस्थम् ). Ñ1 त्वां पश्य ( sic ); D1 T3 तं पश्ये; D3 तापस्यात्; G3 तापस्यो ( for तापस्ये ). —$^{d}$) Ś1 D2 त्वा यांतमनुयाति यः; Ñ1 यत्नेनानुपालयन् ( subm. ); D1.3 त्वा( D3 त्वां ) यत्नेनानुयाति यः. —For 31$^{cd}$, Ñ2 V1 B D5.7 subst.:

281* वनस्थं नगरस्थोऽपि भक्त्या त्वामनुयाति यः।

[ G( ed. )हि ( for ऽपि ). B2 माम् ( for त्वाम् ). G( ed. ) सः ( for यः ). Ñ2 अनुयाचितः ( for °ति यः ). ]

32 $^{a}$) Ś1 D2 पित्र्यादेशात्तु गच्छंति; Ñ1 पित्र्यं सर्वेनुगच्छंति; Ñ2 V1 B D5.7 नित्यं समनुवर्तंते; D1 पित्र्यपंथानं गच्छंति; D3 पित्र्यमत्वानुगच्छंति ( sic ). —$^{b}$) Dg1 द्विपदा अपि; D8 द्विपदां वर ( for °दा इति ). Ś1 Ñ1 D1–3 मातुलेयं नरा इति; Ñ2 V1 B D5.7 नरा मातुलबांधवान्( B4 [ marg. also °चेष्टितं ] °वाः ). —$^{c}$) Ñ2 V1 B D5.7 इति ( for ख्यातो ). V1 B3 लोके ( for लोक- ). Ś1 D1–3 लोक( D1.2 °के )प्रवादः( Ś1 °दाः ) साधुत्वाद् ; Ñ1 लोकापवादः साधुत्वाद्. —$^{d}$) Ś1 Ñ1 D1–3 बहिष्कृतः; D4 [अ]न्यतः कृतः; M2 [अ]न्यथा कृतं ( for [अ]न्यथा कृतः ).

33 $^{a}$) Dt1 यस्यां ( for यस्याः ). —$^{b}$) D6 सुखं ( for सुतः ). —$^{c}$) Ś1 Ñ2 V1 B4 D2.3.5 M3 तु ( for नु ). B3 सापि; D3 [अ]नार्या ( for साम्बा ). —$^{d}$) Ś1 तादृशं; M2 मध्यमा ( for तादृशी ). Ś1 Ñ V1 B D1–3.5.7 मनुजेश्वर( Ś1 D3 °रं ); Dg1 D4 T1.3 M2 क्रूरशालिनी. —After 33, Ś1 Ñ1 D2.3 ins.:

282* जनयामास धर्मज्ञमिक्ष्वाकुकुलभास्करम्।

34 $^{a}$) Ñ1 [ए]व; Ñ2 V1 B1.2.4 D5.7 [अ]थो; B3 [ए]तो ( for [ए]वं ). Ś1 Dt1 D3 लक्ष्मणो ( for °णे ). Dg1 स्नेहाद्; M2 वाक्ये ( for वाक्यं ). D5 लक्ष्मणेनोक्तं. —$^{b}$) Dg1 वाक्यं; M2 स्निग्धं ( for स्नेहाद् ). Ś1 Ñ1 V1 Dt1 Dm1 D1–3.6.8 T3 M1 वदति; D4 भवति ( for ब्रुवति ). Ś1 D2 राघवं; Ñ1 रा** ( illeg. ); D1.3 M1 राघवे; D6 धार्मिकं ( for धार्मिके ). —$^{c}$) Ś1 D2 च; M3 तु ( for तम् ). Ñ2 V1 B D5.7 परिवादनिवृत्तात्मा. —$^{d}$) Ś1 न सहन्; Ñ2 V1 B1.3.4 D5.7 वचनं; D2 तमसौ; G1 असद्वद्; M3 शमयन् ( for असहन् ). B2 राघवो वाक्यमब्रवीत्.

35 $^{a}$) V1 ते सा; B3( marg. as in text ) त्वया; B4

निश्चितापि हि मे बुद्धिर्वनवासे दृढव्रता ।
भरतस्नेहसंतप्ता बालिशीक्रियते पुनः ॥ ३६
इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीम् ।
चक्रेऽभिषेकं काकुत्स्थः सानुजः सह सीतया ॥ ३७
तर्पयित्वाथ सलिलैस्ते पितॄन्दैवतानि च ।
स्तुवन्ति स्मोदितं सूर्यं देवताश्च समाहिताः ॥ ३८
कृताभिषेकः स रराज रामः
सीताद्वितीयः सह लक्ष्मणेन ।
कृताभिषेकस्त्वगराजपुत्र्या
रुद्रः सनन्दिर्भगवानिवेशः ॥ ३९

G. 3. 22. 39
B. 3. 16. 43
L. 3. 21. 36

इति श्रीरामायणे अरण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

तेषां ( for तेऽम्बा ). V1 B3.4 D1 T2 M3 Ck माता; G1 वत्स ( for तात ). ❀ Cv : केचिद्रमध्यमेति पदच्छेदमिच्छन्ति ।; Ck : अमध्यमेति वा छेदः. ❀ —b ) Ñ2 V1 B D5.7 ममाग्रतः; D1 कथं न च ( for कथंचन ). —c ) Ñ2 V1 B1–3 D5.7 तस्य; B4 अस्य ( for ताम् ). —d ) D3 reads भरतस्य in marg.

36 a ) Ś1 D2.5 [ इ ]व; Ñ V1 B Dg1 Dt1 D1.6.7 [ ए ]व; D3 [ इ ]यं; Cg as in text ( for [ अ ]पि ). —b ) D4.6 T1.2 G1.2 दृढव्रत( D4 °तः ) ( for °ता ). Ś1 Ñ V1 B D1–3.5.7 वनवासाय लक्ष्मण. —c ) Ś1 D1.2 -संयुक्ता; D5 G1 -संप्राप्ता ( for -संतप्ता ). —d ) V1 B1 Dg1 बालिशा क्रियते; D5.7 बालिशी( D5 °शो )यतते ( sic ); M2 विशालीक्रियते ( for बालिशीक्रियते ). D3 मतिः ( for पुनः ). —After 36, Dg1 Dt1 Dm1 D4.6.8 S ins. :

283* संस्मराम्यस्य वाक्यानि प्रियाणि मधुराणि च ।
हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च ।
कदा ह्यहं समेष्यामि भरतेन महात्मना ।
शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन ।

[ ( l. 2 ) Dg1 मृदु- ( for [ अ ]मृत- ). Dg1 ( marg. ) पुनः ( for मनः- ). D4 -प्रह्लादकानि ( for -प्रह्लादनानि ). —( l. 3 ) D4 G2 M2.3 [ अ ]न्वहं; G3 [ अ ]प्यहं ( for ह्यहं ).]

37 a ) Ś1 वर्णयन्नेव; Ñ1 D1–3 कथयन्नेव ( for विलपंस्तत्र ). Ñ2 V1 B D5.7 इत्यसौ प्रवदन्नेव. —b ) Ś1 गोदावरीतटं. —c ) Ñ2 V1 B D5.7 कृताभिषेकः ( for चक्रेऽभिषेकं ). —d ) G1 सीतया सह ( by transp. ).

38 a ) Ś1 Ñ1 D1–3 T3 G1 च; Ñ2 V1 B D5.7 G2 तु ( for [ अ ]थ ). Ñ2 V1 B D5.7 त्रिविवत् ( for सलिलैस् ). —b ) Ś1 D2 स्वान् ; Ñ1 D1.3 तौ; Dg1 Dm1 D6.8 T G3 M3 तैः; G1 स ( for ते ). Ś1 Dt1 D6 G1 दैवतानपि; Ñ1 D1–3 M3 दे( Ñ1 दै )वता अपि; D8 T2 G2 M1 देवतानि च; M2 देवतानृषीन् ( for दैवतानि च ). Ñ2 B2.3 D5.7 पितॄन्देवांश्च राघवः; V1 B1.4 पितृदेवांश्च राघवः. —After $38^{ab}$, B3 repeats $26^{cd}$. —c ) G1 स्तुवति. Ś1 Ñ1 D1–3 ववंदाते मुहुः सूर्यं. —d ) Dt1 M2 दैवतांश्च ( for देवताश्च ). Ś1 Ñ1 D1–3 समाहितौ; Dg1 Dt1 Dm1 D6.8 T3 G2.3 तथा( Dg1 G2 °दा )नघाः; G1 समाहितः ( for समाहिताः ). —For $38^{cd}$, Ñ2 V1 B D5.7 subst. :

284* उपास्त सानुजः सूर्यमुद्यन्तं सह सीतया ।

[ B2 उपास्ते ( for °स्त ). ]

39 a ) Ñ1 कृताभिषेकं ( for °कः ). Ś1 V1 B1.4 च; Ñ1 न; Ñ2 B2.3 D3.5.7 तु; D1.2 सु- ( for स ). V1 राघवः ( for रामः ). —b ) B2 -सहायः ( for -द्वितीयः ). —c ) T1.2 G2 गिरि- ( for त्वग- ). Ś1 Ñ V1 B D1.2.5.7 M2 सह( D2 स तु ) शैलपुत्र्या ( for त्वगराजपुत्र्या ). D3 कृताभिषेको रामस्तु सीता सौमित्रि ( sic ). —d ) Ś1 Ñ V1 B Dg1( marg. also as in text ) D2.3.5.7 T3 M2.3 सविष्णुर् ( for सनन्दिर् ). D1 गुहेन पुत्रो ( for रुद्रः सनन्दिर् ). M2 भगवान्विवेश. ❀ Cg : रुद्रः सविष्णुर्भगवानिवेश इति न क्वचिदपि कोशे दृश्यते । कश्चिद्दृश्यत इत्याह तदा अभूतोपमेति युक्तमिति ज्ञेयम् . ❀

Colophon. —*Sarga name* : Ś1 Ñ2 V1 B D1–3.5.7 हेमंतवर्णनं( B1.4 °ना; D2.3 °नः ); Ñ1 हिमवर्णनं. —*Sarga no.* : ( figures, words or both ) : Ś1 Ñ1 B1 D1.2 om. Ñ2 B3 D7 22; V1 21; B2.4 23; Dg1 Dt1 Dm1 D4.6.8 T G M1 16; D3 25; D5 12; M2.3 17. —After colophon, G1.3 conclude with श्रीरामाय नमः.

# १६

G. 3. 23. 1
B. 3. 17. 1
L. 3. 22. 1

कृताभिषेको रामस्तु सीता सौमित्रिरेव च ।
तस्माद्गोदावरीतीरात्ततो जग्मुः स्वमाश्रमम् ॥ १

आश्रमं तमुपागम्य राघवः सहलक्ष्मणः ।
कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत् ॥ २

स रामः पर्णशालायामासीनः सह सीतया ।
विरराज महाबाहुश्चित्रया चन्द्रमा इव ।
लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः ॥ ३

तदासीनस्य रामस्य कथासंसक्तचेतसः ।
तं देशं राक्षसी काचिदाजगाम यदृच्छया ॥ ४

## 16

D8 begins with ॐ; M1 with श्रीरामाय नमः.

1 V2 illeg. for st. 1–13 (cf. v.l. 3.15.7). —$^{b}$) Ñ1 सीता सौमित्रिणा सह. —$^{d}$) Ś1 Ñ1 D1–3 आजगाम; Ñ2 V1 B D5.7 पुनरायात्; G2 उपा° (for ततो जग्मुः). Dg1 यथाश्रमं; D1 स्वमाश्रयं (for स्वमाश्रमम्). M2 अभिचक्राम चाश्रमं.

2 V2 illeg. for 2 (cf. v.l. 1). —Ś1 Ñ1 D1–3 om. $2^{ab}$. —$^{a}$) D4 om. (hapl.) आश्रमं. Ñ2 B1 D5.7 पुनरागम्य; V1 B2–4 M2 समु (B2 स्वमु; M2 तदु) पागम्य (for तमुपागम्य). —$^{b}$) Ñ2 V1 B D5.7 सह सीतया; G (ed.) परवीरहा (for सहलक्ष्मणः). —Ś1 Ñ1 D1–3 read $2^{cd}$ after $3^{cd}$. —$^{c}$) Ñ2 B1 Dg1 D1.5.7 G1 पूर्वाह्णिकं (for पौर्वा°). Ś1 Ñ1 D1–3.8 G3 M2.3 सर्वं (for कर्म). —$^{d}$) D1 स पर्णशाम् (sic) (for पर्णशालाम्). B3 उपागतः; Dm1 D8 G1 M2 °विशत् (for उपागमत्). D5 चकार विविधाः कथाः (= $3^{f}$). —After 2, Dg1 Dt1 Dm1 D4.6.8 S ins.:

285* उवास सुखितस्तत्र पूज्यमानो महर्षिभिः ।

[D6 सुवितस् (sic) (for सुखितस्).]

—After 2, D5 ins. l. 1–11 of 286*.

3 V2 illeg. for 3 (cf. v.l. 1). —D5 om. $3^{ab}$. —M2.3 transp. $3^{ab}$ and $3^{cd}$. T1.2 Cg transp. $3^{abcd}$ and $3^{ef}$. Ñ2 V1 B repeat $3^{ab}$ (V1 $3^{cd}$ also) after 286*. —$^{a}$) Ñ2 V1 B (all second time) रामस्तु (for स रामः). —$^{b}$) Ś1 कांतया (for आसीनः). —Ñ2 B D7 transp. $3^{cd}$ and $3^{ef}$ (followed by 286*). —$^{c}$) Ś1 Ñ1 V1 (first time) D1–3 महाराजो (for °बाहुश्च). —$^{d}$) Ñ1 D1.3 रोहिण्या (for चित्रया). Ñ1 D1.3 यथा (for इव). Ś1 V1 (first time) रोहिण्याह्री (V1 °ण्या इ) व चंद्रमाः; Ñ2 V1 (second time) B D5.7 चित्रये (Ñ2 °या; B1 °यै; B3 °मे) व (Ñ2 च) निशाकरः; D2 रोहिण्या सह चंद्रमाः. —After $3^{cd}$, Ś1 Ñ1 D1–3 read $2^{cd}$. **Cv**: विरराजेत्यादेः पूर्वं स रामः पर्णशालायामित्याद्यर्धं द्रष्टव्यम् । व्यत्यासस्तु लेखककृतः ।; **Cr**: स राम इत्यर्धानन्तरं विरराजेत्यर्धं. ❀ —D4.5 om. $3^{ef}$. —$^{e}$) Ñ2 V1 B D7 च (B4 [ए] व; D7 स) धर्मात्मा (for सह भ्रात्रा). —After 3, Ñ2 V1 B D7 (only l. 1–11) ins.; while D5 ins. l. 1–11 only after 2:

286* कथाः कथयतस्तस्य सह भ्रात्रा महात्मनः ।
गृध्रराजः समागम्य राघवं वाक्यमब्रवीत् ।
महेष्वास महाबाहो महाबल महाभुज ।
आपृच्छे त्वां नरश्रेष्ठ गमिष्यामि स्वमालयम् ।
अप्रमादश्च कर्तव्यः सर्वभूतेषु राघव । [5]
कृतात्मा त्वममित्रघ्न गन्तुमिच्छामि राघव ।
दृष्ट्वाहं सुहृदः सर्वानात्मीयान्पुरुषर्षभ ।
आगमिष्यामि भद्रं ते तथ्यमेतद्ब्रवीम्यहम् ।
तमुवाच ततो रामो लक्ष्मणश्च खगेश्वरम् ।
गम्यतां पतगश्रेष्ठ पुनः संदर्शनाय नः । [10]
गृध्रराजे गते तस्मिन्राघवः सह सीतया ।
पर्णशालामुपागम्य प्राविशत्सहलक्ष्मणः ।
लक्ष्मणोऽथ समुत्थाय चतुःशालं मनोरमम् ।
प्रविवेश महाबाहुः सिंहो गिरिगुहामिव ।

[(l. 1) V1 कथां. D5 त्वस्य (for तस्य). —(l. 3) Ñ2 V1 D5.7 -प (D7 ✻) राक्रम (for महाभुज). —(l. 4) B3 (marg. also) नरव्याघ्र (for °श्रेष्ठ). —B2 om. (hapl.) l. 6. —(l. 6) B3 (marg. also) सुहृद्बंधून् (for कृतात्मा त्वम्). Ñ2 V1 D5.7 सुहृदा (D5.7 °कृता) त्मन्नमित्रघ्न (Ñ2 °घ्नेषु); B1 कृतात्माहममित्रेषु (for the prior half). B3 (marg. also) वीक्षितं (for राघव). —(l. 7) G (ed.) तु (for [अ] हं). V1 B1.4 पुरुषोत्तम (V1 °मः) (for °षर्षभ). —(l. 8) B1 तत्ते तत्त्वं (for तथ्यमेतद्). —(l. 9) V1 B2.3 खगोत्तमं (for खगेश्वरम्). —(l. 10) D7 परम- (for पतग-). D7 संदर्श ✻ स्व (for °र्शनाय). B4 च (for नः). —(l. 11) B4 तत्र (for तस्मिन्). G (ed.) प्रियदर्शनः (for सह सीतया). —(l. 12) B3 reads शाला in पर्णशालाम् *sup. lin.* Ñ2 B1 उपविष्टः सलक्ष्मणः (for the post. half). —(l. 13) Ñ2 हि (for ऽथ). B1 मनोहरं. Ñ2 V1 चतुः (V1 धनुः) शालां मनोरमां (for the post. half).]

—Thereafter V1 repeats $3^{abcd}$ (var.); Ñ2 B repeat $3^{ab}$ only.

4 V2 illeg. for 4 (cf. v.l. 1). —Ñ2 V1 B D5.7 om. $4^{ab}$. —$^{a}$) Ś1 Ñ1 D1–3 अथ; Dg1 Dm1 D4.8 T1.2 G1.3 M तथा; G2 om. (for तदा). —$^{b}$) D4 तथा (for कथा-). Ñ1 कथासंरक्तचेतसः.

सा तु शूर्पणखा नाम दशग्रीवस्य रक्षसः ।
भगिनी राममासाद्य ददर्श त्रिदशोपमम् ॥ ५
सिंहोरस्कं महाबाहुं पद्मपत्रनिभेक्षणम् ।
सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम् ॥ ६
राममिन्दीवरश्यामं कन्दर्पसदृशप्रभम् ।
बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता ॥ ७
सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ।
विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा ॥ ८
प्रियरूपं विरूपा सा सुस्वरं भैरवस्वना ।
तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी ॥ ९
न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ।
शरीरजसमाविष्टा राक्षसी राममब्रवीत् ॥ १०

G. 3. 23. 18
B. 3. 17. 12
L. 3. 22. 10

**5** V2 illeg. for 5 (cf. v.l. 1). —[a]) Ñ2 V1 B D5.7 घोरा (for सा तु). Ś1 Ñ1 D2.4 T G1.3 M2.3 शू( D2 सू )र्पण ( Ś1 D4 T2 °न )खी; B1 Dg1 D1.3.5.7 सूर्पण( Dg1 D1 °न )-खा; D8 M1 °नखा (for शूर्पणखा). Dg1 घोरा; T2 M1 रामं (for नाम). —[c]) Ś1 Ñ V1 B D1.2.5.7 G1 आगम्य( Ñ °त्य ) (for आसाद्य).

**6** V2 illeg. for 6 (cf. v.l. 1). —[a]) Ñ V1 B D1.3.5.7 सिंहस्कंधं; Dt1 D6 दीप्तास्यं च (for सिंहोरस्कं). —[b]) Dg1 Dt1 D6 पद्मपत्रायतेक्षणं; *D3* रामं पद्मनिभे°. —After $6^{ab}$, Dm1 D4.8 T1.2 G3 ins.; while Dt1 D6 ins. l. 2 only after $6^{ab}$:

287* आजानुबाहुं दीप्तास्यमतीव प्रियदर्शनम् ।
गजविक्रान्तगमनं जटामण्डलधारिणम् ।

—Ś1 Ñ1 B( om. $7^{ab}$) D1–3 read $7^{cd}$ after $6^{ab}$. —Ñ2 V1 B D5.7 read $6^{cd}$ after $10^{ab}$. —[d]) D3 पार्थिवं (for पार्थिव- ). —After 6, B2 ins. 289*.

**7** V2 illeg. for 7 (cf. v.l. 1). —Ñ2 V1 B D5.7 om. $7^{ab}$. —[b]) Dm1 D6.8 G3 -सदृशं( D6.8 °श ) प्रभुं (for -सदृशप्रभम् ). Ś1 Ñ1 D1–3 संरक्तकमले( Ñ1 °तपते )क्षणं. —Ś1 Ñ1 B D1–3 read $7^{cd}$ after $6^{ab}$. —[c]) Ś1 Ñ1 D1.2 G1 [ इं ]द्रसमं (for [ इ ]न्द्रोपमं ). Ñ2 V1 B D5.7 सा( B1 तं ) दृष्ट्वा देवसंकाशं. —[d]) Ñ2 V1 B D5.7 मदनार्दिता (for काममोहिता ). —After 7, Ñ2 V1 B D5.7 ins.:

288* प्रकृत्या चैव दुर्वर्णा दुःशीला दुःखकारिणी ।
दुष्कुलीना दुरासेवा केवलं स्त्रीति सा स्मृता ।

[ (l. 1) Ñ2 D5.7 दुःशीला (for दुर्वर्णा). Ñ2 D5.7 दुर्वृत्ता; V1 जनानां; B4 दुश्चैला (sic) (for दुःशीला). Ñ2 B1 D5.7 दुष्ट ( B1 दुःख )चारिणी. —(l. 2) V1 दुरात्माना (sic); B2 °सेव्या; B4 (marg. also as above) °चारा (for दुरासेवा). B1 स्त्रीभिदा (for स्त्रीति सा). ]

**8** V2 illeg. for 8 (cf. v.l. 1). —[a]) D1 दुर्मुखा (for °खी ). V1 B2.3 transp. सुमुखं and दुर्मुखी. —[b]) Ś1 Ñ V1 B D1.5.7 वृ( D1 द )त्तपार्श्वं; M2 तनुमध्यं (for वृत्तमध्यं). —D2 om. $8^{cd}$. —[c]) Ś1 Ñ1 D1.3 सुरूपाक्षं (for विशालाक्षं). —[d]) V1 lacuna for केशं ताम्रमूर्धजा.

**9** V2 illeg. for 9 (cf. v.l. 1). —[a]) Ś1 V1 B1.3 D1 अतिरूपं; Ñ1 B3( *inf. lin.* also ) प्रति°; Ñ2 B2.4 D2.3.5.7 अ( D2 स्व )भि°; Dg1 D4 T1.2 G M1.3 Cr.m.g.k प्रीति°; M2 (after corr. *sec. m.* as in text) प्रतिरूपा (for प्रियरूपं). Ś1 सुरूपं च; D2 विरूपी सा (for विरूपा सा). —[b]) Ś1 Ñ1 B2–4 D1–5.7 T G3 M भैरवस्वरा. —[c]) Dm1 करुणं (for तरुणं). B4 D1.3 दारुणी (for °णा).

**10** V2 illeg. for 10 (cf. v.l. 1). —[a]) Ś1 न्यायवृत्तिं (for °वृत्तं). M1 सुनिर्वृत्ता (for सुदु° ). Ñ V1 B D5.7 M2 तं न्याय( B4 तमायं; M2[ before corr. ] °रय )वृत्तं दुर्वृत्ता. —[b]) Ñ1 * * * प्रिय- (for प्रियमप्रिय- ). —After $10^{ab}$, Ñ2 V1 B D5.7 read $6^{cd}$. —B2 om. $10^{c}$. —[c]) D4 अशरीर-; D7 शरीरजं; G(ed.) कामभार- (for शरीरज- ). —After $10^{c}$, Ñ2 V1 B1.3.4 D5.7 ins.; while B2 ins. after 6:

289* दृष्ट्वा राममचिन्तयत् ।
अयं परमरूपाढ्यो युवा यौवनगर्वितः ।
मन्यते देवगन्धर्वैस्तुल्यमात्मानमात्मवान् ।
अस्याहं श्लाघ्यरूपस्य रामस्याद्भुतकर्मणः ।
काममुत्पादयिष्यामि रूपेणान्येन कामिनी । [5]
अस्य प्रकृतिकल्याणी भार्या सीतेति विश्रुता ।
रूपयौवनसम्पन्ना श्रीरिवामरवर्णिनी ।
तां विहाय यथा ह्येष मामिकां रूपसम्पदम् ।
दृष्ट्वा मामेव भजते तथा कर्तुमहं यते ।
रूपयौवनसम्पन्ना स्त्री किल त्रिदिवौकसाम् । [10]
श्रीर्माया रक्षसामेषा संमतेति मतिर्मम ।
सा त्वहं श्रीरिवाकाशान्मायया पतिता भुवि ।
राममुन्मादयिष्यामि शर्मिष्ठा नाहुषं यथा ।
साभिगम्य महाबाहुं भूत्वा वै कामरूपिणी ।
स्त्रीस्वभावं पुरस्कृत्य. [15]

[ B2 om. l. 1. —(l. 1) V1 तुष्टा (for दृष्ट्वा). —(l. 2) D5 -दर्पितः (for -गर्वितः). —(l. 3) D7 आत्मा * * त्मवान्. —(l. 4) B3 तस्याहं (for अस्याहं). B3 (marg. also) -रूपिणः (for -कर्मणः). —(l. 5) B2 [ अ ]ल्पेन (for [ अ ]न्येन). —(l. 7) B2 [ अं ]बर- (for [ अ ]मर- ). B3 (*sup. lin.* also) -रूपिणी (for -वर्णिनी). —(l. 8) B3 (*sup. lin.* also as in text) अहं (hypm.) (for तां). B2 कामिकां; D5 मामेकां (for मामिकां). —(l. 10) V1 न किल (hypm.) (for किल). —(l. 11) B एषां (for एषा). —(l. 12) Ñ2 V1 B4 मायेव; D5 मतया (sic) (for मायया). —(l. 13) Ñ2 D5.7 उत्साह-यिष्यामि (for उन्माद° ). V1 B2.4 (marg. also as above)

G. 3. 23. 26
B. 3. 17. 12
L. 3. 22. 11

जटी तापसरूपेण सभार्यः शरचापधृक् ।
आगतस्त्वमिमं देशं कथं राक्षससेवितम् ॥ ११
एवमुक्तस्तु राक्षस्या शूर्पणख्या परंतपः ।
ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे ॥ १२
आसीद्दशरथो नाम राजा त्रिदशविक्रमः ।
तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः ॥ १३
भ्रातायं लक्ष्मणो नाम यवीयान्मामनुव्रतः ।
इयं भार्या च वैदेही मम सीतेति विश्रुता ॥ १४
नियोगात्तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः ।
धर्मार्थं धर्मकाङ्क्षी च वनं वस्तुमिहागतः ॥ १५
त्वां तु वेदितुमिच्छामि कथ्यतां कासि कस्य वा ।
इह वा किंनिमित्तं त्वमागता ब्रूहि तत्त्वतः ॥ १६

---

काममुत्पादयिष्यामि ( for the prior half ). V$_1$ नद्युषे ( sic ) ( for नाहुषं ). —( l. 14 ) V$_1$ अभिगम्य ( for साभि° ). ]

—$^d$ ) Ñ$_2$ V$_1$ B D$_{5.7}$ सस्मितं वाक्यमब्रवीत्.

**11** V$_2$ illeg. for 11 ( cf. v.l. 1 ). B$_4$ reads 11–12 in marg. —$^a$ ) Ñ$_1$ Dt$_1$ D$_6$ -वेषेण; Cg as in text ( for -रूपेण ). Ñ$_2$ V$_1$ B D$_{5.7}$ कस्त्वं तापसरूपेण. —$^b$ ) Ś$_1$ Ñ$_1$ B$_2$ Dt$_1$ D$_{1.4}$ T शरचापभृत् ( Ñ$_1$ D$_4$ °दृक् ; Dt$_1$ T °धृत् ); Ñ$_2$ M$_2$ स च ( M$_2$ सह ) चाप°; V$_1$ कवचासि° ( for शरचापधृक् ). —$^c$ ) D$_4$ इदं ( for इमं ). Ñ$_2$ V$_1$ B D$_{5.7}$ इमं देशमनुप्राप्तो ( Ñ$_2$ B$_1$ °प्ता ). —$^d$ ) Ñ$_2$ V$_1$ B D$_{5.7}$ दुर्गं ( for कथं ). —After 11, Ñ$_2$ V$_1$ B D$_{5.7}$ ins. :

290* नातिदूरमितः शूरा राक्षसा घोरविक्रमाः ।
उत्सादयन्त्यृषीन्सर्वाञ्जनस्थाने महाबलाः ।
वसन्तः क्रूरकर्माणस्ततस्त्वां वै ब्रवीम्यहम् ।
कथं त्वमरमुख्यानां सदृशस्त्वमिहागतः ।
इदं गोदावरीतीरमृषयः पावकोपमाः । [5]
त्वद्बाहुबलमाश्रित्य तिष्ठन्तीति मतिर्मम ।

[ ( l. 1 ) B$_{1.4}$ -दूर इतः. V$_1$ B$_{2.4}$ घोररूपिणः. —( l. 3 ) D$_7$ वसंत. Ñ$_2$ D$_{5.7}$ तु ( for वै ). —( l. 4 ) B$_3$ wrongly repeats सदृश. —( l. 5 ) V$_1$ इमं ( for इदं ). B$_2$ पावकप्रभाः. ]; —while D$_1$ ins. :

291* राक्षसानामयं वासस्तपस्विजनवर्जितः ।;

—D$_1$ cont.; whereas Dg$_1$ Dt$_1$ Dm$_1$ D$_{4.6.8}$ S ins. after 11 :

292* किमागमनकृत्यं ते तत्त्वमाख्यातुमर्हसि ।

[ Dm$_1$ D$_{1.8}$ G$_1$ M$_1$ आगमनकार्यं; D$_1$ चा° ( for आगमनकृत्यं ). T$_3$ समाख्यातुम् ( for त्वमा° ). ]

**12** V$_2$ illeg. for 12 ( cf. v.l. 1 ).—B$_4$ reads 12 in marg. ( cf. v.l. 11 ). —$^a$ ) G$_2$ स ( for तु ). —$^b$ ) Ś$_1$ B D$_{1.4}$ T$_3$ Cg.t शू ( D$_1$ सू ) र्पनख्या; Ñ$_1$ Dg$_1$ Dm$_1$ ( before corr. ) सूर्प° ( for शूर्पणख्या ). Ś$_1$ Ñ V$_1$ B D$_{1-3.5.7}$ स ( D$_2$ तु ) राघवः. —$^c$ ) D$_6$ सार्धम् ( for सर्वम् ). —$^d$ ) Ñ$_1$ व्याख्यातुम् ( for आख्या° ). —After 12, Dg$_1$ Dm$_1$ D$_{4.8}$ T G$_{2.3}$ M ins. :

293* अनृतं न हि रामस्य कदाचिदपि संमतम् ।
विशेषादाश्रमस्थस्य समीपे स्त्रीजनस्य च ।

[ ( l. 1 ) M$_3$ च ( for हि ). —( l. 2 ) Dg$_1$ D$_4$ T विशेषेण ( for विशेषाद् ). ]

**13** V$_2$ illeg. for 13 ( cf. v.l. 1 ). —$^{ab}$ ) Dt$_1$ wrongly repeats रथो नाम राजा त्रिदश after त्रिदश in $^b$. Ñ$_2$ V$_1$ B D$_{5.7}$ राजा दशरथो नाम धर्मात्मा विश्रुतः क्षितौ. —After 13$^{ab}$, B$_4$ ins. श्रीरामः and श्रीहरिः. —$^c$ ) T$_3$ अग्रतः ( for अग्रजः ). —$^d$ ) Ś$_1$ D$_2$ जनश्रुतः ( for जनैः श्रुतः ). Ñ$_2$ V$_1$ B D$_{5.7}$ राम इत्यभि ( B$_4$ [ marg. also ] °त्र ) विश्रुतः.

**14** $^b$ ) Ś$_1$ Ñ$_1$ D$_{2.3}$ कनीयानेव ( Ñ$_1$ D$_3$ °न्मम ) सुव्रतः; D$_1$ कनीयान्समनुव्रतः. —$^c$ ) Ñ$_1$ D$_2$ M$_2$ च भार्या ( by transp. ); D$_3$ तु भार्या ( for भार्या च ). —For 14, Ñ$_2$ V$_1$ B D$_{5.7}$ subst. :

294* सीतेयं मम भार्या च भ्रातायं लक्ष्मणस्तथा ।

[ B$_4$ ( marg. also ) मामेव समनुव्रता ( for the post. half ). ]

**15** V$_2$ illeg. up to पितु in $^b$. —$^a$ ) Ñ$_1$ illeg.; Dg$_1$ D$_3$ G$_1$ च ( for तु ). —$^b$ ) D$_4$ मम ( for पितुर् ). Ś$_1$ Ñ$_1$ D$_{1-3}$ धर्मतः; Ñ$_2$ V$_1$ B D$_{5.7}$ शासनात् ( for यन्त्रितः ). —D$_7$ om. 15$^{cd}$. —$^c$ ) Ś$_1$ Ñ V$_2$ B$_{3.4}$ D$_{1.5}$ धर्मार्थी; B$_1$ °त्मा; D$_2$ °र्थो; D$_3$ °र्था ( sic ) ( for धर्मार्थं ). Ś$_1$ Ñ$_1$ D$_{2.3}$ धर्मदर्शी; Ñ$_2$ V B D$_5$ °कामश्च; D$_1$ °रक्षी; M$_3$ °कामी ( for धर्मकाङ्क्षी ). V$_2$ तु ( for च ). —$^d$ ) G( ed. ) वने ( for वनं ). V$_1$ B$_{2.3}$ द्रष्टुम् ( for वस्तुम् ). Ñ$_2$ स्वमागतः; D$_5$ समा° ( for इहागतः ). Ś$_1$ Ñ$_1$ D$_{1-3}$ वनवासं समा ( Ñ$_1$ D$_{1.3}$ °समिहा ) गतः. —After 15, Ñ$_2$ V B D$_5$ ins.; while D$_7$ ins. l. 2 only after 15$^{ab}$ :

295* रूपयौवनसम्पन्ना साक्षाच्छ्रीरिव सुन्दरी ।
वने घोरतरे भीरु का त्वं चरसि दण्डके ।

[ ( l. 1 ) B$_1$ -लक्षण- ( for -यौवन- ). V$_1$ B$_4$ रूपिणी ( for सुन्दरी ). V$_2$ श्रीरिव यतनोचरी ( sic ) ( for the post. half ). —( l. 2 ) V$_2$ illeg. up to चरसि. B$_1$ घोरतमे; D$_7$ घोरे ( subm. ) ( for घोरतरे ). B$_3$ वससि ( for चरसि ). ]

**16** $^a$ ) Ś$_1$ Ñ$_1$ D$_{1-3}$ तु विज्ञातुम् ; Ñ$_2$ V B D$_{5.7}$ अहं ज्ञातुम् ; D$_4$ च वे° ( for तु वेदितुम् ). —$^b$ ) Ñ$_2$ D$_{5.7}$ कुतस्त्वं; Dt$_1$ D$_6$ Ct कस्य त्वं ( for कथ्यतां ). Ñ$_1$ ( also ) V B$_2$ D$_3$ कस्य कासि ( by transp. ); G$_2$ कापि कस्य. Ś$_1$ Ñ$_1$ D$_2$ च ( for वा ). —After 16$^{ab}$, Dg$_1$ Dt$_1$ Dm$_1$ D$_{4.6.8}$ S ins. :

सात्रवीद्वचनं श्रुत्वा राक्षसी मदनार्दिता ।
श्रूयतां राम वक्ष्यामि तत्त्वार्थं वचनं मम ॥ १७
अहं शूर्पणखा नाम राक्षसी कामरूपिणी ।
अरण्यं विचरामीदमेका सर्वभयंकरा ॥ १८
रावणो नाम मे भ्राता राक्षसो राक्षसेश्वरः ।
प्रवृद्धनिद्रश्च सदा कुम्भकर्णो महाबलः ॥ १९
विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः ।
प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ॥ २०
तानहं समतिक्रान्ता राम त्वापूर्वदर्शनात् ।
समुपेतास्मि भावेन भर्तारं पुरुषोत्तमम् ।
चिराय भव भर्ता मे सीतया किं करिष्यसि ॥ २१

G. 3. 23. 40
B. 3. 17. 25
L. 3. 23. 21

296* न हि तावन्मनोज्ञाङ्गी राक्षसी प्रतिभासि मे ।

[ Dt1 D6.8 T3 त्वं ( for न ). M3 तु ( for हि ). G2 मनोज्ञांगि. M2 मानुषी ( for राक्षसी ). —G2 om. ( hapl. ) from प्रतिभासि up to राक्षसी in 18$^{b}$. D4 G3 प्रतिभाति ( for °भासि ). T2 G1 M1.3 मा ( for मे ). ]

—$^{c}$ ) Ś1 D2.3 [ अ ]द्य; Dm1 D8 G3 [ ए ]व ( for वा ). —$^{d}$ ) Ñ1 ह्यागता. Ś1 Ñ1 D1–3 कारणं; M2 कथ्यतां ( sic ) ( for तत्त्वतः ). Ñ2 V B D5.7 एका चरसि निर्भया. —After 16, M2 ins. :

297* यक्षिणी राक्षसी वापि त्वमुताहो सुराङ्गना ।

17 G2 om. 17 ( cf. v.l. 296* ). —$^{a}$ ) M2 अब्रवीद् ; M3 सा तु तद् ( for सात्रवीद् ). Ś1 D5.7 तु वचः; Ñ V B D1–3 तद्वचः ( for वचनं ). —$^{b}$ ) B1 मदविह्वला; Dg1 °तुरा; D8 °न्विता ( for मदनार्दिता ). —T1 damaged from वक्ष्यामि in 17$^{c}$ up to राक्ष in 18$^{b}$. —$^{c}$ ) Dt1 D6 तत्त्वार्थं ( for वक्ष्यामि ). —$^{d}$ ) Dt1 D6 वक्ष्यामि ( for तत्त्वार्थं ). Ś1 Ñ V B D1–3.5.7 सह( V1 °* ) भ्रात्रा वचो मम. —After 17, M2 ins. :

298* पुलस्त्यतनयस्याहं सुता राघव तस्य ह ।

18 G2 om. up to राक्षसी in $^{b}$ ( cf. v.l. 296* ). T1 damaged up to राक्ष in $^{b}$ ( cf. v.l. 17 ). —D1 om. 18. —$^{a}$ ) Ś1 Dg1 Dm1 D2.4.8 T2.3 G1.3 M1.3 शू ( Dg1 D2 सू )र्पण( Ś1 Dg1 D4 T3 M1 °न )खी; Ñ1 V1 D3 सूर्प° ( for शूर्पणखा ). —$^{c}$ ) Ñ2 V B M2 अरण्ये; D3 आ° ( for अरण्यं ). Ś1 Ñ2 V B D2.3.5.7 M2 [ ए ]का; Ñ1 [ ए ]षा; Dg1 [ ए ]व ( for [ इ ]दम् ). —$^{d}$ ) D2 घोरसत्त्व-; M2 सर्वलोक- ( for एका सर्व- ). Ś1 Ñ V B D3.5.7 सर्वभूत( Ś1 घोररूप; Ñ1 घोरं सत्त्व; D3 घोरा सत्त्व )भयंकरी( V1 B3 °रा ). —After 18, Ñ2 V B D5.7 ins. :

299* उत्सादयन्ती पुण्यानि तीर्थान्यायतनानि च ।

19 $^{a}$ ) V1 भ्राता* ( for मे भ्राता ). —$^{b}$ ) T1.2 बलीयान् ; G2 गरीयान् ( for राक्षसो ). Ś1 Ñ1 Dm1 D1–3.8 G3 विश्रुतो ( Dm1 D8 G3 राक्षसो ) राक्षसाधिपः; Dt1 D6 Ck.t यदि ते श्रोत्रमागतः. —After 19$^{ab}$, Dm1 D4.6.8 T1.2 G2.3 M1 ins. :

300* वीरो विश्रवसः पुत्रो यदि ते श्रोत्रमागतः ।

[ Dm1 G2.3 M1 सोयं; D8 योयं ( for वीरो ). ]

—Ś1 Ñ V B Dg1 Dt1 D1–3.5–7 G1 M1 transp. 19$^{cd}$ and 20$^{ab}$. —$^{c}$ ) D8 G2.3 M3 Ck प्रवद्धनिद्रश्. Dm1 D8 G3 तु; T3 स ( for च ). Ñ V B D5.7 T3 तथा ( for सदा ). G1 वद्धनिद्रश्च सततं. —$^{d}$ ) D4 कुंककर्णो. T3 सदा- ( for महा- ).

20 Ś1 Ñ V B Dg1 Dt1 D1–3.5–7 G1 M1 transp. 19$^{cd}$ and 20$^{ab}$. —G2 om. 20$^{ab}$. —$^{a}$ ) Ś1 Ñ V B D1–5.7 T1.2 M1.2 च ( for तु ). Ñ2 D5.7 मे भ्राता ( for धर्मात्मा ). —$^{b}$ ) D4 स ( for न ). Ś1 च; Ñ1 D2.3 स ( for तु ). D4 -चेष्टितं ( for -चेष्टितः ). Ñ2 V B D5.7 राक्षसाचारवर्जितः; D1 शिष्टराक्षसवेष्टितः. —$^{c}$ ) Ñ2 V B D5.7 -बलवीर्यौ च; D3 -वीर्यौ चारेण ( sic ); M2 -वीर्याभरणौ ( for -वीर्यौ च रणे ). —$^{d}$ ) Ñ2 V B D5.7 राक्षसौ ( for भ्रातरौ ). —After 20, Ñ2 V B D5.7 M2 ins. :

301* महावीर्यौ महाकायौ निर्भयौ घोरदर्शनौ ।

[ B2 महासत्त्वौ ( for °कायौ ). M2 transp. महावीर्यौ and महाकायौ. B1 राक्षसौ ( for निर्भयौ ). ]

—Ñ2 B4 D5.7 cont. :

302* चतुर्दश सहस्राणि रक्षसां घोररूपिणाम् ।
बलं भ्रातुर्मम सदा खरस्य सुमहात्मनः ।
तेन सार्धं महारण्ये वसामि विगतज्वरा ।
भ्रात्रा तेन च गुप्ताहं मन्यमाना भृशं नृप ।
[ ( l. 1 ) B4 कामरूपिणां ( for घोर° ). ]

21 $^{a}$ ) G2 समतिक्रम्य ( for °क्रान्ता ). Ś1 Ñ1 D1.2 त्वामहं स्व( D2 त्व )भिरामा( L[ ed. ] °मं ) च( D2 °माच ). —$^{b}$ ) Ñ1 D1.2 त( D1 त्व )त्पूर्व-; T3 G3 M1 Ck त्वां पूर्व-; M2 ( after corr. *sec. m.* as in text ) त्वं पूर्ण-; M3 त्वां पूर्ण- ( for त्वापूर्व- ). Ś1 प्रयाता पूर्वदर्शनात् ; D3 राम त्वत्प्रियकांक्षया. ❀ Cr : त्वा त्वां पूर्वदर्शनात् प्रथमदर्शनक्षणमारभ्य अपूर्वदर्शनादित्यपि पदं ।; Cm: त्वा त्वां पूर्वदर्शनात् प्रथमदर्शनादारभ्य । अपूर्वदर्शनादिति वा पाठः ।; Cg : त्वा त्वां पूर्वदर्शनात् प्रथमदर्शनादारभ्य । अपूर्वदर्शनादिति वा छेदः ।; Ck : त्वां पूर्वदर्शनात् प्रथम दर्शनक्षणमारभ्य । अपूर्वदर्शनादित्यपि पदं ।; Ct : त्वा त्वां पूर्वदर्शनात् प्रथमदर्शनक्षणमारभ्य । यद्वापूर्वदर्शनाद्देवादिष्वित: प्रागदृष्टदिव्यत्वद्रूपदर्शनाद्धेतोः. ❀ —Ś1 Ñ1 D1–3 om. 21$^{cd}$. —$^{c}$ ) M3 स ( for [ अ ]स्मि ). —$^{d}$ ) Dg1 पुरुषर्षभं ( for °षोत्तमम् ). —After 21$^{cd}$, Dg1 Dt1 Dm1 D4.6.8 S ins. :

303* अहं प्रभावसम्पन्ना स्वच्छन्दबलगामिनी ।

G. 3. 23. 41
B. 3. 17. 26
L. 3. 22. 22

विकृता च विरूपा च न सेयं सदृशी तव ।
अहमेवानुरूपा ते भार्यारूपेण पश्य माम् ॥ २२
इमां विरूपामसतीं करालां निर्णतोदरीम् ।
अनेन सह ते भ्रात्रा भक्षयिष्यामि मानुषीम् ॥ २३
ततः पर्वतशृङ्गाणि वनानि विविधानि च ।
पश्यन्सह मया कान्त दण्डकान्विचरिष्यसि ॥ २४
इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरेक्षणाम् ।
इदं वचनमारेभे वक्तुं वाक्यविशारदः ॥ २५

इति श्रीरामायणे अरण्यकाण्डे षोडशः सर्गः ॥ १६ ॥

[ D6 -वरगामिनी; M3 °भागिनी ( for -बलगामिनी ). ]

—[e]) D3 त्वं राम ( for चिराय ). Ś1 Dm1 D1.2.8 T2.3 G M2.3 transp. भर्ता and से. —[f]) Ś1 Ñ1 D1–3 तवानया ( for करिष्यसि ). —For 21, Ñ2 V B D5.7 subst., while M2 cont. after 303* :

304* साहं त्वद्दर्शनाद्राम कामवक्तव्यतां गता ।
भजस्व भजमानां मां सीतया किं तवानया ।

[ ( l. 1 ) V1 lacuna; B2 कार्य- ( for काम- ). D5.7 -वैक्लव्यतां ( for -वक्तव्यतां ). —( l. 2 ) M2 भज मां भजमानां त्वं ( for the prior half ) and मानुष्या ( for सीतया ). ]

22 [a]) V1 विरक्ता ( for विकृता ). Ñ2 V B D5.7 [ इ ]यं; D4 न ( for first च ). —T1 damaged from second च up to 22[c]. Ś1 विरूपा विकृता चेयं. —[b]) Ś1 हि वा; Ñ1 [ इ ]यं च; Ñ2 V B Dg1 Dm1 D1.5.7.8 G2.3 M1.2 चे( B4 ते )यं; D2 [ इ ]यं मत्-; D3 [ इ ]यं हि; M3 [ ए ]वेयं ( for सेयं ). —[c]) Ś1 D2 [ अ ]नुरागाच् ( for [ अ ]नुरूपा ). Ś1 B1 D2.3 च; D5 वै ( for ते ). —[d]) Dm1 G3 जाया-; D6 भार्यां ( for भार्या- ). Dm1 पश्य तां; T3 राघव ( for पश्य माम् ). Ñ2 V B D5.7 M2 भार्या रूपगुणान्विता. —After 22, Ñ2 V B D5.7 ins. :

305* पश्य मां दिव्यरूपां त्वं दिव्याभरणभूषिताम् ।
कान्तोरुनयनां कान्तां पीनश्रोणिपयोधराम् ।

[ ( l. 2 ) B1 पीनोन्नत- ( for पीनश्रोणि- ). ]

23 [a]) Ś1 V1 D1 अरूपाम्; Ñ2 कुरूपाम्; M3 करालाम् ( for विरूपाम् ). —[b]) Dt1 Dm1 D8 T2 करालीं; M3 विरूपां ( for करालां ). Dg1 Dm1 T3 Ck निर्नतोदरीं; G1 [ निर्मितो°; M2.3 निर्णितो° ( for निर्णतोदरीम् ). Ś1 Ñ1 V D1–3.5.7 भक्षयिष्यामि मानुषीं( Ś1 मानवीं ) ( = 23[d] ); Ñ2 B द्वितीयेन गतायुषा. —[c]) Ñ1 च सह; Ñ2 D5.7 तव किं; B Dm1 D4 T2 M2 ते सह( by transp. ); D1 च सह; M1 सह तां ( for सह ते ). —[d]) M2 मानुषां ( for मानुषीम् ). Ś1 Ñ1 V D1–3.5.7 द्वितीयेन गतायुषा.

24 [b]) Ñ2 V B D5.7 रुचिराणि ( for विविधानि ). Ś1 Ñ1 D1–3 विविधानि वनानि( D3 च यानि ) ( by transp. ). —[c]) Ś1 D2 G3 कामं; Ñ1 Dg1 Dt1 D1.3.6 T3 G1.2 M1.3 कामी ( for कान्त ). —[d]) V1 B2.4 दंडकं ( for दण्डकान् ). —After 24, Ñ2 V B D5.7 ins.; while M2 ins. l. 2 only after 25[ab] :

306* एतत्तु वचनं श्रुत्वा राक्षस्या ह्यतिदारुणम् ।
ईक्षांचक्रे तदा सीतां लक्ष्मणं च महाभुजः ।

[ ( l. 1 ) B2 अति- ( for ह्यति- ). —( l. 2 ) B1–3 ततः ( for तदा ). M2 सीतां वीक्षां ततश्चक्रे ( for the prior half ). B1 M3 महाभुजं. ]

25 [a]) Ś1 Ñ1 D1–3 उक्त्वा काकुत्स्थं. M2 एवमुक्तस्तु काकुत्स्थः. —[b]) D1 प्रसह्य ( for प्रहस्य ). Ś1 Ñ1 D1–3 मदिरेक्षणा; Dm1 T3 G2.3 M1 °क्षणः; G1 [ अ ]मितरोषणः ( for मदिरेक्षणाम् ). —For 25[ab], Ñ2 V B D5.7 subst.; Ś1 Ñ1 D1–3 cont. after 308*; whereas T2 M3 ( preceded by 306* ) ins. after 25[ab] :

307* संप्रहासनिमित्तं तु रामः शूर्पणखां ततः ।

[ Ñ1 स प्रहास-; D2( marg. also as above ) संप्रसादः; T2 संप्रहार- ( for संप्रहास- ). Ñ1 D1–3 तां ( for तु ). Ś1 स प्रहासनिमित्तां तां ( for the prior half ). Ś1 Ñ1 D1 शू( Ñ1 D1 सू )र्पनखां; V B1.3 सूर्प°; D2.3 M2 सू( M2 शू )र्पणखीं; T2 शूर्पनखीं ( for शूर्पणखां ). Ñ1 पुनः; D3 तदा ( for ततः ). ]
—After 25[ab], Ś1 Ñ1 D1–3 ins. :

308* देवी सलक्ष्मणा सीता बभूवावस्थिता पुरः ।

[ D1.3 देवीं सलक्ष्मणां सीतां ( for the prior half ). D2 पुरा; D3 पुनः ( for पुरः ). ]
—T1 damaged for 25[c]. —[c]) T2 वक्तुं; G2 इयं ( for इदं ). —[d]) D4 T1 वाक्यं ( for वक्तुं ). Ś1 Ñ1 D1–3 वक्तुं वचनकोविदः; T2 वाक्यज्ञो वाक्यकोविदः. —After 25, Ś1 D1–3 ins. :

309* दृष्ट्वा लक्ष्मणमागत्य स्थितामग्रे स राक्षसीम् ।

[ D1.3 आभाष्य; D2 °साद्य ( for आगत्य ). ]

Colophon. D1.2 om.( Sarga cont. ). —*Kāṇḍa name* : Ś1 Dg1 Dt1 Dm1 D6.7 T G M1.2 आरण्यकांडे; Ñ1 B2 आरण्यककांडे; Ñ2 V B1 D3.5 आरण्यके. —*Sarga name* : Ś1 Ñ V B D5.7 शू( Ñ1 V B3 सू )र्पण( Ś1 °न )खादर्शनं; D3 सूर्पणखीदर्शनं.—*Sarga no.* ( figures, words or both ) : Ś1 Ñ1 V2 B1 om.; Ñ2 B3 D7 23; V1 22; B2.4 24; Dg1 Dt1 Dm1 D4.6.8 T G M1 17; D3 26; D5 13; M2.3 18. G concludes with श्रीरामाय नमः.

# १७

तां तु शूर्पणखां रामः कामपाशावपाशिताम् ।
स्वेच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत् ॥ १
कृतदारोऽस्मि भवति भार्येयं दयिता मम ।
त्वद्विधानां तु नारीणां सुदुःखा ससपत्नता ॥ २
अनुजस्त्वेष मे भ्राता शीलवान्प्रियदर्शनः ।
श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ३
अपूर्वी भार्यया चार्थी तरुणः प्रियदर्शनः ।
अनुरूपश्च ते भर्ता रूपस्यास्य भविष्यति ॥ ४
एनं भज विशालाक्षि भर्तारं भ्रातरं मम ।
असपत्ना वरारोहे मेरुमर्कप्रभा यथा ॥ ५
इति रामेण सा प्रोक्ता राक्षसी काममोहिता ।
विसृज्य रामं सहसा ततो लक्ष्मणमब्रवीत् ॥ ६
अस्य रूपस्य ते युक्ता भार्याहं वरवर्णिनी ।
मया सह सुखं सर्वान्दण्डकान्विचरिष्यसि ॥ ७
एवमुक्तस्तु सौमित्री राक्षस्या वाक्यकोविदः ।
ततः शूर्पणखीं स्मित्वा लक्ष्मणो युक्तमब्रवीत् ॥ ८

G. 3. 24. 8
B. 3. 18. 8
L. 3. 23. 8

## 17

D1.2 continue the previous Sarga. D8 begins with ॐ; M1 with श्रीरामाय नमः.

1 $^{a}$) D2 reads तु in marg. Ś1 तां च; Dg1 D3.4 T1.2 G2 Cg.k ततः (for तां तु). Ś1 D4 T2.3 शूर्पनखीं; Ñ1 Dm1 D2.3 सूर्पणखीं; V1 D8 शूर्पनखां; Dg1 D1 सूर्पनखां; T1 G1.3 M शूर्पणखीं. Ñ2 V B D5.7 दृष्ट्वा; D2 नाम (for रामः). —$^{b}$) Ś1 Ñ1 D1-3 M2 कामबाण(M2 °पाश)बलार्दितां; Ñ2 V B D5.7 रामः कामबला(B1.3 °शरा)र्दितां; G1 कामपाशवशं गतां. —$^{c}$) Dg1 T1 G1 Cg स्वच्छया; D1 स इदं; Cv.m$p$ as in text (for स्वेच्छया). Ś1 Ñ V B D2.3.5.7 श्लक्ष्णया युक्त(Ś1 Ñ1 D2.3 स्वस्थ; B3 मुग्ध)या वाचा; M2 हृद्यया व्यक्तया वाचा. —$^{d}$) Ñ2 V B D5.7 अभाषत (for अथाब्रवीत्). ❀ Ct: स्वेच्छया इति पाठे परिहासविनोदेनेत्यर्थः। अत एव स्मितपूर्वमिति तीर्थः। स्वच्छंदां इति पाठो युक्तः। स्वेच्छाचारिणीमित्यर्थः. ❀

2 $^{a}$) T3 कृतकार्यो (for °दारो). Ñ1 [ऽ]हं (sic) (for ऽस्मि). D1 भद्रं ते (for भवति). —$^{c}$) Ś1 Ñ1 D1.2 च; Dg1 D3 M2 हि (for तु). —$^{d}$) M1.2 सुदुःखं (for °खा). Dm1 D8 च सपत्नता; G1.3 ससपत्निता; G2 सा सपत्नता. Ś1 Ñ1 D1-3 सु(Ś1 स्व)दुःखाय सपत्नता; Dg1 T3 सुदुःखार्हा सपत्नता. —For 2$^{cd}$, Ñ2 V B D5.7 subst.:

310* त्वद्विधा न च वै नारी सपत्नीं मर्षयेदिमाम् ।

[V2 B1 transp. न and च. Ñ2 D5.7 वै कथं; V1 वै न च (by transp.); B4 नापि वै; G(ed.) तु न वै (for न च वै). D5.7 इयं (for इमाम्).]

3 $^{a}$) D1 [ए]व (for [ए]ष). —Ś1 om. 3$^{b}$-4$^{c}$. —$^{b}$) Ñ1 D1-3 गुणवान् (for शीलवान्). —D2 reads 3$^{c}$-4$^{b}$ in marg. —$^{c}$) L(ed.) चाकृत- (for अकृत-).

4 Ś1 om. 4$^{abc}$, D2 reads 4$^{ab}$ in marg. (for both cf. v.l. 3). Ñ2 V B D5.7 transp. $^{ab}$ and $^{cd}$. —$^{a}$) Ñ2 V B D5.7 तरुणो; Dg1 D4.8 T G1.2 M1 Cm$p$ अपूर्व-; Cr नपूर्वी; Cm as in text (for अपूर्वी). V1 B3 हीनो (for चार्थी). Ñ1 D1-3 M2 अपूर्व(M2 °भूत)भार्यो भार्यार्थी. —$^{b}$) Ñ2 V B D5.7 रूपवान् (for तरुणः). D1 प्रियदर्शने. —After 4$^{ab}$, Ñ2 V B D5.7 M2(after 4) ins.:

311* किं मया ते विरूपेण कृतदारेण राक्षसि ।

[B2 [अ]तिविरूपेण; D7 ते रूपेण (subm.) (for ते वि°).]

—$^{c}$) Ñ2 V B D5.7 एषोनुरूपो भर्ता ते. ❀ Cr: अभर्तेति पदच्छेदेनान्तराशयः।; Cm: ते अभर्तेति छेदः।; Cg: अनुरूपश्च ते भर्तेत्यत्र अभर्तेति छेदेनान्तराशयः।; Ck: अनुरूपश्च ते भर्तेत्यत्रापि अभर्तेति पदच्छेदेनान्तराशयः. ❀ —$^{d}$) D4 T1 G2 च (for [अ]स्य).

5 $^{a}$) Ś1 B2 एतं; Ñ2 V1 Dg1 Dm1 D1 T3 एवं (for एनं). Cg विशालाक्षी (for °क्षि). —$^{b}$) Ś1 त्रातारं; D1 लक्ष्मणं (for भर्तारं). Ñ1 om. (hapl.?) भ्रातरं. —$^{c}$) Ś1 Ñ1 D2 असपत्नं; Ñ2 V2 B4 D5.7 °त्नी (for °त्ना). D3 असंपन्नं विशालाक्षि.

6 $^{a}$) Ś1 Ñ1 D1-3 तूक्ता (for प्रोक्ता). Ñ2 V B D5.7 इत्युक्ता साथ रामेण. —$^{b}$) Ś1 D1-3 M2 मदनार्दिता; Ñ1 मददर्पिता; Ñ2 V B D5.7 कामरूपिणी (for काममोहिता). —$^{c}$) D3 तरसा; G2 सा घोरा (for सहसा). Dm1 D8 सहसा रामं (by transp.). —$^{d}$) M2 गत्वा (for ततो).

7 M1 om. (hapl.) 7-8; D6 om. 7. —$^{a}$) D3 मे भर्ता (for ते युक्ता). —For 7$^{ab}$, Ñ2 V B D5.7 subst.:

312* तवानुरूपां रूपस्य भार्यां मां भज मानद ।

[V1 [अ]नुरूपं (for °पां). V1 मानदः.]

—$^{c}$) Ś1 Ñ1 D1.3 सुखी सर्वान्; Ñ2 V B3.4 D5.7 सुखी रम्यान्; B1.2 सुखी रम्यं; D2 सुखी सार्धं; M2 सुखं कामी (for सुखं सर्वान्). —$^{d}$) B1.2 दंडकं (for °कान्). M2 प्रचरिष्यसि. —After 7, B1 ins.:

313* वशीभूताश्च मे सर्वे ये चात्र वनचारिणः ।

8 M1 om. 8 (cf. v.l. 7). —$^{ab}$) Ś1 Dg1 राक्षस्या सौमित्रिर् (by transp.). —$^{c}$) Dg1 अतः (for ततः). Dg1

G. 3. 24. 9
B. 3. 18. 9
L. 3. 23. 9

कथं दासस्य मे दासी भार्या भवितुमिच्छसि ।
सोऽहमार्येण परवान्भ्रात्रा कमलवर्णिनी ॥ ९
समृद्धार्थस्य सिद्धार्था मुदितामलवर्णिनी ।
आर्यस्य त्वं विशालाक्षि भार्या भव यवीयसी ॥ १०
एतां विरूपामसतीं करालां निर्णतोदरीम् ।
भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति ॥ ११
को हि रूपमिदं श्रेष्ठं संत्यज्य वरवर्णिनि ।
मानुषीषु वरारोहे कुर्याद्भावं विचक्षणः ॥ १२
इति सा लक्ष्मणेनोक्ता कराला निर्णतोदरी ।
मन्यते तद्वचः सत्यं परिहासाविचक्षणा ॥ १३
सा रामं पर्णशालायामुपविष्टं परंतपम् ।
सीतया सह दुर्धर्षमब्रवीत्काममोहिता ॥ १४
इमां विरूपामसतीं करालां निर्णतोदरीम् ।
वृद्धां भार्यामवष्टभ्य न मां त्वं बहु मन्यसे ॥ १५

सूर्पनखीं; Dt1 D4.6 T3 G3 Cg.t शूर्पनखीं; D8 °नखां; G2 °णखां. M2 वाक्यं; M3( before corr. कृत्वा ) स्मृत्वा ( for स्मित्वा ). Ś1 Ñ1 D1-3 ततः सूर्पणखीं( Ś1 Ñ1 शूर्पनखीं; D1 °खां ) वाक्यं. —$^{d}$ ) Ś1 वाक्यम्; M पुनर् ( for युक्तम् ). —For 8$^{cd}$, Ñ2 V B D5.7 subst. :

314* वीक्ष्य शूर्पणखां वाक्यं ततस्तामिदमब्रवीत् ।

[ V सूर्पणखां. B1 श्रुत्वा ( for ततस् ). ]

9 $^{a}$ ) D6 मम ( hypm. ) ( for मे ). Ś1 Ñ V B D1-3.5.7 M2 दासी त्वं ( for मे दासी ). —$^{b}$ ) Ś1 Ñ V B Dm1 D1-3.5.7.8 G3 अर्हसि ( for इच्छसि ). —$^{c}$ ) Ñ V B D1-3.5.7 योहम्. Ś1 एवमुक्तस्तु राक्षस्या ( cf. 8$^{a}$ ). —$^{d}$ ) D6 भ्राता ( for भ्रात्रा ). Dm1 D8 G2.3 M3 -वर्णिनि ( for °नी ). Ś1 Ñ1 D1-3 भ्रात्रा( Ś1 D1 °ता ) कनकवर्णिनि( D2 °नी ); Ñ2 V B D5.7 भ्रात्रा ज्येष्ठेन भाविनी( V D5.7 °नि ). ❀ Cg : अकमलवर्णिनीत्यपि छेदः. ❀ —After 9, G3 ins. :

315* दासोऽहं राघवेन्द्रस्य ज्येष्ठस्य मम भामिनी ।

10 M3 om. ( hapl. ) 10$^{ab}$. Dg1 reads 10 in marg. —$^{a}$ ) B2 सिध्यर्था ( for सिद्धा° ). M2 सुसमिद्धासि सिद्धार्था. —$^{b}$ ) Dm1 D8 G1.3 वर- ( for [ अ ]मल- ). Ś1 Ñ1 D1-3 M1.2 शुचि( D1.3 °दि; M1.2 सुदि )ता कामरूपिणी; Ñ2 V B D5.7 विदुषः कामचारि( V2 °रूपि; B4 °तारि )णी. —$^{c}$ ) Ñ2 V B D5.7 [ ए ]व; D3 तु ( for त्वं ). —$^{d}$ ) Ś1 Ñ1 D1.3 भार्या भवितुमर्हसि.

11 M1 om. 11-12. —$^{a}$ ) Dm1 D8 T1.2 G1 M2.3 Cg.k एनां; D3 एवं; D4 वरां ( for एतां ). B1 अरूपाम् ( for वि° ). D1 वृद्धां च ( for असतीं ). —$^{b}$ ) Ś1 marg.; D3.6 करालीं ( for °लां ). Ś1( *sup. lin.* also निम्नतो° as in D1 ) निर्दितो°; V1 B2 निह्नतो°; B1( after corr. as in text ) D3 G1.3 निर्णितो°; D1.2 निम्नतो°; D5.7 विनतो°; M2 ( after corr. *inf. lin. sec. m.* as in text ) निर्मितो° ( for निर्णतो° ). ❀ Cr : निर्णीतं निरतिशयनिम्नमुदरं यस्याः सा. ❀ —D2 reads from परित्यज्य in $^{c}$ up to 15$^{b}$ in marg. —$^{c}$ ) D1 शीघ्रं ( for वृद्धां ). G2 M2 transp. भार्यां and वृद्धां. —$^{d}$ ) Ñ2 V B D5.7 [ आ ]र्यो ( for [ ए ]ष ). Ñ2 D6 भविष्यति; G2 भरि° ( for भजि° ).

12 M1 om.; D2 reads in marg. 12 ( for both, cf. v.l. 11 ). —$^{a}$ ) Ñ2 V B1.2.4( marg. also ) D5.7 त्यक्त्वा; B3.4 Dm1 D8 G3 दृष्ट्वा ( for श्रेष्ठं ). —$^{b}$ ) Dt1 T1.2 G M2 -वर्णिनी ( for °नि ). Ñ2 V B D5.7 दिव्यं तव विलासिनि( B1.2 °नी ). —$^{c}$ ) Ś1 Ñ1 Dg1 Dm1 D8 मानुषेषु; B1 °षीह; D7 °षीव ( for °षीषु ). —$^{d}$ ) Ś1 Ñ V B D1-3.5.7 भावं कुर्याद् ( by transp. ); D8 रतिं कुर्याद् ( for कुर्याद्भावं ).

13 D2 reads 13 in marg. ( cf. v.l. 11 ). —$^{a}$ ) M1 इत्येवं. —$^{b}$ ) Dt1 Dm1 D8 कराली. Ś1 D2 निम्नतोदरी; Ñ2 D5.7 विनतो°; V1 B2 निह्नतो°; D3 G1.3 निर्णितो°; D7 °तोदरा; M2( after corr. *inf. lin. sec. m.* as in text ) निर्मितो° ( for निर्णतोदरी ). —M1 om. 13$^{cd}$. —$^{c}$ ) Dg1 D4.8 T1.2 G1.2 M2.3 तथ्यं; Dm1 G3 पथ्यं ( for सत्यं ). Ś1 Ñ1 D1-3 राक्षसी तद्वचः श्रुत्वा; Ñ2 V B D5.7 मेने सा( V B2.3 च; B1.4 [ s ]थ ) सत्यमेवेति. —$^{d}$ ) Ś1 Ñ1 D1-3 परिहासविचक्षणा; Ñ2 V B D5.7 M2 परिहासमदक्षिणा.

14 D2 reads 14 in marg. ( cf. v.l. 11 ). —$^{a}$ ) Ś1 Ñ1 D1-3 रामं तु ( for सा रामं ). —$^{b}$ ) Ś1 Ñ1 D1-3 महाबलं ( for परंतपम् ). —For 14$^{ab}$, Ñ2 V B D5.7 M2 subst. :

316* ततः सा राघवं भूयः समुपेत्य महाद्युतिम् ।

[ Ñ2 V B1-3 समुत्पत्य ( for °पेत्य ). ]

—$^{c}$ ) Ś1 Ñ1 D1-3 ससीतं तं( D1 सु ) दुराधर्षं. —$^{d}$ ) Ś1 Ñ1 D1-3 अवदत् ( for अब्रवीत् ). V2 अब्रवीत्पूर्वदर्शना; B3 इदं वचनमब्रवीत्. —After 14, Ñ2 V B D5.7 ins. :

317* अहं त्वदभिकामा च राम त्वत्पूर्वदर्शना ।
चिराय भव मे भर्ता सीतया किं तवानया ।

[ ( l. 1 ) B1 -दर्शनात्; D5 -दर्शनं ( for -दर्शना ). —( l. 2 ) V1 मे भव ( by transp. ). B1 [ अ ]नघ ( for °नया ). ]

15 D2 reads 15$^{ab}$ in marg. ( cf. v.l. 11 ). Ś1 om. 15$^{ab}$. —$^{a}$ ) D2 एतां; K( ed. ) Cm एनां ( for इमां ). Dg1 अरूपाम्; M2 अनार्याम्; M3 करालाम् ( for विरू° ). —$^{b}$ ) Dm1 D8 करालीं; M3 विरूपां ( for करालां ). B2.3( *sup. lin.* also as in text ) निह्नतो°; D1.2 निम्नतो°; D3 G1.3 निर्णितो°; D5.7 विनतो°; M2 ( after corr. as in text ) निर्मितो°; G( ed. ) निःसृतो° ( for निर्णतोदरीम् ). 15$^{ab}$ = 11$^{ab}$ with v.l. इमां for एतां. —$^{c}$ ) Ś1 Ñ1 D1.2( m. ).3 T3 G1 भार्यां वृद्धाम् ( by transp. ). Ñ1 T3 परित्यज्य ( for

अथेमां भक्षयिष्यामि पश्यतस्तव मानुषीम् ।
त्वया सह चरिष्यामि निःसपत्ना यथासुखम् ॥ १६
इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा ।
अभ्यधावत्सुसंक्रुद्धा महोल्का रोहिणीमिव ॥ १७
तां मृत्युपाशप्रतिमामापतन्तीं महाबलः ।
निगृह्य रामः कुपितस्ततो लक्ष्मणमब्रवीत् ॥ १८
क्रूरैरनार्यैः सौमित्रे परिहासः कथंचन ।
न कार्यः पश्य वैदेहीं कथंचित्सौम्य जीवतीम् ॥ १९
इमां विरूपामसतीमतिमत्तां महोदरीम् ।
राक्षसीं पुरुषव्याघ्र विरूपयितुमर्हसि ॥ २०
इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो रामस्य पश्यतः ।
उद्धृत्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ २१
निकृत्तकर्णनासा तु विस्वरं सा विनद्य च ।
यथागतं प्रदुद्राव घोरा शूर्पणखा वनम् ॥ २२

G. 3. 24. 23
B. 3. 18. 22
L. 3. 23. 22

---

अवष्टभ्य ). —d ) Ś1 Ñ1 Dg1 Dm1 D1-3.8 G3 मां त्वं न ( by transp. ); Ñ2 V2 B D7 M त्वं मां न ( by transp. ); V1 त्वं किं मां न ( hypm. ); D4 T G1 मां न त्वं ( by transp. ) ( for न मां त्वं ). D5 त्वं मां बहु न मन्यसे.

16 a ) Ñ1 [ अ ]हं; M1 [ ए ]नां ( for [ इ ]मां ). Ś1 D1-3 भक्षयित्वा( Ś1 °ष्ये )हं ( for °ष्यामि ). —b ) Ś1 D2 प्रेक्षतस् ( for पश्यतस् ). Ñ1 D1.3 प्रेक्षतस्ते ह( D3 हि ) मानुषीं; Ñ2 V B D5.7 पश्यतस्तेति( V B1-3 °मि )मानिनः( V1 °नतः ). —c ) Ñ1 रमिष्यामि ( for चरि° ). Ñ2 V B D5.7 ततस्त्वया रमिष्येहं( B1 °ष्यामि ). —d ) Ś1 Ñ2 D2.5 निःसपत्नी ( for °त्ना ).

17 a ) Ñ1 [ अं ]बुजपत्राक्षीम् ( for मृगशावा° ). —b ) B3 ( m. also ).4 सालात- ( for अलात- ). —c ) Dg1 Dt1 D6 T3 अभ्यगच्छत् ; M2 °द्रवत् ( for अभ्यधावत् ). D4 सुसंवृद्धा ( for °क्रुद्धा ). Ś1 Ñ2 V B D1.2.5.7 अभ्यधावत वैदेहीं ( Ś1 D1.2 संक्रुद्धा ). —d ) V1 transp. रोहिणीम् and इव.

18 a ) D6 om.; M2 *sec. m.* for तां. —b ) Ñ2 V B1.3.4 D5.7 महाबलां; B2 अवेक्ष्य सा ( sic ) ( for महाबलः ). —After 18ab, B2 ( om. l. 1 ) ins.; while B4 ins. after 18 :

318* तां मृत्युपाशप्रतिमामापतन्तीमवेक्ष्य सा ।
प्रावेपत भयात्सीता प्रवाते कदली यथा ।
ततस्तां विकृतां रामो हन्तुं सीतामुपागताम् ।

[ For l. 2, cf. 3.2.14cd. ]

—c ) Ñ2 V1 B1.3.4 D5.7 निवार्य; D1 विगृह्य ( for निगृह्य ). Ñ1 परितस् ; Ñ2 V B3.4 ( m. also as in text ) D5.7 कुपितां; G1 सहसा ( for कुपितस् ). —For 18cd, B2 subst., while B4 cont. after 318* :

319* बलान्निगृह्य करयोर्लक्ष्मणं वाक्यमब्रवीत् ।

—Then B2 cont. :

320* इमां पश्य महाबाहो राक्षसीं विकृताननाम् ।
सीतां हन्तुं व्यवसितां परिहासाविचक्षणाम् ।

19 a ) Ñ2 V प्रहृष्टैः; B D5.7 प्र( B1 सु )दुष्टैः ( for अनार्यैः ). —b ) Ś1 Ñ V B D1.3.5.7 संप्रहासः; D2 सप्रसंगः ( for परिहासः ). —c ) Dg1 marg.; D5 om. for न. Ś1 Ñ1 V B D2.3 जीवति ( for °तीम् ). —After 19, B2 ins.:

321* कृतपापापि न स्त्रीत्वाद्वधमर्हसि लक्ष्मण ।

20 a ) Ś1 D2 विरुद्धां ( for विरूपाम् ). Ś1 Ñ V B D1-3.5 M2 दुर्वृत्ताम् ( for असतीम् ). —b ) Ñ V B D1.2.5.7 G1 अतिवृद्धां( Ñ1 °त्तां ); D3 °मात्र-; G3 M1 पृथुमध्यां ( for अतिमत्तां ). Ś1 महोदरीं भयानकां. —d ) Ś1 Ñ2 V B D1.2.5.7 निवर्तयितुम् ; D3 नासाकर्तनम् ( for विरूपयितुम् ).

21 a ) Ś1 Ñ V B D1-3.5.7 क्रुद्धस् ( for तस्याः ). —b ) Ś1 Ñ V1 D1-3 ततो; V2 B D5.7 तस्य ( for क्रुद्धो ). D4 T2 Ck पार्श्वतः; T1 वाक्यतः ( for पश्यतः ). —c ) Ś1 Ñ1 D1.2 विकृष्य; D3 निःकृष्य ( for उद्धृत्य ). —d ) Ś1 Ñ1 Dt1 Dm1 D2.6 T1 Ck.t कर्णनासे; D1.3 G1 M3 °सां; G2.3 M2 °सौ; Cm.g as in text ( for °सं ). —For 21cd, Ñ2 V B D5.7 subst. :

322* खड्गेन तस्याश्चिच्छेद कर्णनासं निगृह्य ताम् ।

[ B1.3 -नासां ( for -नासं ). ]

—After 21, M2 ins. :

323* प्रगृह्य बलवत्पीड्य केशेष्वाकृष्य पातयत् ।
पादेनाक्रम्याग्रवासां पश्पुरन्तं रुषापिता ( sic ) ।

22 a ) V G2 विकृत्त-; D2 निवृत्त-; D8 निकृंत-; G1 विच्छिन्न- ( for निकृत्त- ). Ñ2 D5 हि; D7 [ आ ]दि ( for तु ). Ś1 निकृत्य कर्णनासां तु; M2 निकृत्य * * * साभ्यां ( lacuna ). —b ) D3 विस्वरे ( for °रं ). Ñ1 M2 तु ( for सा ). Ś1 Ñ1 Dm1 D1-3 वै ( for च ). Ñ2 V B D5.7 विस्वरं प्रति( B2.3 °त्रि )नद्य सा. —cd ) Ś1 Ñ1 D2 विदुद्राव; Ñ2 V B D5.7 जगामाशु; D1 तु दुद्राव ( for प्रदुद्राव ). Ś1 T1.2 G1 M3 शूर्पण( Ś1 T2 °न )खी; Dg1 सूर्पनखी; Dm1 शूर्पनखी ( marg. also °णखी ); D8 T3 शूर्पनखा. Dg1 marg.; D6 वने ( for वनम् ). Ñ1 V1 D1-3 घोरं सूर्पणखी( V1 D3 °खा; D1 °नखा ) वनं ( V1 ततः ) ( for d ). M2 भूयोपि क्रोशमाना सा जगाम भ्रातरं प्रति.

G. 3. 24. 25
B. 3. 18. 23
L. 3. 23. 23

सा विरूपा महाघोरा राक्षसी शोणितोक्षिता ।
ननाद विविधान्नादान्यथा प्रावृषि तोयदः ॥ २३
सा विक्षरन्ती रुधिरं बहुधा घोरदर्शना ।
प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम् ॥ २४
ततस्तु सा राक्षससंघसंवृतं
खरं जनस्थानगतं विरूपिता ।
उपेत्य तं भ्रातरमुग्रतेजसं
पपात भूमौ गगनाद्यथाशनिः ॥ २५
ततः सभार्यं भयमोहमूर्छिता
सलक्ष्मणं राघवमागतं वनम् ।
विरूपणं चात्मनि शोणितोक्षिता
शशंस सर्वं भगिनी खरस्य सा ॥ २६

इति श्रीरामायणे अरण्यकाण्डे सप्तदशः सर्गः ॥ १७ ॥

---

**23** Dt1 om. $23^{ab}$. Ñ2 V B D5.7 transp. $23^{ab}$ and $24^{ab}$. —$^{a}$) D1 या (for सा). Dm1 D8 G3 महानादा (for °घोरा). —$^{b}$) Ñ1 D1–3 बहुधा (D3 ददृशे) रुधिरोक्षिता; Ñ2 D5.7 राक्षसी भीमदर्शना; V B राक्षसी भीम (V1 घोर) निस्वना. —For $23^{ab}$, Ś1 subst., while D1–3 ins. after $23^{ab}$:

324* सा विरूपा प्रकृत्यैव वैरूप्यं चागता परम् ।

[Ś1 गता (for [आ]गता).]

—$^{c}$) G2 सुमहान् (for विविधान्). —$^{d}$) D1 जलक्लिन्नेव दुंदुभिः.

**24** M2 om. $24^{ab}$. Ñ2 V B D5.7 transp. $23^{ab}$ and $24^{ab}$. —$^{a}$) Ñ2 V B2–4 D5.7 विक्षिपंती; B1 च क्षरंती (for विक्षरन्ती). Ñ1 विविधं (for रुधिरं). Ś1 D2 सासृक्सरंती विविधं. —$^{b}$) Ś1 Ñ V2 B D1–3.5.7 रुधिरोक्षिता; V1 शोणितोक्षिता; Dg1 °नं (for घोरदर्शना). —$^{c}$) Ś1 V1 D1 बाहुं. Ś1 D2.5 तर्जंती (for गर्ज°). —$^{d}$) Ś1 Dg1 D2 M2 महद्वनं (for महा°). —After 24, M2 ins.:

325* नानातरुसमाकीर्णं लतागहनसंकुलम् ।

**25** $^{a}$) Ś1 D2 च सा; Dg1 तु तं; G3 तदा; M2 तु तद्- (for तु सा). Ś1 D1–3 -सेविते वने; Ñ1 -राजसेविते; Ñ2 V2 B2.4 D5.7 -संघ (D7 **) संकटं; Dg1 Dm1 D8 -संघवृत्तं; Dt1 -संवृतं खरं; G1 °सेवितं (for -संघसंवृतं). —$^{b}$) Ś1 marg.; D3 -गतिं (for -गतं). Ś1 D2 विरूपा (for °पिता). Ñ1 खरं जगामाथ विरूपितासती. —$^{c}$) B1 उत्पत्य. Ś1 Ñ V B D1–3.5.7 वै (for तं). Dg1 Dm1 D4.8 T G M1.3 उग्र (M3 अभ्र) दर्शनं (for °तेजसं). —$^{d}$) Ñ2 V B D5.7 इव (for यथा).

**26** B3 reads 26 in marg. —$^{a}$) D1 सभायां (for सभार्यं). Ś1 -पीडितं; Ñ1 D1–3 -पीडिता (for -मूर्छिता). —$^{b}$) D7 वने (for वनम्). —$^{c}$) Ś1 विरूपणाम्; Ñ2 B1 D1.3.5.7 विरूपितं; V2 °पिणं; B3 °पताम् (for °पणं). Ś1 B3 आत्मनि (for चात्मनि). —Dt1 om. $26^{d}$. —$^{d}$) B3 खराय (for खरस्य). D3 om. for सा.

Colophon. —*Sarga name*: Ś1 Ñ2 V1 B1 D1.3.5 शूर्पणखा (Ś1 °नखी; V1 D1 सूर्प°; D3 सूर्पणखी) विरूपकरणं; Ñ1 V2 B2–4 शूर्पणखा (Ñ1 सूर्पणखी; V2 सूर्प°) विरूपणं; D2 सूर्पणखीविरूपकरणः; D7 सूर्पणखाविरूपीकरणं. —*Sarga no.* (figures, words or both): Ś1 Ñ1 B1.4 D2 om.; Ñ2 V2 B3 D7 24; V1 23; B2 25; Dg1 Dt1 Dm1 D4.6.8 T G M1 18; D1 22; D3 27; D5 14; M2.3 19. —After colophon, G concludes with श्रीरामाय नमः.

# १८

तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षिताम् ।
भगिनीं क्रोधसंतप्तः खरः पप्रच्छ राक्षसः ॥ १
बलविक्रमसम्पन्ना कामगा कामरूपिणी ।
इमामवस्थां नीता त्वं केनान्तकसमा गता ॥ २
देवगन्धर्वभूतानामृषीणां च महात्मनाम् ।
कोऽयमेवं महावीर्यस्त्वां विरूपां चकार ह ॥ ३
न हि पश्याम्यहं लोके यः कुर्यान्मम विप्रियम् ।
अन्तरेण सहस्राक्षं महेन्द्रं पाकशासनम् ॥ ४
अद्याहं मार्गणैः प्राणानादास्ये जीवितान्तकैः ।
सलिले क्षीरमासक्तं निष्पिबन्निव सारसः ॥ ५
निहतस्य मया संख्ये शरसंकृत्तमर्मणः ।
सफेनं रुधिरं रक्तं मेदिनी कस्य पास्यति ॥ ६
कस्य पत्ररथाः कायान्मांसमुत्कृत्य संगताः ।
प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे ॥ ७

G. 3. 25. 7
B. 3. 19. 10
L. 3. 24. 7

## 18

D8 begins with ॐ; M1 with श्रीरामाय नमः.

1 $^{a}$) Ś1 दृष्ट्वा; Dg1 G M1.3 तदा (for तथा). Dg1 पततीं (for पतितां). Ś1 तद्वद् (for दृष्ट्वा).—$^{c}$) Dg1 अंतिकां (for भगिनीं). Ś1 क्रोधसंपन्नां; Ñ1 D1.2 °संतप्तां; V B D6.7 M2 °ताम्राक्षः; D3 °संरक्तां; G1 °संरब्धः (for °संतप्तः).—After 1, Dg1 Dt1 D4.6 T1.2 G M ins.; while Dm1 D8 T3 ins. l. 1 and 6 after 1, and l. 2–5 after $3^{ab}$ :

326* उत्तिष्ठ तावदाख्याहि प्रमोहं जहि संभ्रमम् ।
व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपिता ।
कः कृष्णसर्पमासीनमाशीविषमनागसम् ।
तुदत्यभिसमापन्नमङ्गुल्यग्रेण लीलया ।
कालपाशं समासज्य कण्ठे मोहान्न बुध्यते । [5]
यस्त्वामद्य समासाद्य पीतवान्विषमुत्तमम् ।

[ (l. 1) M2 मुहूर्तं (for प्रमोहं).—(l. 2) Dm1 G1 एवं रूप- (for एवंरूपा).—(l. 4) M3 तदाति (sic) (for तुदति). G1.3 M3 [अ]भिसमासीनम्; M1.2 [अ]भिसमासन्नम् (for [अ]भिसमापन्नम्).—G2 om. from the post. half up to केना in $2^{d}$.—(l. 5) D4 आसज्य (subm.) (for समासज्य). Dg1 T1.3 G1.3 M Cm.g कः कालपाशमासज्य (for the prior half). M3 तु (for न). D6 वध्यते; T3 G1 जायते; Cm*p* जानते (for बुध्यते).]

2 G2 om. up to केना in $^{d}$ (cf. v.l. 326*).—$^{a}$) D2 -संपन्नां (for -सम्पन्ना).—$^{b}$) D2 कामगां (for कामगा). Ñ2 V B D7 यथाकामविचा(B3 [marg. also] °हा)रिणी.—$^{c}$) Ñ2 V B D5.7 [अ]सि (for त्वं).—$^{d}$) G3 M2.3 [अं]तिकसमा (for [अ]न्तकसमा). Ś1 Ñ V B2–4 D1–3.5.7 युधि; B1 भुवि; Dg1 -गतां; Cv*p* मता (for गता).

3 $^{a}$) Ñ2 D5.7 -सिद्धानां (for -भूतानाम्).—$^{b}$) Ñ2 V B D5.7 मुनीनां (for ऋषीणां). Ñ2 D5.7 भावितात्मनां (for च महा°).—After $3^{ab}$, Dm1 D8 T3 ins. l. 2–5 of 326*.—$^{c}$) Dg1 D5 G2 एव (for एवं). B2 महासत्त्वां; Dm1 D8 G3 मम त्वां(G3 त्वं) हि; D4 T1.2 विरूपां त्वां (for महावीर्यस्).—$^{d}$) B2 Dm1 D8 G3 विरूपां च(B2 हि); D4 T1.2 महावीर्यश् (for त्वां विरूपां). Ñ V B D3.5.7 यः; D1 सः (for ह).

4 Dg1 reads $4^{ab}$ in marg.—$^{a}$) Ś1 Ñ V B D1–3.5.7 तं (for [अ]हं).—$^{b}$) Dg1 कः (for यः). Ś1 Ñ V B1–3 (marg. also ईदृशां तव).4 D1–3.5.7 अप्रियं मम (for मम विप्रियम्).—$^{cd}$) Dg1 Dt1 Dm1 D6.8 T3 G2 M1 Cm अमरेषु; Cm*p* as in text (for अन्तरेण). ❀ Ct : क्वचित्तु अंतरेण सहस्राक्षमित्येव पाठः. ❀ B2 पाकनाशनं (for पाकशासनम्). M2 ऋते देवात्सहस्राक्षान्महेंद्रात्पाकशासनात्.

5 $^{a}$) Ś1 Ñ1 V D1–3 तस्य; Ñ2 B D5.7 कस्य (for अद्य). D7 प्राणैः (for प्राणान्).—$^{b}$) Ñ2 D5.7 नाशये; G1 आसाद्ये (sic) (for आदास्ये). Ś1 जीवितं शनैः; Dt1 D6 T1.2 G2 M2.3 Ct जीवितांतगैः (for °न्तकैः).—$^{c}$) D1 सलिलैः.—$^{d}$) Ś1 D2 निष्पिबेत्; M1 निष्पन्नम् (for निष्पिबन्). Ś1 Ñ1 D1–3 सारसो यथा; G2 इव सागरः (sic) (for इव सारसः).—For $5^{cd}$, Ñ2 V B D5.7 subst.; M2 cont. after l. 1 of 328* :

327* सरसः सलिलं स्तोकमादित्यो रश्मिभिर्यथा ।

[Ñ2 D5.7 सरसां; B2 सबलः (for सरसः).]

6 $^{a}$) D4 मया सज्ये (sic); D7 G3 M1.3 मया सखे (sic); M2 महासखे (sic) (for मया संख्ये).—$^{b}$) V1 B2.3 शरेणाकृत्त-; D1 शरसंक्रांत-; D4 शरसंवृत्त- (for शरसंकृत्त-). Ś1(also -चर्मणः) -शर्मणः; Ñ2 V2 B1.4 D1.3.5.7 M2 -वर्मणः; V1 -कर्मणा (for -मर्मणः).—$^{c}$) Ś1 अद्येह; D2 अद्येयं (for सफेनं). Ś1 Ñ1 D1–3 तप्तं; Ñ2 V B D5.7 M2 भूरि; Dt1 D6 कस्य; M3 स्निग्धं (for रक्तं).—$^{d}$) Dt1 D6 पातुमिच्छति; D2 T3 तस्य पास्यति; D7 lacuna (for कस्य पास्यति).—After 6, M2 ins.:

328* कस्याहं समरे जीवमासाद्ये शरवृष्टिभिः ।
कः शिरस्यग्निमाधाय विश्वस्तः स्वपते सुखम् ।

[After l. 1, M2 cont. 327*.]

7 $^{a}$) G1 गृध्रा (for कायान्).—$^{b}$) Ś1 Ñ1 D1.3 मांसानि; D3 मांसान् (for मांसम्). V1 B2–4 Dg1 D4 T2 G2 M3

G. 3. 25. 9
B. 3. 19. 11
L. 3. 24. 11

तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः ।
मयापकृष्टं कृपणं शक्तास्त्रातुं महाहवे ॥ ८
उपलभ्य शनैः संज्ञां तं मे शंसितुमर्हसि ।
येन त्वं दुर्विनीतेन वने विक्रम्य निर्जिता ॥ ९
इति भ्रातुर्वचः श्रुत्वा क्रुद्धस्य च विशेषतः ।
ततः शूर्पणखा वाक्यं सबाष्पमिदमब्रवीत् ॥ १०
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ ११
गन्धर्वराजप्रतिमौ पार्थिवव्यञ्जनान्वितौ ।
देवौ वा मानुषौ वा तौ न तर्कयितुमुत्सहे ॥ १२
तरुणी रूपसम्पन्ना सर्वाभरणभूषिता ।
दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा ॥ १३
ताभ्यामुभाभ्यां संभूय प्रमदामधिकृत्य ताम् ।
इमामवस्थां नीताहं यथानाथासती तथा ॥ १४

---

उद्धृत्य ( for उत्कृत्य ). Ś1 Ñ1 D1.3 सत्वराः; Ñ2 V B D5.7 संगतं; D2 सत्वरं; G1 संगतां ( sic ) ( for संगताः ).—[c] ) D4 प्रहष्टो ( sic ); D8 प्रविष्टा ( for प्रहृष्टा ). D2 संप्रहृष्टा भविष्यंति. —[d] ) Ś1 Ñ V B D2.3.5.7 युधि; D1 मृधे ( for रणे ).

8 [a] ) Ś1 Ñ1 D2 तत्र; D7 तेन ( for तं न ). Dm1 न देवा न च गंधर्वा.—[b] ) Ñ2 V B D5.7 दानवाः ( for राक्षसाः ). Dt1 D8 पिशाचा न च राक्षसाः.—[c] ) Ś1 Ñ V B D1–3.5.7 M2 [ उ ]पसृष्टं( Ś1 °ष्टे; M2 °ष्टः ); Dm1 D6.8 T2 [ अ ]प्रकृष्टं; D4 [ अ ]वकृष्टं ( for [ अ ]पकृष्टं ).—[d] ) M3 शक्ता स्थातुं ( for शक्तास्त्रातुं ). Ś1 Ñ1 V2 D2.3 महामृधे; D1 अथा युधि; D4.6 आहवे(subm.); D5 G1.3 इहाहवे ( for महाहवे ). Dg1 T अ( Dg1 न )शक्तास्त्रातुमाहवे; G2 शक्ता रक्षितुमाहवे.

9 [a] ) Ñ1 B3 ( also ) Dm1 D8 G3 ततः ( for शनैः ). —[b] ) M2 मम ( for तं मे ).—[c] ) T3 एका; M2 केन ( for येन ).—[d] ) Ś1 Ñ1 D1–3 M2 रणे ( for वने ). D1.4 T1.2 G1.2 निष्क्रम्य; D3 विक्रम- ( for विक्रम्य ). Ñ2 V B D5.7 विरूप( Ñ2 D5.7 °वर्ण )वदना कृता.

10 [a] ) Ś1 Ñ1 B2.4 D1–3.7 भ्रातृ- ( for भ्रातुर् ).—[b] ) Ś1 D2 तु ( for च ). Ñ2 V B D5.7 क्रुद्धस्य वदतस्तथा; M1 क्रोधयुक्तं विशेषतः.—After 10[ab], Dg1 T3 ins.:

329* रावणस्य विनाशाय खरस्य च तथा सती ।
राक्षसानां विनाशाय कुलस्य स्वजनस्य च ।

—[c] ) Ś1 Dm1 D2–4 T2 G1 शूर्पणखी ( for °खा ).—[d] ) Ñ2 V B D5.7 बाष्पगद्गदमब्रवीत्.

11 [b] ) M2 महाभुजौ ( for महाबलौ ).—[c] ) M2 पुंडरीकपलाशाक्षौ. ❀ Cv : चीरकृष्णाजिनाम्बराविल्यतः परं फलमूलाशनौ दांतौ तापसौ धर्मचारिणौ । पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ । इत्येष कोशेषु भ्रंशितश्लोकश्च द्रष्टव्यः । अन्यथा व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपितेत्यादेः खरप्रश्नस्य उत्तरमेतन्न घटते. ❀ —After 11, Dg1 Dt1 Dm1 D4.6.8 T G M1.3 ins.; while M2 ins. after 12 :

330* फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ।
पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ ।

[ (l. 1) Dg1 Dm1 फलमूलाशिनौ ( for °शनौ ) and ब्रह्मचारिणौ ( for धर्म° ).—(l. 2) M2.3 [ इ ]मौ ( for [ आ ]स्तां ). T2 धर्मचारिणौ ( for रामलक्ष्मणौ ). Cv alone supports this passage after st. 11.]

—G2 cont. :

331* शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।

12 [c] ) T3 G1 M3 दानवौ ( for मानुषौ ). Ñ1 तौ वा ( by transp. ); Cr वा कौ ( for वा तौ ). Ñ2 V2 B1.3.4 D5.7 देवौ वा तौ मनुष्यौ वा; V1 B2 देवौ तौ वा मनुष्यौ वा; Dt1 D6 देवौ वा दानवावेतौ.—After 12, Ñ2 V B D5.7 ins.:

332* आत्मसंभावितौ वीरौ राजपुत्रौ मनस्विनौ ।
तापसौ च धनुष्पाणी सिंहविक्रान्तगामिनौ ।
त्वदीयं वनमाक्रम्य कृत्वा चाश्रममण्डलम् ।
तत्र तौ बलसम्पन्नौ वसतो रावणानुज ।

[ (l. 1) V आत्मानं भावितौ वीरौ; B1 पुंडरीकपलाशाक्षौ ( for the prior half ). V यशस्विनौ ( for मनस्विनौ ).—(l. 2) B3 तौ ( for च ). B2 -विक्रम- ( for -विक्रान्त- ).—(l. 3) B4 वासम् ( for वनम् ). V1 B2 आश्रित्य ( for आक्रम्य ). Ñ2 D7 हि; D5 स्व- ( for च ).—(l. 4) Ñ2 D5.7 ततस् ( for तत्र ). V वनसंपन्नौ ( for बलसम्पन्नौ ). B2 वसंतौ ( for वसतो ).]

—After 12, M2 ins. 330* and then cont. ( followed by 335* ) :

333* तयोः समीपे युवती सर्वाभरणभूषिता ।

13 [c] ) V1 B1–3 D6.7 दृष्ट्वा ( for दृष्टा ).—After 13, M2 ins. :

334* अथ ताभ्यां समाक्रम्य वैरूप्यं कृतमीदृशम् ।

—Thereafter cont. l. 1 of 336*.

14 For 14[ab], Ñ2 V B D5.7 subst.; M2 cont. after 333* :

335* तां च तौ चाहमारब्धा बलाद्भक्षयितुं वने ।

[ M2 सर्वम् ( for चाहम् ). Ñ2 आलब्धा ( for आरब्धा ). D5.7 तां तदैवाहमारब्धा ( for the prior half ). M2 तदा ( for वने ).]

—D4 om. ( hapl. ) 14[c]–16[d].—[c] ) Ś1 Ñ V B D1–3.5.7 [ अ ]स्मि ( for [ अ ]हं ).—[d] ) Ś1 Ñ V1 B D1–3.5.7 G3 यथानाथवती तथा; Dm1 G3 M1.2 यथानार्यासती तथा. —After 14, Ñ2 V B D5.7 ins.; while M2 cont. l. 1 after 334* and ins. l. 2 after 14 :

तस्याश्चानृजुवृत्तायास्तयोश्च हतयोरहम् ।
सफेनं पातुमिच्छामि रुधिरं रणमूर्धनि ॥ १५
एष मे प्रथमः कामः कृतस्तात त्वया भवेत् ।
तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे ॥ १६
इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् ।
व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् ॥ १७
मानुषौ शस्त्रसम्पन्नौ चीरकृष्णाजिनाम्बरौ ।
प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह ॥ १८
तौ हत्वा तां च दुर्वृत्तामुपावर्तितुमर्हथ ।
इयं च रुधिरं तेषां भगिनी मम पास्यति ॥ १९
मनोरथोऽयमिष्टोऽस्या भगिन्या मम राक्षसाः ।
शीघ्रं संपाद्यतां गत्वा तौ प्रमथ्य स्वतेजसा ॥ २०
इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश ।
तत्र जग्मुस्तया सार्धं घना वातेरिता यथा ॥ २१

G. 3. 25. 25
B. 3 19. 26
L. 3. 24. 22

## इति श्रीरामायणे अरण्यकाण्डे अष्टादशः सर्गः ॥ १८ ॥

---

336* क्रोशन्त्या विस्फुरन्त्याश्च बलादाक्रम्य संयुगे ।
त्वया नाथेन पश्येमां धर्षणां मम वै कृताम् ।

[ Ñ2 B4 D5.7 आकृष्य ( for आक्रम्य ). —( l. 2 ) V1 त्वयि नाथे तु; B1 त्वया रथेन ( sic ); B4( marg. also ) त्वयि नाथेपि ( for त्वया नाथेन ). ]

—Thereafter M2 cont. 337*.

**15** D4 om. 15 ( cf. v.l. 14 ). —[a] ) Ś1 तु ( for च ). Ñ1 तथाति- ( for तस्याश्च ). —[b] ) Ś1 Ñ1 D1-3 त्वया; Dm1 त्वहं ( for अहम् ). D8 हतयोरम्यहं ( sic ). —For 15[ab], Ñ2 V B D5.7 subst.; while M2 cont. after l. 2 of 336* :

337* त्वत्प्रसादात्तयोश्चैव तस्याश्चैव निशाचर ।

—[d] ) M3 हतयो ( for रुधिरं ). Ñ1 **संधिषु ( for रणमूर्धनि ).

**16** D4 om. 16 ( cf. v.l. 14 ). V2 illeg. up to वीर in [b]. —[a] ) V1 एवं ( for एष ). Ś1 D2 परमः; Ñ2 V1 B D5.7 [ऽ]भिम( B1 D5 °हि )तः ( for प्रथमः ). Dt1 om. कामः. —[b] ) Dg1 Dt1 Dm1 D6.8 T3 G3 तत्र ( for तात ). Ś1 D1 भवेत्त्वया ( by transp. ) ( for त्वया भवेत् ). Ñ1 कृतं देहतयोस्त्वया ( sic ); Ñ2 B D5.7 त्वयातीव कृ( D5.7 °या तावत्कृ )तो भवेत्; V त्वया वीर( V2 illeg. ) कृतो भवेत्; D2 कृतकामा भवेत्त्वया; D3 कृतस्तावद्भवेत्त्वया. —[c] ) Ś1 Ñ V B D1-3.5.7 M1 तयोस्तस्याश्( by transp. ). —[d] ) Ś1 Ñ1 D1-3 यत्पिबेयं चमूमुखे; Ñ2 V B D5.7 यत्पिबेयमहं युधि.

**17** [a] ) D4 इमामवस्थां ( hypm. ) ( for इति तस्यां ). Ñ2 V B D5.7 इत्युक्तः स तया( Ñ2 D5.7 °दा ) तत्र( V1 वीरश् ). —[b] ) Ñ2 V B D5.7 निशाचरान् ( for महाबलान् ). —[c] ) B1 आदिदेश. Ś1 Ñ1 D1-3 M1 ततः ( for खरः ). —After 17, M2 ins. :

338* धूम्रः शूरो हरिः केतुर्भीषणोग्रो दढो हलिः ।
मणिर्मन्दः पृथुर्माली माल्या केशी चतुर्दश ।

**18** [a] ) Ś1 B4 D2.4 T3 M1 रूपसंपन्नौ; D3 सत्त्व° ( for शस्त्र° ). —[b] ) Ñ1 ततश्चैव महाबलौ. —[c] ) D7 दंड***. —After 18, G2 ins. :

339* युष्माभिस्तौ निहन्तव्यौ तपसा तापसाविमौ ।

**19** [a] ) V1 B1 तां ( for तौ ). V1 B1 तौ ( for तां ). V1 B1 दुर्वृत्ताव् ( for दुर्वृत्ताम् ). —[b] ) Cm.g अपावर्त्तितुं ( for उपा° ). —[c] ) Ñ2 B2-4 D5.7 M2 ममेयं; V ममैषा; B1 यतो मे ( for इयं च ). Ñ2 V B Dt1 Dm1 D5-8 M2 भगिनी ( for रुधिरं ). D3 इयं कुरुधिरं तेषां. —[d] ) Dt1 Dm1 D4.6.8 रुधिरं ( for भगिनी ). Ñ2 V B D5.7 M2 पातुमिच्छति( B3 °सि ) शोणितं. ❀ Ct : मम भगिनी तेषां रुधिरं पास्यतीत्यन्वयः । अत्र रुधिरं मम पास्यतीति विपरीतार्थापत्तियुक्तवाक्येन तेषां संनिधानप्रयुक्तो बुद्धिमोहः सूचितः कविना. ❀ —After 19, M2 ins. :

340* क्षिप्रं संपाद्यतामद्य तौ हत्वा रामलक्ष्मणौ ।

**20** T2 om. 20. —[a] ) Ñ2 V B D5.7 तु ( for ऽस्या ). Ś1 मनोरथोवशिष्टोस्या. —[c] ) D4 संपद्यतां. K(ed.) तौ च ( for गत्वा ). Ñ2 B2-4 D5.7 क्षिप्रं संपाद्यतामद्य; V क्षिप्रं संपा( V2 °प )द्यतामेष; B1 क्षिप्रं प्रसाध्यतामद्य. —[d] ) D3 तं ( for तौ ). Ś1 प्रमाथ्य ( for प्रमथ्य ). Ñ1 वधं च मम नु तेजसा ( sic ); Ñ2 V B D5.7 प्रमथ्य( V °थ्या ) स्वेन तेजसा. —After 20, Ś1 Ñ V B Dt1 D1-3.5-7 G1 M ins. :

341* युष्माभिर्निहतौ दृष्ट्वा तावुभौ भ्रातरौ रणे ।
इयं प्रीता च तुष्टा च युधि पास्यति शोणितम् ।

[ ( l. 1 ) Dt1 om. भ्रातरौ. —( l. 2 ) Ñ1 च हृष्टा पीता ( for प्रीता च तुष्टा ). D3 M2 इयं प्रीता प्रहृष्टा च ( for the prior half ). Ś1 Ñ1 D1-3 क्षतजं युधि पास्यति ( for the post. half ). Dt1 D6 G1 M1.3 इयं प्रहृष्टा( G1 M3 प्रीता च ) मुदिता रुधिरं युधि पास्यति. ]

**21** [b] ) Ś1 Ñ2 V B D1-3.5.7 शूलपाणयः ( for ते चतुर्दश ). —[c] ) Ś1 Ñ V1 B1.3.4 D1-3.5 [आ]जग्मुस् ( for जग्मुस् ). G1 तथा ( for तया ). —[d] ) Ñ2 B1-3 D5.7 Cm.t मेघाः; Dt1 D6 घन- ( for घना ). Ñ V B1.2.4 Dt1 D1.3.5-7 इव ( for यथा ). Ś1 D2 राघवौ यत्र तिष्ठतः. —After 21, Ñ2 V B D5.7 ins. :

## १९

G. 3. 26. 1
B. 3. 20. 1
L. 3. 25. 1

ततः शूर्पणखा घोरा राघवाश्रममागता ।
रक्षसामाचचक्षे तौ भ्रातरौ सह सीतया ॥ १
ते रामं पर्णशालायामुपविष्टं महाबलम् ।
ददृशुः सीतया सार्धं वैदेह्या लक्ष्मणेन च ॥ २
तान्दृष्ट्वा राघवः श्रीमानागतां तां च राक्षसीम् ।
अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ ३
मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः ।
इमानस्या वधिष्यामि पदवीमागतानिह ॥ ४
वाक्यमेतत्ततः श्रुत्वा रामस्य विदितात्मनः ।
तथेति लक्ष्मणो वाक्यं रामस्य प्रत्यपूजयत् ॥ ५

342* ततो ययुस्ते परमप्रहारिणः
प्रकम्पयन्तः पृथिवीं सकाननाम् ।
खराशया रामरणावमर्दने
कृतोद्यमा दैत्यवरा इवाहवे ।

[ (l. 1) V प्रतस्थुः (for ययुस्ते). —(l. 2) Ñ2 D5.7 संकंपयंतः पृथिवीं ससागरां. —(l. 3) Ñ2 D5.7 रामबलाभिमर्दने; B3.4 रामबलावमर्दने (for रामरणावमर्दने). —(l. 4) Ñ2 D5.7 धृतव्रता (for कृतोद्यमा). ];
while D3 ins. after 21 :

343* ते रामं पर्णशालायामुपविष्टं परंतपम् ।
ददृशुः सीतया सार्धं तत्क्षणेन तथैव च ।

[ Cf. 3.19.2. ]

—D3 cont.; Ś1 Ñ1 Dg1 Dm1 D1.2.4.8 T1.2 G M2.3 ins. after 21 :

344* ततस्तु ते तं समुदग्रतेजसं
तथा सुतीक्ष्णप्रहराश्च राक्षसाः ।
न शेकुरेनं सहसा प्रमर्दितुं
वने द्विपा दीप्तमिवाग्निमुत्थितम् ।

[ (l. 1) Ś1 तत्र समिद्धतेजसं; Ñ1 G2 तत्र समग्रतेजसं; Dm1 D8 G3 राघवमुग्रतेजसं; D1.3 तत्र तमुग्रतेजसं; D2 तत्र समृद्धतेजसं; G1 तं समुदग्रचेतसा (for तं समुदग्रतेजसं). —(l. 2) Ś1 Ñ1 D1.2 तथाति( Ñ1 D1 °था सु )तीक्ष्णाप्रसहा( Ś1 °हसा )श्च राक्षसाः; Dg1 तथा हि तीक्ष्णप्रहरा निशाचराः; D3 तथा सुतीक्ष्णसहसाश्च राक्षसाः (sic); D4 T1.2 G1 तथा( G1 °दा ) सुतीक्ष्णप्रहरा( T1 G1 °वरा )निशाचराः; G2 तथा हि तीक्ष्णप्रहरा हि राक्षसाः, K(ed.) तथापि तीक्ष्णप्रदरा निशाचराः. —(l. 3) Ñ1 *वीक्षितुं; Dg1 प्रमादितुं. D4 T1.2 दुरासदं ( D4 °नुगं ) धर्षयितुं न चाशकन्( T2 शक्ताः ). —(l. 4) Ś1 (marg. also) यथा (for द्विपा). Dg1 D4 T1.2 वनद्विपा (for वने द्विपा). Dg1 उद्यतं; D4 उपस्थतां (sic); T2 उत्तमं (for उत्थितम्). ]

Colophon. —*Sarga name* : Ś1 Ñ1 D2 राक्षसप्रेषणं( D2 °णः ); Ñ2 D5.7 सैन्यप्रया( D5 °मा )णं; V खरप्रहृतराक्षसप्रयाणं; B1.3 खरप्रहितराक्षसप्रयाणं; B2 खरप्रहितचतुर्दशराक्षसप्रयाणं; B4 खरप्रहितरक्षःप्रयाणं; D1.3 राक्षसप्रयाणं( D3 °प्रवेशः ). —*Sarga no.* (figures, words or both) : Ś1 Ñ1 B1.3 D2.5 om. ; Ñ2 V2 D7 25; V1 24; B2.4 26; Dg1 Dt1 Dm1 D4.6.8 T G M1 19; D1 23; D3 28; M2.3 20. —After colophon, G conclude with श्रीरामाय नमः.

### 19

D8 begins with ॐ; M1 with श्रीरामाय नमः.

1 a) Ś1 Ñ1 D1–3 M2 सा तु (for ततः). Ś1 Ñ1 Dm1 D2–4 T3 M2.3 शू( D2.3 सू )र्पण( Ś1 D4 T3 °न )खी; Dg1 D1.8 सू( D8 शू )र्पनखा (for शूर्पणखा). —D5 om. 1c–2. —c) Ñ1 B2 Dg1 Dt1 Dm1 D1.2.6.7 राक्षसान् (for रक्षसाम्). Ñ2 V B D1.2.7 [ ऽ ]थ (for तौ). Ś1 राक्षसानां चचक्षेथ; D3 राक्षसानामाचचक्षे. —d) Ś1 Ñ V B D1–3.7 M2 राघवौ (for भ्रातरौ). Dg1 रामलक्ष्मणौ (for सह सीतया).

2 D5 om. 2 (cf. v.l. 1). —a) D4 तं (for ते). —b) V1 आसीनं च (for उपविष्टं). Ñ2 महावनं (for °बलम्). —D1 om. 2d–3c. —d) Ś1 Ñ1 D2.3 आसीनं (for वैदेह्या). Ñ2 V B D7 लक्ष्मणेन च धीमता; Dt1 Dm1 D6.8 लक्ष्मणेनापि सेवितं; M2 भ्रातरं सहलक्ष्मणं.

3 D1 om. 3abc (cf. v.l. 2). —a) Dt1 तौ; D4.6 तां (for तान्). V B D3 क्रूरान् (for श्रीमान्). Ś1 Ñ1 D2 तान्दृष्ट्वा राक्षसान्घोरान्. —b) Ś1 Ñ1 Dt1 D3.4.6 T1 आगतांस्; Ñ2 B D5.7 राक्षसांस् (for आगतां). Ś1 Ñ1 B1.2 Dt1 D6 तांश्च; M2 चापि (for तां च). Dt1 D6 राक्षसान् (for °सीम्). V1 राक्षसान्राक्षसीं च तां. —c) G1 राघवं (for भ्रातरं). —d) T1 damaged for दीप्ततेजसम्.

4 a) B3 मुहूर्तस्तव सौमित्रे. —b) Ñ2 V B D5.7 वैदेह्याः ( V2 B4 ह्या ) (for सीतायाः). B2 प्रत्यनंतरं (for °नन्तरः). Ś1 D2.3 सीतया प्रत्यनंतरं( D3 °रः ). —B4 reads 4c–5 in marg. —cd) Ś1 Dg1 D2.3 T3 इमानद्य; M2 यावदस्या( for इमानस्या). Ś1 Ñ1 Dm1 D1–3 अहं (for इह). Ñ2 V B D5.7 यावन्निहन्मि रक्षांसि घोराणीमानि संयुगे.

5 B4 reads 5 in marg. (cf. v.l. 4). —a) Ś1 Ñ1 D2 एवं; D3 एव; D4 ए* (for एतत्). Ś1 Ñ1 तु तच्छ्रुत्वा; Ñ2 V B D5.7 उपश्रुत्य( B4 °त्वा ); D1 तु संश्रुत्य (for ततः श्रुत्वा). —b) Ñ2 V B D5.7 [ अ ]मिततेजसः (for विदितात्मनः). —c) Ś1 D2 उत्थाय (for तथेति). —d) Dt1 D6 राघवस्य प्रपूजयत्. —For 5cd, Ñ2 V B D5.7 M2 subst. :

345* तथेत्युक्त्वा स वैदेह्या अभवत्प्रत्यनन्तरः ।

[ M2 [ अ ]थ (for स). B4 चाभवत्; M2 सोभवत् (for अभवत्). B2 प्रत्यनंतरं. ]

राघवोऽपि महच्चापं चामीकरविभूषितम् ।
चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ ६
पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ ।
प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ ७
फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ।
वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ ॥ ८
युष्मान्पापात्मकान्हन्तुं विप्रकारान्महावने ।
ऋषीणां तु नियोगेन प्राप्तोऽहं सशरासनः ॥ ९
तिष्ठतैवात्र संतुष्टा नोपसर्पितुमर्हथ ।
यदि प्राणैरिहार्थो वो निवर्तध्वं निशाचराः ॥ १०
तस्य तद्वचनं श्रुत्वा राक्षसास्ते चतुर्दश ।
ऊचुर्वाचं सुसंक्रुद्धा ब्रह्मघ्नाः शूलपाणयः ॥ ११
संरक्तनयना घोरा रामं रक्तान्तलोचनम् ।
परुषा मधुराभाषं हृष्टादृष्टपराक्रमम् ॥ १२
क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः ।
त्वमेव हास्यसे प्राणानद्यास्माभिर्हतो युधि ॥ १३
का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि ।
अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥ १४

G. 3. 26. 14
B. 3. 20. 14
L. 3. 25. 14

6 $^a$) Ñ2 V B D5.7 रामोपि सु- ( for राघवोऽपि ). —$^b$) Ś1 Ñ1 D1–3 कार्तस्वर- ( for चामीकर- ). —$^c$) D1.2.4 T2 G1 सज्जं ( for °ज्यं ). —$^d$) T1 damaged from ब्रवीत् up to रा in 7$^b$. M2 सोब्रवीत् ( for चा° ).

7 T1 damaged up to रा in 7$^b$ ( cf. v.l. 6 ). —D6 reads 8$^{cd}$ in place of 7$^{cd}$, repeating 8$^{cd}$ in its proper place. —$^c$) Dt1 om.; Dm1 प्रविष्टं ( sic ) ( for °ष्टौ ). G2 दंडकारण्यं ( for सीतया सार्धं ). —$^d$) Ś1 Ñ V1 B1–3 D1–3.5.7 M3 दंडकं वनं; G2 सीतया सह; M2 दंडकाननं ( for दण्डकावनम् ).

8 $^a$) V1 B2 Dg1 D5 फलमूलाशिनौ. Ñ1 युक्तौ ( for दान्तौ ). Ś1 D1–3 फलमूलाशने युक्तौ. —$^b$) Ś1 Ñ1 D1–3 धर्मसंहि( D1.3 °स्थि )तौ; Ñ2 V B1.2.4 D5.7 °माश्रितौ; Dm1 ब्रह्म° ( for धर्मचारिणौ ). —D6 reads 8$^{cd}$ in place of 7$^{cd}$, repeating it here. —$^c$) D4 दंडकारण्यं ( for °ण्ये ). Ś1 D2.3 प्रविष्टौ दंडकारण्यं( D3 °ण्ये ). —$^d$) Ś1 Ñ1 D1–3 उपधावत; Ñ2 V B D5.7 अभि( B3 °ति )धावथ; Dm1 D8 उपहिंस्यथ ( for °हिंसथ ).

9 $^a$) Dm1 D8 G3 M1 पापात्मनो ( for °त्मकान् ). Ś1 Ñ1 D1–3 युष्मत्पापात्मकर्मभ्यो. —$^b$) Ś1 D1–3 महा( D3 °हद् )वनं ( for महावने ). —$^c$) Ś1 Ñ V B D1–3.5.7 विनियोगेन ( for तु नि° ). —$^d$) Dt1 Dm1 D4.6.8 G3 Cr.k.t संप्राप्तः ( for प्राप्तोऽहं ). —T1 damaged from श up to वो in 10$^c$. Dg1 Dm1 D4.8 T2.3 G1.3 Cr.k सशरायुधः; Ct as in text ( for °सनः ). Ś1 D1–3 प्राप्तौ च( D1 स्वः; D3 स्म ) सशरासनौ; Ñ1 M1 संप्राप्तौ सशरासनौ( M1 °युधौ ). —For 9, Ñ2 V B D5.7 subst.:

346* युष्मद्विप्रकृतैः पूर्वमृषिभिः शंसितव्रतैः ।
नियुक्तावागतौ दुर्गमावां घोरमिदं वनम् ।

[ ( l. 1 ) V2 युष्माभिर्विकृतैः; B2 अस्मद्विप्रकृतैः. B3.4 संशितव्रतैः. —( l. 2 ) V विमुक्तावागतौ. ]

10 T1 damaged for 10$^{abc}$ ( cf. v.l. 9 ). —$^a$) Ś1 Ñ1 D3 [ अ ]त्रैव हे दुष्टा( Ñ1 दुष्टं नो; D3 दुर्वृत्ता ); Dm1 T2.3 M3 Cmp [ ए ]वात्र संदुष्टा; D1 M2 Cg.k [ अ ]त्रैव संतुष्टा ( for [ ए ]वात्र संतुष्टा ). Ñ2 V B D5.7 इत एव( B4 °वं ) .निवर्तध्वं; Ct as in text. —$^b$) D3 [ अ ]पसर्पितुम्; M1 निवर्तितुम्; M2( after corr. *sec. m.* as in text ) Cmp [ उ ]पा°; B( ed. ) K( ed. ) Cg.k.t [ उ ]पावर्ति°; Ctp as in text ( for [ उ ]पसर्पितुम् ). —$^c$) Dg1 reads from रि up to $^d$ in marg. Dg1 इवार्थो; D1.2 °र्थं ( for इहार्थो ). V1 B Dm1 T3 वा ( for वो ). M2 यदि प्राणैर्हि वः कृत्यं.

11 $^a$) Ñ2 V B D5.7 इति रामवचः श्रुत्वा. —$^c$) Ś1 एव; Ñ V2 B D2.5.7 वचः; V1 G1 M2 वाचः; Dg1 T2 वाक्यं ( for वाचं ). Ś1 [ अ ]तिसंरब्धाः; Ñ V B D2.5.7 °रब्धाः; D3 ससंक्रुद्धा ( for सुसंक्रुद्धा ). D1 ऊचुर्वचनसंरब्धाः. —$^d$) Ś1 Ñ V B D1–3.5.7 शूलपट्टिश( Ś1 Ñ1 D1–3 °मुद्गर )पाणयः.

12 K( ed. ) reads 12 in brackets. —$^a$) M3 संरब्ध- ( for °क्त- ). Ś1 Ñ V B D1–3.5.7 M1.2 क्रोधसंरक्तनयना. —$^b$) Dg1 Dt1 D4.6 T G2 संरक्त- ( for रक्तान्त- ). —Dg1 D4 T G2 om. 12$^{cd}$. —M2 reads 12$^{cd}$ *inf. lin. sec. m.* —$^c$) Ś1 V1 पुरुषा; G1 °षं ( for परुषा ). Ś1 मधुराभासं; D1 °लापं ( for मधुराभाषं ). —$^d$) Ś1 पुष्टापुष्ट-; Ñ V B D2.3.5.7 धृ( B4 *sup. lin.* also द )ष्टाधृष्ट-( D3 दृढ- ); Dm1 D6 G3 M3 हृष्टाधृ( D6 °दु )ष्ट-; D1 M2 दृष्टादृष्ट-; G1 दृष्टधृष्टि-; M1 रुष्टाधृष्ट- ( for हृष्टादृष्ट- ). ❀ Ct : अदृष्टपराक्रममिति छेदः. ❀

13 $^a$) G3 कोपम् ( for क्रोधम् ). V2 मे ( for नो ). —$^b$) M3 क्रूरस्य ( for खरस्य ). M2 तु ( for सु- ). —$^c$) Ś1 Ñ1 D1–3 मोक्ष्यसे; Ñ2 V B D5.7 त्यक्ष्यसि; Dg1 Cm °सि; M3 °ते ( for हास्यसे ). —$^d$) Dm1 D8 राम ( for अद्य ). D1.2 मृधे; D3 रणे ( for युधि ). Ś1 हतोस्माभिर्महामृधे; Ñ1 इहास्माभिर्हतो मृधे; Ñ2 V B D5.7 M2 अस्माभिः समरे हतः( B3 °तान् ); G3 अस्माभिर्निहतो युधि.

14 $^b$) Ś1 वहतां ( for बहूनां ). G3 रथमूर्धनि.

G. 3. 26. 15
B. 3. 20. 15
L. 3. 25. 15

एभिर्बाहुप्रयुक्तैर्नः परिघैः शूलपट्टिशैः ।
प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम् ॥ १५
इत्येवमुक्त्वा संरब्धा राक्षसास्ते चतुर्दश ।
उद्यतायुधनिस्त्रिंशा राममेवाभिदुद्रुवुः ।
चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम् ॥ १६
तानि शूलानि काकुत्स्थः समस्तानि चतुर्दश ।
तावद्भिरेव चिच्छेद शरैः काञ्चनभूषणैः ॥ १७
ततः पश्चान्महातेजा नाराचान्सूर्यसंनिभान् ।
जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान् ॥ १८
गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान् ।
मुमोच राघवो बाणान्वज्रानिव शतक्रतुः ॥ १९
रुक्मपुङ्खाश्च विशिखाः प्रदीप्ता हेमभूषणाः ।
अन्तरिक्षे महोल्कानां बभूवुस्तुल्यवर्चसः ॥ २०
ते भित्त्वा रक्षसां वेगाद्वक्षांसि रुधिराप्लुताः ।
विनिष्पेतुस्तदा भूमौ न्यमज्जन्ताशनिस्वनाः ॥ २१

---

**15** $^{a}$) Ś1 Ñ1 D2 एष; Ñ2 V B1.2 D5 अस्मद्-; B3 तस्माद्; B4 D7 अस्माद् ; Dg1 T3 M3 एहि; D1 एका (sic); D3 एव (for एभिर्). Ś1 V2 -प्रसक्तैर् ; Ñ1 B1.2 Dg1 D2.3.4.7 -प्रमुक्तैस्; Dm1 D8 G1.3 -विमुक्तैर् (for -प्रयुक्तैर्). Ñ1 om.; Ñ2 V B D5.7 त्वं; Dg1 Dt1 D6 च (for नः). —$^{b}$) Dg1 G M1 शूलपट्टसैः (Dg1 G1 °शैः); D4 T °पट्टिसैः; M2 °मुद्गरैः (for शूलपट्टिशैः). Ś1 Ñ1 D1–3 परिघप्रासतोमरैः; Ñ2 V1 D5.7 शूलमुद्गरपट्टिशैः; V2 B शूलपट्टिशमुद्गरैः; M3 शूलैः परिघपट्टसैः. —$^{c}$) D5 त्यक्ष्यति; M2 त्यजसि (for त्यक्ष्यसि). —$^{d}$) Ñ2 V B D5.7 [इ]दं विचेतनः (D7 °नं); D2 T2 श (T2 ख) र° (for करपीडितम्).

**16** $^{a}$) T1.2 G2 M2 संक्रुद्धा (for संरब्धा). Ñ2 V B D5.7 एवमुक्त्वा सु (V तु) संरब्धा. —After 16$^{ab}$, Dm1 D8 read 20$^{cd}$. —Dg1 D4 T G1.2 M3 om. 16$^{cd}$. —M2 transp. 16$^{cd}$ and 16$^{ef}$. —K (ed.) reads 16$^{cd}$ in brackets. —$^{d}$) Ś1 Ñ B D1–3.5.7 समभिदुद्रुवुः (for एवाभि°). M1 तावुभावभिदुद्रुवुः; M2 सहसा राममाद्रवन्. —After 16$^{cd}$, M1.2 ins. only l. 1–2 of 347*. —$^{f}$) M1.2 दुर्जयाः (for °यम्).

**17** $^{b}$) M2 रणाजिरे (for चतुर्दश). —$^{d}$) Dg1 Dt1 D6 G1.2 M3 कांचनभूषितैः.

**18** $^{a}$) Dt1 Dm1 D4.6.8 पश्यन् (for पश्चान्). —For 16$^{ef}$–18, Ś1 Ñ V B D1–3.5.7 subst.; while Dm1 D8 G3 ins. only l. 1–2 after 17; whereas M1.2 ins. l. 1–2 only after 16$^{cd}$ :

347* अभिपत्य ततो वेगाच्चिक्षिपुस्ते निशाचराः ।
परिघान्पट्टिशान्प्रासांश्चतुर्दश चतुर्दश ।
चतुर्दशभिरेकोऽग्रे राघवो निशितैः शरैः ।
शस्त्राण्यस्त्राणि रक्षोभ्यश्चिच्छेद खगपत्रिभिः ।
ततोऽपरान्महाघोरान्राघवो लघुविक्रमः । [5]

[(l. 1) D3 रोषाच् (for वेगाच्). Ñ2 V B D5.7 M2 अभिद्रुत्य च (Ñ2 D5.7 तु) वेगेन (for the prior half). —Ñ1 om. l. 2. —(l. 2) Dm1 D8 G3 शूलांश् (for प्रासांश्). M1 निस्त्रिंशान्हेमभूषितान् (for the post. half). Ñ2 V B D5.7 M2 चतुर्दश सुसंरब्धाः (M2 °क्रुद्धाः) शूलपट्टिशमुद्गरान् (M2 °मुद्गरपट्टसान्). —After l. 2, Ñ2 V B D5.7 ins. :

347(A)* तानि तेषां च शस्त्राणि राक्षसानां चतुर्दश ।;

while Dm1 D8 G3 ins. :

347(B)* तावद्भिरेव चिच्छेद समस्तान्स वरायुधान् ।
चतुर्दशभिरव्यग्रः शरैः काञ्चनभूषणैः ।

[(l. 1) D8 इव (for एव). —(l. 2) G3 कांचनभूषितैः.]

—(l. 3) Ñ1 D1.3 एकाग्रे (D1 °ग्रै); Ñ2 V B D5.7 एवाजौ; D2 एकाग्रो (for एकोऽग्रे). Ñ2 V B D5.7 रामश्चिच्छेद सायकैः (for the post. half). —Ñ2 V B D5.7 om. l. 4. —(l. 4) D1 तानि (for [अ]स्त्राणि). Ñ1 D3 रक्षोभिश् (for °भ्यश्). D3 चिच्छिदे (for चिच्छेद). —(l. 5) Ñ V B D5.7 अ (V1 सु)-संभ्रांतो; D1 महातेजा (for महाघोरान्).]

—$^{c}$) Ñ2 V B D5.7 समरे (for परम-). —$^{d}$) Ś1 Ñ1 D1–3 शिताञ्शरान् ; Ñ2 V B D7 M1 शिलीमुखान् ; T3 G1 शराञ्शितान् ; Cr.m.g.k.t as in text (for शिलाशितान्).

**19** $^{a}$) M2 संधाय (for गृहीत्वा). Ś1 Ñ1 D1–3 उद्यम्य (for आयम्य). Ñ2 D5.7 संधाय चापि चापे तान् ; V B संधाय चापे (B2 °पि) तानाशु; D8 गृहीतधनुरागम्य. —$^{b}$) Ñ2 V2 B D5.7 लक्ष्यम् ; D1.3 लक्ष्याणि; G3 M लक्षान् (for लक्ष्यान्). —After 19$^{ab}$, M2 ins. :

348* कृत्वा मुष्टिं धनुर्मध्ये चतुर्दश शिलीमुखान् ।

—D8 reads 19$^{cd}$ in marg. —$^{c}$) M2 मुमोच लीलया रामो. —$^{d}$) Ś1 Ñ1 D1–3 M1.3 वज्राणीव (for वज्रानिव). Ñ2 V B D5.7 M2 वज्राशनिसमस्वनान्. —After 19, D1–3 read 349*.

**20** Dt1 D4.6 om. 20$^{ab}$. Ś1 Ñ1 read 20$^{ab}$ after 349*. —$^{a}$) Ś1 Ñ V B D1–3.5.7 G1 M2 ते रुक्मपुंखा (for रुक्मपुङ्खाश्च). Ś1 Ñ1 D1–3 निशिताः (for विशिखाः). —$^{b}$) Ś1 Ñ V B Dg1 D2.5.7 G1.2 M1 हेमभूषिताः (for °षणाः). T1.2 M3 दीप्ता हेमविभूषिताः. —Dm1 D8 read 20$^{cd}$ after 16$^{ab}$. —$^{d}$) Ś1 तुमुलस्वनाः; Ñ1 D3 °निस्वनाः; Dm1 D8 M3 °दर्शनाः; D1 °लक्षणाः; D2 °भूषणाः; G1 °विक्रमाः (for तुल्यवर्चसः).

**21** $^{ab}$) D4 G2 राक्षसान् (for रक्षसां). Dt1 Dm1 D6 °रप्लुताः (for °राप्लुताः). Ś1 Ñ V B D2.3.5.7 G1 M3 ते

ते भिन्नहृदया भूमौ छिन्नमूला इव द्रुमाः ।
निपेतुः शोणितार्द्राङ्गा विकृता विगतासवः ॥ २२
तान्भूमौ पतितान्दृष्ट्वा राक्षसी क्रोधमूर्छिता ।
परित्रस्ता पुनस्तत्र व्यसृजद्भैरवं रवम् ॥ २३

सा नदन्ती महानादं जवाच्छूर्पणखा पुनः ।
उपगम्य खरं सा तु किंचित्संशुष्कशोणिता ।
पपात पुनरेवार्ता सनिर्यासेव वल्लरी ॥ २४

G. 3. 26. 28
B. 3. 20. 23
L. 3. 25. 27

शरास्तानि रक्षांसि भित्त्वा बर्हिणलक्ष्मणाः ( V1 D5 G1 °वाससः ); D1 ते शरास्तानि रक्षांसि विभिदुर्बहुलक्षणाः. —$^{c}$ ) T3 तथा ( for तदा ). —$^{d}$ ) Dg1 Dt1 Dm1 D6.8 T3 G3 Ct वल्मीकादि ( G3 °नि )व पन्नगाः. —For $21^{cd}$, Ś1 Ñ1 D1–3 ( D1–3 read after 19 ) G1 subst. :

349* चतुर्दशसु निष्पेतुश्चतुर्दश शिलीमुखाः ।

[ D1 रक्षःसु; D2 निःपेतुश् ( for निष्पेतुश् ). D3 G1 चतुर्दश विनिष्पेतुश् ( for the prior half ). G1 महाजवाः ( for शिलीमुखाः ).]; while Ñ2 V B D5.7 subst. :

350* विविशुर्वेगिता भूमिं वल्मीकमिव पन्नगाः ।
शोणितार्द्रा महाकाया विगतैरसुभिस्ततः ।
चतुर्दश निपेतुस्ते शरभिन्ना निशाचराः ।

[ ( l. 2 ) Ñ2 D5.7 इषुभिस् ( for असुभिस् ). M2 निहताः सहितास्ततः ( for the post. half ). —( l. 3 ) Ñ2 D5.7 शरैर्भिन्ना. ]

—After 21 ( 349* ), Ś1 Ñ1 read $20^{ab}$.

22 $^{a}$ ) T3 G2 M1 तैर् ( for ते ). Dg1 Dt1 D6 तैर्भग्नहृदया भूमौ. —$^{b}$ ) Dt1 D6 भिन्न- ( for छिन्न- ). —$^{c}$ ) Ś1 D1–3 शोणितोद्गारा ( D2 °रं ); Ñ1 °देशा; Dg1 Dt1 D6 T3 G2 M3 शोणितस्नाता; Dm1 D8 °क्तांगा; G3 °क्तास्या; M1 शोणितादिग्धा ( for शोणितार्द्राङ्गा ). —$^{d}$ ) Ś1 D1–3 विनिकृ ( D2 °वृ )त्ता निशाचराः; Ñ1 धरण्यां रजनीचराः. —For $22^{cd}$, Ñ2 V B D5.7 M2 subst. :

351* प्रपेतू राक्षसाः सर्वे रणे रामेण निर्जिताः ।

[ B2 प्रपेदू ( sic ). M2 शोणितादिग्धा ( for राक्षसाः सर्वे ). G( ed. ) रामेण युधि निर्जिताः ( for the post. half ). ]

—Thereafter cont. :

352* ते रुक्मपुङ्खा विमला विशिखा हेमभूषिताः ।
निहत्य तानि रक्षांसि स्वतूणं पुनरागमन् ।

[ ( l. 1 ) M2 transp. विमला and विशिखा. B4 विशिखाः ( for विमला ). B4 प्रदीप्ता ( for विशिखा ). D5 M2 -भूषणाः ( for -भूषिताः ). —( l. 2 ) V सुतूणं; M2 स्वतूर्णौ ( for स्वतूणं ). B4 D5 M2 आविशन् ( for आगमन् ). ]

[ D5 om. l. 1-2. —( l. 2 ) B1.4 प्रयत्नेन ( for प्रसन्नेन ). —( l. 3 ) Ñ2 D5 तु तां; D7 तदा ( for च तां ). —( l. 4 ) V1 सोतिव्याकुल-; B3 सोव्याकुलित- ( for स व्याकुलित- ). —( l. 6 ) Hypm. V1 आवर्जवेगा धारयितुं ( for the prior half ). —( l. 7 ) V1 B3( *sup. lin.* अहम् ).4 अलम् ; V2 अहम् ; G( ed. ) इदम् ( for अयम् ). V1 अस्य ( for अस्या ). —( l. 8 ) V2 अस्य ( for अस्या ). V1 विघातने ( for विनाशने ). —( l. 9 ) V1 वधे प्रेप्सुर् ; B4 वधं प्रेप्सुर् . —( l. 11 ) B4 D5 तत्पावकोपमं. —( l. 12 ) Note hiatus between the two halves. V1 -चय- ( for -सम- ). V1 आग्नेये*. ]

—Thereafter V B4 D5.7 cont. 550*.

27 $^{a}$) Dt1 D6 महतीं( Dt1 °तां ); G1.2 सहसा ( for ज्वलितां ). —$^{b}$ ) G2 -कालोपमां ( for -पाशो° ). V B4 D5.7 अथ; B1 मृधे; M3 रणे ( for गदाम् ). —For $27^{ab}$, Ñ2 B3 subst., while V B4 D5.7 cont. after 549* :

550* आपतन्त्यम्बरे रुद्धा मथिता च पुनः पुनः ।

[ V B4 त्रासिता; B3 भ्रामिता ( for मथिता ). ]

—$^{cd}$ ) Dg1 Dt1 Dm1 अंतरीक्ष- ( for °रिक्ष- ). D1.2 अंतरीक्षे तदा( D2 गदां )रामश्( for $^{c}$ ). Ś1 बहुसायकैः; Ñ1 D1 बहुभिः शरैः; D4 निशितैः शरैः. G3 रामश्चिच्छेद बहुधा शरैः कांचनभूषणैः. —For $27^{cd}$, Ñ2 V B1.3.4 D5.7 subst. :

551* तेनास्त्रेण महातेजा गदां चिच्छेद राघवः ।

and then cont. :

552* तामगच्छदतिक्रम्य तदस्त्रं गगने गदाम् ।
ततो हुताशनो घोरः प्रादुरासीत्समन्ततः ।
ततो ज्वालासहस्रैस्तु अन्तरीक्षं समाचितम् ।

[ ( l. 3 ) Note hiatus between the two halves. Ñ2 D5.7 च ( for तु ). Ñ2 समाहृतं ( for °चितम् ). D5.7 अंतरिक्षं समाहितं ( for the post. half ). ]

28 $^{a}$ ) Ś1 Ñ1 D2.3 T2 G1 विकीर्णा ( for विशीर्णा ). Ś1 Ñ1 D2.3 छिन्ना; Dg1 D4 T3 भग्ना; Dm1 D1.8 G M2.3 दग्धा; M1 विद्धा ( for भिन्ना ). —$^{b}$ ) D3 पपात भुवि निःफला. —For $28^{ab}$, Ñ2 V B1.3.4 D5.7 subst. :

553* गदा च निहता घोरा विशीर्णा न्यपतद्भुवि ।

and then cont. ( V1 cont. l. 1-6 after 553* and ins. l. 7-8 before 3.29.1 ) :

554* प्रजाक्षये चन्द्रमसो विनाशे विमलात्मनः ।
रौद्रीं तारां समासाद्य ज्वलितेनेव केतुना ।
दग्धा सा पतिता भूमौ विशीर्णाङ्गदभूषणा ।
हुताशनप्रदीप्तेव राक्षसानुचरा यथा ।
तां भस्मभूतां कौबेरीं दिव्येनास्त्रेण नाशिताम् । [5]
दृष्ट्वा दाशरथिस्तुष्टो मेने चात्मवशं खरम् ।
राक्षसोऽपि हतां घोरामवेक्ष्य महतीं गदाम् ।
हतमेवाभ्यगच्छत्स आत्मानं रणमूर्धनि ।
गदां तु तां वीक्ष्य निपातितां रणे
महेन्द्रवज्राशनितुल्यगौरवाम् । [10]
भयाहतो राक्षसपुंगवस्तदा
प्रविव्यथेऽसौ सुभृशं खरो रणे ।

# २९

G. 3. 35. 56
B. 3. 30. 1
L. 3. 35. 11

भित्त्वा तु तां गदां बाणै राघवो धर्मवत्सलः ।
स्मयमानः खरं वाक्यं संरब्धमिदमब्रवीत् ॥ १

एतत्ते बलसर्वस्वं दर्शितं राक्षसाधम ।
शक्तिहीनतरो मत्तो वृथा त्वमुपगर्जसि ॥ २

[ (l. 1) B1.4 (m. also) निशाक्षये (for प्रजा°). V1 निवासो (sic); G (ed.) विनाशो (for विनाशे). —B3 reads in marg. l. 2–7. —(l. 2) Ñ2 D5.7 रौद्रां (for रौद्रीं). —(l. 3) V1 -भूषणं (for -भूषणा). V2 ददाह पतितां भूमौ विकीर्णांगद-भूषणां. —(l. 4) Ñ2 -प्रदीप्तेन (for -प्रदीप्तेव). V B4 D7 हुताशेन प्रदीप्तेन; D5 हुताशनेन दीप्तेन (for the prior half). V2 तदा; B1 तथा (for यथा). V1 राक्षसानुचरस्तदा; B3.4 राक्षसी निहता (B3 विहिता; G [ed.] विच्युता) गदा (B3 तदा) (for the post. half). —(l. 5) D7 वासितां (for नाशिताम्). —(l. 6) D5.7 आत्मवशं (with hiatus) (for चात्म°). —(l. 7) B3 स्थितां (for हतां). V B1 मायाम्; B3 दिव्याम् (for घोराम्). Ñ2 B1.3 अवेद्य (sic); V1 B4 (m. also as above) अवेत्य (for °क्ष्य). —(l. 8) Ñ2 [अ]*गच्छत. —V om. l. 9–12. —(l. 9) D7 om. तां. —(l. 10) B1.3 महेंद्रवद्याशनि- (sic). —(l. 11) Ñ2 D5 भयावृतो; B4 भयार्दितो; D7 तयाकृतौ- (sic) (for भयाहतो). —(l. 12) B4 सुभगं (for °भृशं). D5 रणं (for रणे). ]

—Ñ2 V2 B1.3.4 D5.7 om. $28^{cd}$. —$^{c}$) Ś1 Ñ1 D1.3 -[औ]षधैर्घोरैर्; Dg1 -[ओ]षधिव°; Dm1 D4.8 T G1.3 M1 -[औ]षधव°; G2 -[औ]षधवशाद् (for -[औ]षधिबलैर्). V1 यथा महौषधैर्घोरैर्. —$^{d}$) Ñ1 व्यालीमिव निपातिता (sic); D1 कृत्वा प्रतिहता यथा. —After 28, Ś1 Ñ1 (mostly illeg.) V1 D2.3 ins.:

555* तां निकृत्तां गदां दृष्ट्वा रणे रामेण भूतले ।
न विव्यथे खरः संख्ये धराधर इवाचलः ।
न विषादोऽभवत्तस्य न चोत्साहं व्यमुञ्चत ।

[ (l. 2) V1 धरावर्ष (for धराधर). —(l. 3) V1 D3 चास्य (for तस्य). V1 विषादं (for चोत्साहं). D3 विमुंचतः (sic) (for व्यमुञ्चत). Ś1 न चोत्साहस्तदग्रतः (for the post. half). ]; while M2 ins.:

556* दृष्ट्वा तां पतितां संख्ये चकम्पे च खरस्तदा ।

Colophon. Ś1 D1–3 om. (cont. the Sarga). —*Sarga name*: Ñ V1 आक्षेपयुद्धं; Ñ2 B1.3.4 D5 गदाच्छेदः; V3 D7 खरगदाच्छेदः. —*Sarga no.* (figures, words or both): Ñ1 B1.3 om.; Ñ2 D5.7 35; V1 34; V2 36; B4 37; Dg1 Dt1 Dm1 D4.6.8 T G M1 29; M2.3 30. —After colophon, G concludes with श्रीरामाय नमः.

## 29

Ś1 D1–3 cont. the previous Sarga. D8 begins with ॐ; T2 with रामाय नमः; M1 with श्रीरामाय नमः. —Before 1, V1 ins. l. 7–8 of 554*.

1 D1 om. 1–$16^{b}$. —$^{c}$) D4 स्तूयमानः. Dt1 D6 इदं (for खरं). ❀ Cg: संरब्धं भ्रांतमिति खरविशेषणम्. ❀ —$^{d}$) Dg1 संरब्धतरम् (for °मिदम्). —For 1, Ś1 Ñ1 D2.3 M2 subst.:

557* छित्त्वा तु तां गदां रामो रणे राजीवलोचनः ।
स्मितपूर्वं खरं वाक्यमिदं दाशरथोऽब्रवीत् ।

[ (l. 1) Ś1 M2 transp. तु and तां. M2 बाणै (for रणे). —(l. 2) D3 M2 transp. खरं and इदं. Ñ1 illeg. for दाशर. M2 पुनरथो (for दाश°). ];
while Ñ2 V B1.3.4 D5.7 subst. for 1:

558* ततः परमतेजस्वी राघवः परवीरहा ।
खरं परुषया वाचा वाक्यमुत्तममब्रवीत् ।

[ (l. 1) B3 समर- (for परम-). —(l. 2) B1.3.4 D5 उत्तरम् (for °मम्). G (ed.) वाक्यं बहुतरं ब्रवीत् (metri causa) (for the post. half). ]
—Then Ñ2 V B1.3.4 D5.7 read 561*.

2 D1 om. 2 (cf. v.l. 1). Ñ2 V B1.3.4 D5.7 read $2^{ab}$ after 3. —$^{a}$) Ñ1 एते तु (for एतत्ते). Ś1 खलु (for बल-). —$^{b}$) Ś1 M2 मया भुवि निपातितं; Ñ1 D2.3 मया तु (Ñ1 वै) विनि (D2 भुवि) पातितं. —After $2^{ab}$, Ñ2 B1.3.4 D5.7 ins.; while V ins. after $5^{ab}$:

559* नीचस्य क्षुद्रशीलस्य असत्यपरिभाषिणः ।
न ते जीवितमिच्छामि यतस्वाद्य परं रणे ।

[ Note hiatus between the two halves. V transp. l. 1 and 2. —(l. 1) V दुष्टवृत्तस्य; B1 क्षत्रशीलस्य (for क्षुद्र°). V सद्वृत्तपरिभावि (G [ed.] °तापि) नः (for the post. half). —(l. 2) B1.4 जीवितुम् (for °तम्). Ñ2 B3 परं रणं; B1 पराक्रमे (for परं रणे). V B4 यतस्वान्यत (V2 B4 [m. also] °प) रं (B4 मं) बलं (V2 वले; B4 रणे) (for the post. half). ]
—$^{d}$) Dg1 उपगच्छसि; Dm1 T1.2 G1.2 M1.3 अवगर्जसि; D8 अप°; T3 अनुगच्छसि; G3 अवगर्हसि (for उप°). —For $2^{cd}$, Ś1 Ñ1 D2.3 M2 subst.:

560* हीनशक्तिरशक्तस्त्वं वृथैव परिकत्थसे ।

[ Ñ1 त्वमेवाद्य; M2 अशक्तिस्त्वं (for °क्तस्त्वं). Ś1 [ए]वं; Ñ1 त्वं (for [ए]व). M2 हि विकत्थसे (for परि°). ];
while Ñ2 V B1.3.4 D5.7 subst. for $2^{cd}$ and read after 558*:

561* यत्त्वया श्लाघया वाक्यमुक्तं मद्वधकाङ्क्षया ।
रुधिरं ते प्रपास्यामि राक्षसाधम तन्मृषा ।

[ (l. 1) V D5 श्लाघ्यया (for °घया). V2 B3 -कांक्षिणा (for °क्षया). ]

एषा बाणविनिर्भिन्ना गदा भूमितलं गता ।
अभिधानप्रगल्भस्य तव प्रत्ययघातिनी ॥ ३
यत्त्वयोक्तं विनष्टानामिदमश्रुप्रमार्जनम् ।
राक्षसानां करोमीति मिथ्या तदपि ते वचः ॥ ४
नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः ।
प्राणानपहरिष्यामि गरुत्मानमृतं यथा ॥ ५
अद्य ते भिन्नकण्ठस्य फेनबुद्बुदभूषितम् ।
विदारितस्य मद्बाणैर्मही पास्यति शोणितम् ॥ ६
पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः ।
स्वप्स्यसे गां समाश्लिष्य दुर्लभां प्रमदामिव ॥ ७
प्रवृद्धनिद्रे शयिते त्वयि राक्षसपांसने ।
भविष्यन्त्यशरण्यानां शरण्या दण्डका इमे ॥ ८
जनस्थाने हतस्थाने तव राक्षस मच्छरैः ।
निर्भया विचरिष्यन्ति सर्वतो मुनयो वने ॥ ९

G. 3. 35. 66
B. 3. 30. 9
L. 3. 35. 19

3 D1 om. 3 ( cf. v.l. 1 ). Dg1 transp. 3 and 4. —[a] ) T2 बाणैर् ( for बाण- ). Ś1 Ñ1 D2.3 इयं बाणशतै( D2 °शिरै )श्छि( Ñ1 भि )न्ना. —[b] ) Ś1 Ñ1 D2.3 M2 गदा ते पातिता मया. — For 3[ab], Ñ2 V B1.3.4 D5.7 subst. :

5( 2* एषा ते बाणनिर्दग्धा भस्मीभूता महागदा ।
विशीर्णा पतिता भूमौ बाणवेगप्रपीडिता ।

[ ( l. 1 ) B1 मया ( for महा- ). — ( l. 2 ) G( ed. ) बाणेनैकेन पीडिता ( for the post. half ). ]

—[c] ) Ś1 D2 अभिमान-; Dg1 °धानं ( for °धान- ). V B4 अतिप्रगल्भस्य तथा. —[d] ) D4 T1.2 G1.3 M1 Cg प्रत्यरि- ( for °य- ). Ś1 D2 -नाशिनी; Ñ1 D3 -नाशनी; Cm*p*.k as in text ( for -घातिनी ). ❀ Ct : अनया शत्रुवधो भवत्येवेत्ययं यः प्रत्ययो विश्वासस्तस्य स्वनाशेन घातिका. ❀ M2 वागिवासंस्कृता यथा. — After 3, Ñ2 V B1.3.4 D5.7 read 2[ab].

4 Ñ2 B1.4 D1.5.7 om. 4 ( for D1 cf. v.l. 1 ). Dg1 transp. 3 and 4. —[a] ) Ś1 त्वयोक्तं च ( for यत्त्वयोक्तं ). —[b] ) Ś1 Ñ1 B3 D3 अयमश्रु-; V कुर्या°; Dg1 T3 इदमस्र-; D2 नयनाश्रु-; D4 T1.2 G M1.3 अह( M1 इद् )मास्र-; M2 अह° ( for इद° ). V1 -विमोचनं ( for -प्रमार्ज° ). —[d] ) M2 मृषैतद् ( for मिथ्या तद् ).

5 D1 om. 5 ( cf. v.l. 1 ). —[a] ) Ś1 D2.3 क्षुद्रवृत्तस्य; Ñ1 *****स्य ( illeg. ); Ñ2 B1.3.4 D5.7 दुष्टवृत्तस्य ( for °शीलस्य ). —[b] ) G1 -शीलस्य ( for -वृत्तस्य ). Dm1 D4.8 G3 M2 राक्षस ( for रक्षसः ). Ś1 Ñ B1.3.4 D2.3.5.7 सद्वृत्त ( D5 °त्ति )परिपंथिनः( Ś1 Ñ1 D2 °वादिनः; B1.4 [ m. also ] °भाविनः; B3 °भाषिणः ); V न( V2 [ with hiatus ] अ ) सत्यपरिभाषिणः. — After 5[ab], V ins. 559*. —[c] ) Ś1 Ñ2 V2 परि-; Dm1 D3.5 T2 अपि ( for अप- ). —[d] ) V1 गरुडो ( for अमृतं ). B1 गरुडेनावृ( m. also °मृ )तं यथा.

6 D1 om. 6 ( cf. v.l. 1 ). —[a] ) Ś1 कंठनिर्गूढं; Ñ1 **निर्यातं ( illeg. ); Ñ2 V1 B1.3.4 D5.7 कंठनिर्गीर्णं; D2.3 कर्णनिर्गीर्णं; K( ed. ) छिन्न° ( for भिन्नकण्ठस्य ). V2 अद्य कंठविनिर्भिन्नं. —[b] ) Dm1 D8 G1.3 -दूषितं; T1.2 -शोभितं ( for -भू° ). —[c] ) Ś1 D2 निकृत्तास्यस्य; D3 विवृत्ता*स्य ( for विदारितस्य ). L( ed. ) तद् ( for मद् ).

7 D1 om. 7 ( cf. v.l. 1 ). —[a] ) Ñ V B1.3.4 Dg1 D2.3.5.7 पांशु-. Ś1 Ñ1 D2.3 G1 -भूषित- ( for -रू° ). V1 T2 -सर्वांगं ( for °ङ्गः ). —[b] ) Ś1 सुसंनद्ध-; Ñ1 D2.3 सु( D3 भू ) संन्यस्त-; Ñ2 B4 D5.7 स्वांक( B4 °श )न्यस्त-; B3 त्वं समं न्यस्त- ( hypm. ) ( for स्रस्त° ). M3 -भुजः क्षितौ ( for -भुजद्वयः ). V1 संत्रस्तभुजबंधनः; B1 त्वं संन्यस्तभुजद्वयं. —[c] ) Ñ2 V B1.3.4 D5.7 स्वप्स्यसि क्ष्मां ( for °से गां ). Ś1 Ñ V B1.3.4 D2.3.5.7 T1 Cg समालिंग्य ( for °श्लिष्य ). —[d] ) M2 वल्लभां ( for दुर्ल° ). G3 damaged for मिव. Ś1 Ñ V B1.3.4 D2.3.5.7 प्रमदां( Ś1 सुदतीं ) वल्लभा( V1 °भो )मिव( V1 यथा ). — After 7, Ñ2 V B1.3.4 D5.7 ins. :

563* श्रुत्वा त्वामद्य निहतं मुनयः पिशिताशनम् ।

[ Ñ2 पिशिताशिनं. ]

— Then B3 cont. :

564* प्रहृष्टा विचरिष्यन्ति काननेषु समन्ततः ।

— After 563*, V2 reads 9[cd] for the first time repeating it in its proper place.

8 D1 om. 8 ( cf. v.l. 1 ). —[a] ) T3 G1.3 M1.3 Cr.m*p*.k प्रबद्ध-; G2 प्रबुद्ध- ( for प्रवृ° ). Ś1 -निद्रं; Ñ1 V1 B1 D2.3.5 -निद्रा-; Ñ2 B4 D7 -निद्राः; B3 -निद्रां ( for -निद्रे ). V1 -निहते; B3 गमिते ( for शयिते ). —[b] ) Dg1 -पांशने; D4 T3 -पांसन; M2 -कंटके ( for °ने ). Ś1 Ñ V B1.3.4 D2.3.5.7 त्वय्यद्य( V2 निहते ) मुनिकंटके. —[c] ) Ñ1 भवत्वद्य ( for भविष्यन्ति ). Ś1 D3 [ अ ]द्य शरणाः; V2 Dt1 Dm1 D6 T3 Cm.t शरण्यानां; D2 [ अ ]नवारण्याः; Cv.r.g as in text ( for [ अ ]श° ). —[d] ) Ś1 D2.3 चिरं; D6 [ अ ]पि मे ( for इमे ). Ñ1 शरण्यमिह दंडकं; Ñ2 V B1.3.4 D5.7 M2 शरण्या इव दंडकाः( V1 B4 °के ).

9 D1 om. 9 ( cf. v.l. 1 ). —[a] ) Ñ2 जने स्थाने; D3 जनस्थान- ( for °ने ). Ñ2 D7 हते स्थाने; V1 महत्स्थाने; B3 ( m. also ) हते मूढ; D6 हृत° ( for हत° ). Dg1 T3 हतस्थाने जनस्थाने ( by transp. ). —[b] ) V B1.4 D5.7 त्वयि ( for तव ). Ñ2 D5.7 संस्थिते; B1 ( m. also ) मत्सरे ( for मच्छरैः ). — D4 om. ( hapl. ) 9[d]–10[a]. V2 reads 9[cd] after 563* repeating it here. —[d] ) Ñ1 सर्वे ते; V2 ( first time ) पर्वते ( for सर्वतो ). Ś1 Ñ1 V( V2 both times ) B1.3.4 D2.3 वनं. Ñ2 D5.7 मुनयस्ते निशाचर; G2 सर्वतो मुनिपुंगवाः.

G. 3. 35. 67
B. 3. 30. 10
L. 3. 35. 21

अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः ।
बाष्पार्द्रवदना दीना भयादन्यभयावहाः ॥ १०
अद्य शोकरसज्ञास्ता भविष्यन्ति निशाचर ।
अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः ॥ ११
नृशंसशील क्षुद्रात्मन्नित्यं ब्राह्मणकण्टक ।
त्वत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः ॥ १२
तमेवमभिसंरब्धं ब्रुवाणं राघवं रणे ।
खरो निर्भर्त्सयामास रोषात्खरतरस्वनः ॥ १३
दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः ।
वाच्यावाच्यं ततो हि त्वं मृत्युवश्यो न बुध्यसे ॥ १४

**10** D1 om. 10 (cf. v.l. 1). D4 om. $10^a$ (cf. v.l. 9). Ś1 Ñ1 V D2.3.5.7 M2 transp. 10 (including star) and 11. —$^a$) Ś1 Ñ1 D2 विप्रसहिष्यंति (Ś1 °ते); V रक्षो भविष्यंति; D5.7 वित्रासमे°; M2.3 विप्रधरि°; Cr विप्रचरि° (for विप्रसरि°). —$^b$) Ś1 D5.7 राक्षसा (for °स्यो). —$^c$) T2 बाष्पार्द्रनयना दीन. —$^d$) G1 अन्या; M2 अद्य (for °न्य-). Ñ1 भयान्मम भयानकाः. ❀ Cv : भयादन्यभयावहादिति पाठः. ❀—For $10^{cd}$, Ś1 V D2.3 subst. :

565* सबाष्पदीनवदना भयान्मम महावनात् ।

[ V सर्वाः सं- (for सबाष्प-). V महाहवात्; D2 °वने (for °वनात्). ]

—Then V cont., while Ñ2 B1.3.4 subst. for 10, whereas D5.7 subst. for $10^{cd}$ and both the groups read after 11 :

566* अद्य शोकमहं घोरमृषीणां भयसंभवम् ।
त्वन्मूलमपनेष्यामि शश्वद्ब्राह्मणकण्टकम् ।
अद्य वित्रासमेष्यन्ति राक्षसा हतबान्धवाः ।

[ (l. 1) V1 शोकभयं (for शोकमहं). V2 महाघोरम् (for अहं घोरम्). —(l. 2) V त्वन्मूलम्; B1 तन्मू° (for त्वन्मू°). Ñ2 -कंटक (for °कम्). —V1 B4 D5.7 om. l. 3. ]

**11** D1 om. 11 (cf. v.l. 1). Ś1 Ñ1 V D2.3.5.7 M2 transp. 10 and 11. —$^a$) Ñ1 V1 (sic) ते (for ता). —$^b$) Ñ1 निशाचराः; Dt1 Ct निरर्थिकाः; D6 T1 G Cr.m.g.k निरर्थकाः; D2 °चरैः (for °चर). —$^c$) D5 रामा (for पत्न्यो). Ś1 D2–4 अनुरूप(D3 °कूल)गुणाः(D4 तराः) पत्न्यो. —$^d$) Ś1 संततिर् (for त्वं पतिर्). B1 ईश्वरः; T2 आदृतः (for ईदृशः). —After 11, Ñ2 B1.3.4 D5.7 read 566*.

**12** D1 om. 12 (cf. v.l. 1). —$^a$) T1 G1 Cg नीच (for -शील). Ś1 D2 दुष्टात्मन् (for क्षुद्रा°). B4 T2 नृशंस क्षुद्रशीलात्मन्; Dg1 D4 T3 °शील: क्षुद्रात्मा; D3 °सातीव-दुष्टात्मन्. —$^b$) Dg1 Dt1 D4 T3 -कंटकः (for °क). Ñ2 V B1.3.4 D5.7 न मे जीवन्विमोक्ष्यसे (V1 °क्षणैः; B3 °क्ष्यसि). —$^c$) Ñ V B1.3.4 Dg1 Dm1 D5.7.8 T3 G2.3 M1 Cv.r.m.g यत् (for त्वत्). D6 कृतं (for °ते). V1 मुनिभिर् (for शङ्कितैर्). Ś1 Ñ V B1.3.4 D2.3.5.7 हव्यं (for अग्नौ). —$^d$) T2 प्राप्यते (for पात्यते). Ś1 Ñ V B1.3.4 D2.3.5.7 मुनिभिर्(V1 शंकितं) हूयतेनले; G2 ऋषिभिर्हूयते हविः. ❀ Cv : यत्कृत इत्यादि । यस्य ते हेतोः शङ्कितैर्मुनिभिः स्तूयते. ❀—After 12, Ś1 D2.3 ins. :

567* विश्वस्तानामविश्वस्तो मुनीनां भावितात्मनाम् ।

[ Ś1 अविश्वस्तं (for °स्तो). ]

—Then Ś1 D2.3 cont.; while Ñ V B1.3.4 D5.7 M2 ins. after 12 :

568* त इमेऽद्य हता दिष्ट्या मया तापसकण्टकाः ।
अधर्मस्य फलं सद्यः प्राप्तं तैरिह संयुगे ।
क्रूरात्मन्ब्रह्मविद्विष्ट त्यक्तधर्म सुपापकृत् ।
त्वं सद्यः कर्मणः पाप फलं पापमवाप्स्यसि ।

[ Ś1 D2.3 read l. 3 before l. 1. —(l. 1) Ñ2 D5.7 इह ते; V2 कृताशे (sic); B1 इमे ते; D3 तेन मे (for त इमे). Ś1 दृष्ट्वा (for दिष्ट्या). D3 तव (for मया). —(l. 2) M2 तस्य (for सद्यः). Ś1 D2.3 यैः सह; M2 यैरिव (for तैरिह). —(l. 3) Ñ1 B4 M2 दुरात्मन् (for क्रूरा°). Ñ2 B1.3 स्व- (for सु-). Ś1 D2.3 क्रूरात्मा सह रक्षोभिर्यैस्त्वं पापाभिवर्तसे. —Ś1 D2.3 om. l. 4. —(l. 4) Ñ2 D5.7 M2 त्व(M2 त)मद्य; B1 त्वं सत्य-; B3 त्वं तस्य; G(ed.) त्वं चाद्य (for त्वं सद्यः). G(ed.) कर्मणां (for °णः). M2 क्रूरं (for पाप). V1 मूलम् (for पापम्). Ñ1 फलं चैवमवाप्नुहि; B3 फलमेवोपभक्ष्यसि (for the post. half). ]

**13** D1 om. 13 (cf. v.l. 1). —$^a$) Ñ2 V B1.3.4 D5.7 अति(V2 B1.3 °भि)संक्रुद्धं; T2 M3 अतिसंरब्धं (for अभि°). G2 तमेव रामं संरब्धं; G(ed.) तमेव प्रतिसंक्रुद्धं. —$^b$) B3 Dt1 D6 वने (for रणे). Ñ1 ब्रुवाणं राघवो वचः. —$^c$) Ñ2 V B1.3.4 D5.7 वाचा (for खरो). Ś1 D2.3 नि(D3 [ऽ]भि)वर्तयामास (for निर्भर्त्स°). Ñ1 निर्भर्त्सयामास तदा. —$^d$) Dt1 D8 T3 M2 -स्वरः (for °नः). Ś1 D2.3 क्रोधात्खरतरं वचः; Ñ1 रामं खरतरं खरः; Ñ2 V2 B1.3.4 D5.7 कुपितः खरया खरः; V1 खरया कुपितः खरः; D6 रोषात्खरतरः खरः.

**14** D1 om. 14 (cf. v.l. 1). —$^a$) Ñ2 D5.7 त्वम् (for खलु). V1 विलिप्तोसि (for [अ]वलि°). —$^b$) M3 निर्भय (for °यः). Ś1 D2 भयेषु न बिभेषि च; Ñ V B1.3.4 D5.7 M2 भये सति सु(Ñ1 न सति; B3 महति)निर्भयः (B4 [m. also as above] दुर्जयः); D3 भयेषु च मायया च (sic). —$^c$) G1 damaged for वाच्या. T3 -[अ]वाक्यं (for °च्यं). Ś1 Ñ V B1.3.4 D5.7 यथा; D2 G1 तथा (for ततो). D3 वाचावाच्यं यथा हि त्वं. —$^d$) Dt1 D6 मृत्योर्वश्यो; D3 शृण्ववश्यं (for मृत्युवश्यो).

कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये ।
कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः ॥ १५
एवमुक्त्वा ततो रामं संरुध्य भृकुटिं ततः ।
स ददर्श महासालमविदूरे निशाचरः ॥ १६
रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन् ।
स तमुत्पाटयामास संदश्य दशनच्छदम् ॥ १७

तं समुत्क्षिप्य बाहुभ्यां विनर्दित्वा महाबलः ।
राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ॥ १८
तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान् ।
रोषमाहारयत्तीव्रं निहन्तुं समरे खरम् ॥ १९
जातस्वेदस्ततो रामो रोषाद्रक्तान्तलोचनः ।
निर्बिभेद सहस्रेण बाणानां समरे खरम् ॥ २०

G. 3. 35. 83
B. 3. 30. 20
L. 3. 29. 20

15 D1 om. 15 (cf. v.l. 1). —[a]) G1 एवं काल-; G2 मृत्युपाश- (for काल°). Ś1 D2.3 -परिक्षिप्तो. —[b]) D4 transp. भवन्ति and पुरुषा हि. B1.4(*sup. lin.*) हीमे; G2 च ये (for हि ये). Ś1 D2.3 भवेत (D3 °च) पुरुषो यदा. —Ś1 om. 15[cd]. —[cd]) M2.3 वाच्यावाच्यं (for कार्याकार्यं). M3 ये (for ते). Ñ V1 B1.3.4 D5.7 ते व्य(Ñ2 D5.7 चा)-तीतार्थं(B1.3.4 °स्म)चिंतकाः(V1 B1.4 दर्शनाः; B3 दर्शकाः); V2 व्यतीतार्थस्य दर्शकाः (for [d]). D2.3 वाच्यावाच्यं न जानाति(L[ed.] °नीते) प्राकृतोसौ भवेत्तदा. —After 15, Ñ2 V B1.3.4 D5.7 ins. :

569* यच्च मां मन्यसे राम निरस्त इति बालिश ।
नन्विदं काननं सर्वं स्यान्ममायुधसंज्ञितम् ।
सवृक्षोपलसंघातं सव्यालमृगसंकुलम् ।
शैलमुत्पाट्य वेगेन त्वद्वधाय सृजाम्यहम् ।

[(l. 1) V1 त्वं; B3 वै (for मां). Ñ2 D5.7 विशस्त्रम्; G(ed.) निरस्त्रम् (for °स्त). B3 बालिशः. —(l. 2) B3 यत्स्यात् (for सर्वं). D7 मया युधि (for ममायुध-). D5 -संज्ञिकं. B3 तत्सर्वं हि महायुधं (for the post. half). —(l. 4) Ñ2 D5.7 उत्पाद्य. V1 तद् (for त्वद्).]

16 D1 om. 16[ab] (cf. v.l. 1). —[a]) Ś1 उक्तस् (for उक्त्वा). Ñ1 illeg. from तो up to ध्य in [b]. Ś1 D2 तु संरब्धः; Ñ2 V B1.3.4 सुसंक्रुद्धः; D3 तु संरंभ्य (sic); D5.7 तु संक्रुद्धः (for ततो रामं). —[b]) D4 संनिरुध्य (hypm.); T2 संहृत्य (for संरुध्य). Dg1 Dt1 Dm1 D4 G1 भृकुटीं; D6 G3 Cr.g.k भ्रुकुटीं; Cm भ्रुकुटिं; Ct as in text (for °टिं). Ś1 Ñ2 V B1.3.4 D2.5.7 G2 M संहृत्य(Ś1 °स्तंभ्य; D2 °रभ्य; G2 °हृत्य)भृ(V1 भ्रू)कुटीं ततः(B1 °नुः); D3 संरंभाद्भ्रुकुटिं तदा. —Ś1 Ñ V B1.3.4 D1-3.5.7 M2 transp. 16[cd] and 17[ab]. —[c]) Ñ V B1.3 Dg1 Dm1(before corr. as in text) D2.3.5 महाशालम्; D1 °शाखं (for °सालम्). —[d]) D1 शालवृक्षमदूरतः.

17 Ś1 Ñ V B1.3.4 D1-3.5.7 M2 transp. 16[cd] and 17[ab]. —[a]) Ś1 रामे; D5 रण- (for रणे). Ś1 D2.3 प्रहरणार्थाय. D1 गदां प्रतिहतां दृष्ट्वा. —[b]) Ñ V B1.3.4 D5.7 M2 समंताद् (for सर्वतो हि). Ś1 D2.6 ह्यवलोकयत्; D1.4 G3 [ऽ]प्यव°; D3 G2 M3 व्यवलोकयन् (for ह्यव°). —D1 om. 17[cd]. —[c]) T2 सालम् (for स तम्). —[d]) Dt1 D6 Ct संदष्ट- (for °श्य). Ś1 D2.3 संद(D3 °ह्)ष्टौष्ठपुटो(Ś1 °टं) लघुः(Ś1 °घु). —For 17[cd], Ñ V B1.3.4 D5.7 M2 subst. :

570* तमुत्पाट्य ततो दोर्भ्यां संदष्टौष्ठपुटस्तदा ।

[Ñ1 D5.7 तमुत्पाद्य; V1 समुत्पाट्य (for तमु°). Ñ1 illeg. after ष्ठ. M2 बली (for तदा).]

18 [a]) G1 तत् (for तं). D1 समाक्षिप्य; T2 उत्पाट्य च; G2 M1 समुत्पाट्य (for °क्षिप्य). Ś1 D2.3 समुत्क्षिप्य महावृक्षम्; Dg1 M3 स तमुत्पाट्य बाहुभ्यां. —[b]) Ś1 D2.3 अभ्यधावन्; M3 विनदित्वा (for °र्दित्वा). D1 संदश्य दशनच्छदं. —For 18[ab], Ñ V B1.3.4 D5.7 M2 subst. :

571* अभिद्रुत्य स वेगेन विनद्य सुमहाबलः ।

[Ñ1 illeg. for वेगेन विनद्य सु. M2 रणे रामं (for स वेगेन). V विनिश्चस्य; B1 M2 विनद्य च (for विनद्य सु-). M2 खरस्तदा (for -महाबलः).]

19 [a]) D1 विशिखैश् (for बाणौघैश्). —[b]) T2 M3 भित्त्वा (for छित्त्वा). Ś1 D2.3 चिच्छेद रघुनंदनः. —D1 om. 19[c]-20[b]. —[c]) Ñ1 क्रोधम् (for रोषम्). G1 तूर्णं (for तीव्रं). —[d]) Ś1 Ñ1 D2.3 संयुगे (for समरे). —After 19, Ñ2 V B1.3.4 D5.7 ins. :

572* यं यं वृक्षं समादत्ते तं तं स रिपुसूदनः ।
चिच्छेद तिलशो रामः शरैः संनतपर्वभिः ।
युध्यमानस्य रामस्य नैपूणमस्ति संक्षयः ।
अगस्त्येन हि यच्चापं दत्तं वैष्णवमद्भुतम् ।
क्षिप्त्वा क्षिप्त्वा शरांस्तेन शिलावृक्षांश्च राघवः । [5]
क्रीडन्निव महाबाहुश्चिच्छेद तिलशः शरैः ।

[(l. 1) V स वृक्षमादत्ते (for वृक्षं समा°). Ñ2 D5.7 स रघुनंदनः; V B1 बल(B1 रिपु)निसूदनः (for स रिपु°). —(l. 2) Ñ2 D5.7 शतशो (for तिलशो). —B1.3 read l. 4 in marg. —(l. 4) V2 illeg. for न हि यच्चापं. Ñ2 V1 D5.7 च (for हि). V1 transp. चापं and दत्तं. V2 उत्तमं (for अद्भुतम्). —(l. 5) B1.3 क्षिप्तान्क्षिप्तान् (for क्षिप्त्वा क्षिप्त्वा). V शैल- (for शिला-). V1 B4 राक्षसः (sic); B1 रक्षसा (for राघवः).]

20 Ś1 om. (hapl.) 20; D1 om. 20[ab] (cf. v.l. 19). —[ab]) T1.2 G1.2 M1.3 तदा; M2 तथा (for ततो). Dg1 Dt1 D6 T3 रोष- (for रोषाद्). Ñ V B1.3.4 D2.3.5.7 transp. रामो and रोषाद्. Ñ2 D5.7 राजीवः; M3 संरक्त- (for रक्तान्त-). —[c]) D4 T2 G1.2 M1.3 तं बिभेद (for निर्बि°). —D7 reads in marg. after सहस्रे up to सहस्र in 21[d] (cf. var.). D2 सहस्राणि (for °स्रेण). —[d]) D3 शराणां संयुगे खरं.

G. 3. 35. 84
B. 3. 30. 21
L. 3. 35. 33

तस्य बाणान्तराद्रक्तं बहु सुस्राव फेनिलम् ।
गिरेः प्रस्रवणस्येव तोयधारापरिस्रवः ॥ २१
विह्वलः स कृतो बाणैः खरो रामेण संयुगे ।
मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद्द्रुतम् ॥ २२
तमापतन्तं संरब्धं कृतास्त्रो रुधिराप्लुतम् ।
अपासर्पत्प्रतिपदं किंचित्त्वरितविक्रमः ॥ २३

ततः पावकसंकाशं वधाय समरे शरम् ।
खरस्य रामो जग्राह ब्रह्मदण्डमिवापरम् ॥ २४
स तद्दत्तं मघवता सुरराजेन धीमता ।
संदधे च स धर्मात्मा मुमोच च खरं प्रति ॥ २५
स विमुक्तो महाबाणो निर्घातसमनिःस्वनः ।
रामेण धनुरुद्यम्य खरस्योरसि चापतत् ॥ २६

---

21 D7 reads 21 mostly in marg. (cf. v.l. 20). D1 om. 21. —$^{ab}$) M1 तस्मिन्; M2.3 तत्र (for तस्य). Ñ1 illeg. from रा up to स्रा- in $^{b}$. Ś1 [अं]तरं; D3.4.8 G2.3 M °तरे (for °राद्). Ñ2 V B1.3.4 D5.7 तस्य बाणांतरेभ्यस्तु (for $^{a}$). D6 (after corr. *sec. m.*; before corr. as in text) सुगात्र- (for सुस्राव). Dg1 transp. बहु and सुस्राव. Ś1 तत्तदा; Ñ V B1.3.4 D5.7 शोणितं; D3 वै तदा; G2 ते फलं (sic); G3 फेनिलः (sic); M3 (*inf. lin. sec. m.* also) फेनितं (for °लम्). D2 रक्तं च बहु सुस्राव बाणैर्भिन्नः सुराक्षसः. —$^{c}$) Ś1 प्रस्रवणांतस्य; Ñ1 °णादेव; Ñ2 V B1.3.4 D5.7 प्रस्रावि(B1 °स्रव)ण इव; D2.3 प्रस्रवमाणस्य; D4 °तो यद्वत् (for °णस्येव). —$^{d}$) G2 -पथि (for -परि-). Ś1 D2.3 तोयधारा इवांबरात्(D3 इवास्रवत्); Ñ V B1.3.4 D5.7 T3 M2 °राः सहस्रशः (T3 प्रसुस्रवाः).

22 $^{ab}$) Dt1 D4.8 Ct विकलः (for विह्व°). Ś1 D2 च; D3 तु (for स). D1 क्षतो (for कृतो). D3 transp. कृतो and खरो. T2 भित्त्वाथ (for रामेण). Ś1 D2.3 धीमता (for संयुगे). —$^{d}$) Ñ2 V B4 Dm1 D5.7.8 G3 [अ]भ्यपतद् (for °द्रवद्).

23 D1 om. 23; Ñ1 om. (hapl.?) 23$^{ab}$. —$^{a}$) Ñ2 V B1.3.4 D5.7 वेगेन; Dt1 D3.4.6 संक्रुद्धं; Dm1 D8 G3 संप्रेक्ष्य (for °रब्धं). Ś1 D2 तमेवाभ्य(D2 °भि)द्रवत्क्रुद्धं. —$^{b}$) G2 हतास्त्रो; M2 दीप्तास्यं (for °स्त्रो). Ś1 D2.3 कृतां(D2 कृत्तां; D3 कृत्वां)गं रुधिरोक्षितं; Ñ2 V B1.3.4 D5.7 दीप्तास्यं रुधिरप्लुतं; D4 रुधिरौघपरिप्लुतं. —$^{c}$) Ś1 D2 अपसर्पन्(D2 °त्); T2 क्षपासृपत् (for °सर्पत्). Dt1 D6 Ct द्विस्त्रिपदं (for प्रति°). Ñ V B1.3.4 D5.7 M2 अप(B3.4 °पा)सृत्य(M2 अपासर्पन्) ततः स्था(Ñ1 °**** illeg.)नात्. ❀ Cv : अपासर्पदिति पाठः। तमधिकृत्य अन्ये पुनरेवं व्याचक्षते। तमापतंतं वर्जयित्वा असर्पत् अगच्छत् प्रतिपदं प्रतिमार्गम्। आगतेनैव मार्गेण पृष्ठतोगच्छदित्यर्थं इति. ❀ —$^{d}$) Ñ2 V B1.3.4 D5.7 दृष्ट्वा (for किंचित्). Ñ1 त्वलघु- (for त्वरित-). Ñ2 V2 B3.4 D5.7 G1 -विक्रमं. Ś1 किंचिच्चैव परिक्रमन्.

24 $^{a}$) Ñ1 V B1.3.4 D5.7 दीप्त- (for ततः). Ś1 -संकाशः. —Ñ1 illeg. for 24$^{b}$. —$^{b}$) Dg1 M2 खरं (for श°). Ś1 प्रज्वलन्निव तेजसा; Ñ2 V B1.3.4 D5.7 प्रज्वलंत(B3 निश्वसंत)मिवोरगं(B3 before corr. °वापरं). —Ś1 om. 24$^{c}$-26; V1 om. 24$^{cd}$. Ñ2 V2 B1.3.4(B3.4 marg.) D5.7 read 24$^{cd}$ after l. 3 of 574*. —$^{c}$) Ñ1 illeg. from जग्राह up to 25$^{a}$. —$^{d}$) D1 [ऊ]र्जितं; D2.4 T2 M3 [उ]ग्रतं (for [अ]परम्).

25 Ś1 om. 25; Ñ1 illeg. for 25$^{a}$ (for both, cf. v.l. 24). —$^{a}$) Dg1 Dm1 D4.8 T3 G3 तु; D1 T1.2 M2.3 तं (for तद्). D1.3 अगस्त्येन (for मघवता). ❀ Ck : मघवता दत्त इति. ❀ D2 उग्रमस्त्रं महद्दत्तं. —After 25$^{a}$, D3 ins. :

573* मुनिना दीप्ततेजसम्।
उग्रमस्त्रं महद्दत्तं.

—$^{b}$) D1 मुनिना दीप्ततेजसा. —Ñ1 mostly illeg. for 25$^{c}$. —$^{c}$) D4 चैव; T1 G1 चापि; M3 स च (by transp.) (for च स). D1 संधाय कार्मुकं वीरो; D2.3 संधाय रामो धर्मात्मा; M2 संदधे चापमुद्यम्य. —$^{d}$) D2.3 [आ]शु (for च). —For 25, Ñ2 V B1.3.4 D5.7 subst. :

574* निशितं पञ्चपर्वाणं पञ्चपन्नगजिह्मगम्।
स्वयं दत्तं मघवता सहस्राक्षेण वज्रिणा।
रक्षणार्थममित्रघ्नं पुरा रामस्य धीमतः।
तमिन्द्राशनिसंकाशं संधाय स ततः शरम्।
चिक्षेप समरे रामो वधार्थं तस्य रक्षसः। [5]

[(l. 1) V2 -पद्मम् (for -पत्रम्). —(l. 2) V भगवता (for मघ°). —After l. 3, Ñ2 V2 B1.3.4 D5.7 read 24$^{cd}$. —(l. 4) V1 स च (for तम्). V1 तं संधाय (for संधाय स). B4 परं (for शरम्). —V2 illeg. from l. 5 up to 35. —(l. 5) B4 राक्षसः (sic) (for र°).]

26 Ś1 om. 26 (cf. v.l. 24). V2 illeg. for 26 (cf. v.l. 25). —$^{a}$) M2 निर्मुक्तो (for वि°). D2.3 स वै(D3 हि) मुक्तो महावेगो. —$^{b}$) Dg1 निर्घोष- (for निर्घात-). Dt1 -समर- (hypm.) (for -सम-). Dt1 Dm1 D6.8 T G1.3 M -निस्वनः. D1 सधूमः पावकोपमः. —$^{cd}$) Ñ Dg1 Dt1 Dm1 D2-8 T1.2 G M1 Cm.g.k.t आयम्य; V1 M3 आनम्य (for उद्यम्य). —Ñ1 illeg. for 26$^{d}$. G3 [उ]परि (for [उ]रसि). Dg1 [अ]ताडयत्; D4 T2.3 G1.2 M1 Cm [अ]पातयत्; T1 [अ]वापतत् (for चाप°). Ñ2 V1 B1.3.4 D5.7 नि(V1 स)पपात खरोरसि; D2.3 खरस्योपरि पातितः; M2.3 खरोरसि पपात ह (for $^{d}$). ❀ Ck : खरस्योरसि चापतदिति पाठः. ❀ D1 रामास्त्रो गिरिशृंगाभं जघान समरे खरं. —After 26, Ñ(Ñ1 only l. 4) V1 B1.3.4 D5.7 ins. :

स पपात खरो भूमौ दह्यमानः शराग्निना ।
रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथान्धकः ॥ २७
स वृत्र इव वज्रेण फेनेन नमुचिर्यथा ।
बलो वेन्द्राशनिहतो निपपात हतः खरः ॥ २८
ततो राजर्षयः सर्वे संगताः परमर्षयः ।
सभाज्य मुदिता राममिदं वचनमब्रुवन् ॥ २९
एतदर्थं महातेजा महेन्द्रः पाकशासनः ।
शरभङ्गाश्रमं पुण्यमाजगाम पुरंदरः ॥ ३०
आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ।
एषां वधार्थं क्रूराणां रक्षसां पापकर्मणाम् ॥ ३१

G. 3. 35. 103
B. 3. 30. 36
L. 3. 35. 44

---

575* सुपर्णानिलवेगेन तेनाभिपतता खरः ।
सहमर्मास्थिसंवातो भिन्नः क्रौञ्च इवाचलः ।
पपात वज्रसंकाशः प्रज्वलन्निव सायकः ।
शक्रेणैव विनिर्मुक्तो वज्रस्तरुवरोपरि ।

[ (l. 1) V1 [ अ ]द्भुतरता; B1.3.4 °भिपतिता( B1 °तः ) ( for °तता ). —(l. 2) V1 B3.4 -वर्म-; B3( *sup. lin.* also ) -चर्म- ( for -मर्म- ). B1.3 भिन्न- ( for भिन्नः ). —(l. 3) V1 B4 स ज्वलन् ( for प्रज्व° ). B1.4 ( m. also ) पावकः; B3 रक्षसः ( for सायकः ). —(l. 4) V1 D5 [ इ ]व ( for [ ए ]व ). Ñ1 विनिर्मुक्तं ( for °क्तो ). Ñ1 वज्रं. D7:-[ उ ]रपि ( meta. ) ( for -[ उ ]परि ). ]; while D2.3 ins. after 26 :

576* ततः पावकसंकाशः प्रज्वलन्निव तेजसा ।

[ D3 शरः ( for ततः ). ]

**27** V2 illeg. for 27 ( cf. v.l. 25 ). —[b]) Ś1 Ñ1 V1 D2.3 इव ( for शर- ). Ñ2 D5.7 दग्धः शाल इवाग्निना. —[c]) D5.7 वज्रेण ( for रुद्रेण ). Dg1 D7 M3 [ ए ]व ( for [ इ ]व ). Ñ1 illeg. from दग्धः up to 27[d]. V1 पुरा दग्धः; D2 यथा दग्धः ( for विनिर्दग्धः ). D1 रुद्रस्य शरनिर्दग्धः; M2 रुद्रकोपाग्निनिर्दग्धः. —[d]) Ñ2 V1 B1.3.4 D5.7 पुरांधकः; D4.6 T2 G M Cg.t यथांतकः; Ck as in text ( for °न्धकः ). Ś1 D1-3 श्वेतस्यार्थे यथांतकः.

28 V2 illeg. for 28 ( cf. v.l. 25 ). Ñ1 om. 28; G2 om. 28[ab]. —[a]) B4 रुद्रेण ( for वज्रे° ). —[b]) V1 शक्रेण; D4 इंद्रेण ( for फेनेन ). —[cd]) V1 B1 राघवेंद्र-; Dm1 D8 G3 बलो यथा; D4 बलश्चेंद्र-; G1 Ck बलो वज्र- ( for बलो वेन्द्र- ). Ñ2 D5.7 राघवेण स( D7 स राघवेण ) निहतो; D1 बाणेनेंद्राशनिसमो; M2 बलो यथेंद्राशनिना; G( ed. ) राघवास्त्रेण निहतो ( for [c] ). G2 पपात च ( for निपपात ). Ñ2 V1 B1.3.4 D5.7 खरस्तदा; D1 हतस्तदा; G1 हतः क्षितौ ( for हतः खरः ). Ś1 D2.3 वेगेनेंद्राशनिनिभः पपात निहतः खरः. —After 28, Ñ2 V1 B1.3.4 D5.7 ins. :

577* ततः कलकलोन्मिश्रो देवदुन्दुभिनिस्वनः ।
साधु साध्विति शब्दश्च अन्तरीक्षेऽभ्यवर्तत ।
राममूर्ध्न्यपतद्दिव्या पुष्पवृष्टी रणाजिरे ।
हत एव दुरात्मेति शुश्रुवे दिक्षु निस्वनः ।

[ (l. 2) Note hiatus between the two halves. D5 शब्देन ( for शब्दश्च ). —(l. 3) D7 [ आ ]पतद्. B3 रामस्य मूर्ध्नि पतिता ( for the prior half ). —(l. 4) B3 निःस्वनः. ]; while Dt1 D6 ins. 581* after 28.

29 V2 illeg. for 29 ( cf. v.l. 25 ). —[a]) Ś1 D2.3 देवर्षयः ( for राज° ). —[b]) Ś1 D2.3 गंधर्वाश्च महर्षयः; Ñ1 B1.3.4 Dg1 Dm1 D1.8 T3 G3 संगताश्च( Dg1 °ताः स ) महर्षयः; Ñ2 V1 D5.7 संहताश्च सहस्रशः. —After 29[ab], Ñ2 V1 B1.3.4 D5.7 ins. :

578* देवर्षयश्च सहिता दृष्ट्वा ब्रह्मर्षिभिः सह ।
अवतीर्य महीं सर्वे प्रज्वलन्तो यथाग्नयः ।

[ (l. 1) Ñ2 D5.7 संहृष्टा ( for सहिता ). V1 हृष्टा ( for दृष्ट्वा ). ]
—[c]) Ñ1 संप्राप्य; Dg1 T3 संपूज्य; D1 सभार्यं; T1 समेत्य; T2 संगत्य ( for सभाज्य ). Ś1 मुदितं ( for °ता ). Ñ2 V1 B1.3.4 D5.7 सभाजयित्वा मुदिताः; D3 संहत्य मुदिताः सर्वे. —[d]) Ñ2 V1 B1.3.4 D5.7 रामं ( for इदं ). D3.8 अब्रवीत् ( sic ) ( for अब्रुवन् ). Dt1 D6 T2 सागस्त्या इदमब्रुवन् ; D1 प्रस्थिताः प्रांजलयोब्रुवन् ( hypm. ). —After 29, Ñ2 V1 B1.3.4 D5.7 ins. :

579* धर्मज्ञ वर्तसे दिष्ट्या क्षत्रधर्मेण राघव ।
दिष्ट्या तवर्षयः सर्वे स्वस्तिकर्मसु तत्पराः ।
दिष्ट्या हतोऽयं पापात्मा त्वया ब्राह्मणकण्टकः ।
त्वत्प्रसादादरण्येषु विचरिष्यन्ति तापसाः ।
दिष्ट्यासि सहितस्तात लक्ष्मणेन महात्मना । [5]
सीतया चानया राम तापसैश्च महात्मभिः ।

[ (l. 1) V1 B4 वर्धसे ( for वर्त° ). B1.3 धर्मः प्रवर्तते दिष्ट्या ( for the prior half ). —(l. 2) V1 महर्षयः; B1 देव°; B3 ते ऋषयः ( for तव° ). B4 प्राप्ताः ( for सर्वे ). V1 -कर्मणि ( for °सु ). —(l. 3) Ñ2 V1 D5 [ ऽ ]सौ ( for ऽयं ). —(l. 6) Ñ2 D5.7 महर्षिभिः ( for महात्मभिः ). ]

30 V2 illeg. for 30 ( cf. v.l. 25 ). —[a]) Ñ2 V1 B1.3.4 D5.7 इत्यर्थं हि ( for एतदर्थं ). G( ed. ) महाराज ( for °तेजा ). —[d]) G2 आगतोभूत् ( for आजगाम ). Ś1 D2.3 महीतलं; Ñ1 सुरेश्वरः; L( ed. ) महीतले ( for पुरंदरः ).

31 V2 illeg. for 31 ( cf. v.l. 25 ). —[a]) Ñ1 illeg. for आनीतस्त्व. Dm1 T3 इदं ( for °मं ). —[c]) L( ed. ) एवं ( for °षां ). B3 घोराणां; Dt1 D6 G3 शत्रूणां; Dm1 D2-4.8 शू° ( for क्रूराणां ). Ś1 Dg1 T3 तेषां( Ś1 एतद् ) वधार्थं शूराणां. —[d]) Ś1 B1 D2.3 G2 क्रूरकर्मणां; V1 पापकर्मिणां ( for °कर्मणाम् ). —After 31, Ś1 ins. 580*.

G. 3. 35. 104
B. 3. 30. 36
L. 3. 35. 45

तदिदं नः कृतं कार्यं त्वया दशरथात्मज ।
सुखं धर्मं चरिष्यन्ति दण्डकेषु महर्षयः ॥ ३२
एतस्मिन्नन्तरे वीरो लक्ष्मणः सह सीतया ।
गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमं सुखी ॥ ३३

ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ।
प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिवादितः ॥ ३४
तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ ३५

इति श्रीरामायणे अरण्यकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

---

32 V2 illeg for 32 (cf. v.l. 25). Ś1 om. 32.—[ab]) Dm1 तदेव (for तदिदं). Ñ1 हि (for नः). D2.3 सत्कृतं; M2 नस्त्वया (for नः कृतं). D3 राष्ट्रं (for कार्यं). Ñ V1 B1.3.4 D1.5.7 transp. कृतं and त्वया. —[c]) Dt1 D6 T2 G2 स्व(D6 स)धर्मं प्रचरिष्यंति. —[d]) Ñ2 V1 B1.3.4 D5.7 मुनयो दंडके वने. —After 32, Ñ V1 B1.3.4 D2.3.5.7 ins.; while Ś1 ins. after 31; M2 ins. l. 1–6 after l. 8 and l. 7–8 after l. 9 of 581*:

580* एते देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
जयाशीर्भिः स्तुवन्ति त्वां विस्मिताः पश्य राघव ।
इदं दृष्ट्वा सुयुद्धं ते ब्रह्मा ब्रह्मविदां वरः ।
देवैः परिवृतः सर्वैर्विस्मितस्त्वां सभाजयन् ।
प्रीतश्चैव महादेवः सर्वैः पारिषदैर्वृतः । [5]
जयेन त्वां विमानस्थः सभाजयति राघव ।
एवमुक्तस्तु धर्मात्मा मुनिभिर्धर्मवत्सलैः ।
नमश्चक्रे विमानस्थान्दृष्ट्वा दूराद्दिवौकसः ।

[(l. 2) Ñ2 B1.4 D5.7 स्तुवंतस् (for °न्ति). Ñ1 त्वां स्तुवंतो जयाशीर्भिः (for the prior half). Ñ D5.7 विष्ठिताः; V1 विजिताः; B1.3 धिष्ठिताः; B4 वेष्टिताः (for विस्मिताः). D3 पार्थिव (for राघव). —Ñ1 om. (hapl.) l. 3–6. —(l. 3) Ś1 पूज्यनाम्नो; Ñ2 V1 D2.7 तु युद्धं ते (for सुयुद्धं ते). D5 इदं युद्धं तु ते दृष्ट्वा (for the prior half). —Ś1 om. from ब्रह्मा in l. 3 up to स्थान् in l. 8. D3 युद्धं (for ब्रह्मा). —(l. 4) B1.3 D5 परिवृतः (for °वृतः). Ñ2 D5 विष्ठितस्; D2 वेष्टितस्; D3 धिष्ठितस्; D7 विष्टंतस् (sic) (for विस्मि°). D2 सभाजयत. V1 विस्मितस्त्वाभिनंदति (for the post. half). —B4 reads l. 5–8 in marg. —(l. 5) Ñ2 V1 परिषदैर्; M2 पार्षदैर् (subm.) (for पारि°). D2 सह (for वृतः). D3 सर्वैस्तैः पार्षदैः सह (for the post. half). —(l. 6) D3 जयेति त्वां; L(ed.) जये त्वां च (for जयेन त्वां). —(l. 7) Ñ2 D5.7 स (for तु). B3 स धर्मात्मा (hypm.) (for धर्मा°). Ñ1 D2.3 M2 भावितात्मभिः (for धर्मवत्सलैः). —(l. 8) M2 मनश् (meta.) (for नमश्). G(ed.) दूरे (for दूराद्).];
while Dg1 Dm1 D4.8 S ins. after 32; whereas Dt1 D6 ins. after 28:

581* एतस्मिन्नन्तरे देवाश्चारणैः सह संगताः ।
दुन्दुभींश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः ।
रामस्योपरि संहृष्टा ववर्षुर्विस्मितास्तदा ।
अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ।
चतुर्दश सहस्राणि रक्षसां कामरूपिणाम् । [5]
खरदूषणमुख्यानां निहतानि महामृधे ।
अहो बत महत्कर्म रामस्य विदितात्मनः ।
अहो वीर्यमहो दाक्ष्यं विष्णोरिव हि दृश्यते ।
इत्येवमुक्त्वा ते सर्वे ययुर्देवा यथागतम् ।

[(l. 1) M3 वीराश् (for देवाश्). —(l. 2) Dg1 Dt1 Dm1 D4.6 T2 M दुंदुभीश् (for °भींश्). D4 T3 [अ]पि (for °भि-). —(l. 3) Dg1 M2.3 ववृषुर्; T2 बभूवुर् (for ववर्षुर्). —(l. 4) G2 अर्धाधिकं (for °धिक-). —(l. 5) K(ed.) भीमकर्मणां (for कामरूपि°). —(l. 6) Dg1 T1 महाहवे; G2° रणे (for °मृधे). —(l. 8) Dt1 D6 T1 M1 दार्ढ्यं; D4 धैर्यं (for °क्ष्यं). —After l. 8, M2 ins. l. 1–6 of 580*. —(l. 9) T2 G1 यथासुखं (for °गतम्). —After l. 9, M2 ins. l. 7–8 of 580*.]

33 V2 illeg. for 33 (cf. v.l. 25). —[a]) Ñ1 दूराद् (for वीरो). —[b]) M1 transp. सह and सीतया. —[c]) Ñ1 D1–3 विनिःक्रम्य; Ñ2 V1 B1 D5.7 विनिःसृत्य; B3 °गत्य; T2 च निष्क्रम्य (for °ष्क्रम्य). —[d]) Dt1 D6 [आ]श्रमे (for °मं). Dm1 D8 सुखं (for °खी). Ś1 Ñ V1 B1.3.4 D2.3.5.7 पुनरायात्स्वमाश्रमं. ❀ Cv : दण्डकेषु महर्षयः इत्यतः परं एतस्मिन्नन्तरे......लक्ष्मणः सह सीतया इत्येष पाठक्रमः प्रायेण कोशेषु लेखकप्रमादपतितः ।; Ck : दाक्ष्यं सामर्थ्यम् । एतस्मिन्नन्तर इति । देवनिर्गमनसमय इत्यर्थः । स्तुतिसंतोषादौ पौनःपुन्यमलंकार इत्यादावेवोक्तं. ❀

34 V2 illeg. for 34 (cf. v.l. 25). —[a]) Ś1 Ñ V1 B1.3.4 D1–3.5.7 M2 राघवोपि (D1 ततो रामः) खरं हत्वा. —[c]) D1 आजगाम (for प्रविवेश). Ś1 Ñ V1 B1.3.4 D1–5.7 M2 [आ]श्रमपदं (for °मं वीरो). —[d]) Ñ2 D5.7 [अ]भिवंदितः; Dt1 D6 T1 G1 °पूजितः (for °वादितः).

35 V2 illeg. for 35 (cf. v.l. 25). —[a]) D1 खर- (for शत्रु-). Ś1 Ñ V1 B1.3.4 D2.3.5.7 M2 दृष्ट्वा विजयिनं रामं. —[b]) D1 तपस्विभयनाशनं. —[d]) D1 चाभिषस्वजे (for परि°). —For 35[cd], Ś1 Ñ V1 B1.3.4 D2.3.5.7 M2 subst.:

582* सीता परमसंहृष्टा परिष्वज्येदमब्रवीत् ।

# ३०

ततः शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश ।
हतान्येकेन रामेण रक्षसां भीमकर्मणाम् ॥ १
दूषणं च खरं चैव हतं त्रिशिरसं रणे ।
दृष्ट्वा पुनर्महानादं ननाद जलदोपमा ॥ २
सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम् ।
जगाम परमोद्विग्ना लङ्कां रावणपालिताम् ॥ ३

G. 3. 36. 3
B. 3. 32. 3
L. 3. 36. 3

[ D3 परिपूज्य ( for °ध्वज्य ). D2 [ ए ]नम् ( for [ इ ]दम् ). ]

—Then all the above MSS. cont.:

583* दिष्ट्यार्यपुत्र सत्या ते प्रतिज्ञा सफला कृता ।
मुनीनां सततं शत्रुं हत्वा तं राक्षसं खरम् ।
सुखं धर्मं चरिष्यन्ति मुनयो हतकण्टकाः ।
त्वद्बाहुबलमाश्रित्य वनेऽस्मिन्नियतेन्द्रियाः ।
ततः समाश्वास्य महाधनुर्धरः [5]
समाहितोऽभ्यर्च्य मुनीन्समागतान् ।
महाहवे शत्रुबलाभिमर्दनो
दिवीव शक्रः स रराज राघवः ।
ततः स रामो मुदितः सलक्ष्मण
आश्वास्य सीतां मृगचारुलोचनाम् [10]
उवास तस्मिन्मुदितस्तदाश्रमे
सभाज्यमानो मुनिभिः समागतैः ।

[ (l. 1) B4 सत्यं ( for °त्या ). B3.4 D7 सफली-. —(l. 2) V1 संततं; M2 सवलं ( for सततं ). Ś1 Ñ1 D2 [ ए ]नं; D3 [ इ ]मं ( for तं ). —Ñ1 partly illeg. —(l. 4) B4 तद्- ( for त्वद् ). Ś1 D2 ह्यस्मिन्नियमितेंद्रिया: ( for the post. half ). —Ś1 D2.3 M2 om. l. 5–8. —(l. 6) B4 समाहितान् ( for °गतान् ). —(l. 7) G( ed. ) महारणे ( for °हवे ). V1 B3 -[ अ ]वमर्दनो ( B3 °र्षणो ) ( for -[ अ ]भि° ). —(l. 8) V1 D7 सुरराज ( for स रराज ). —M2 ins. l. 9–12 after 584*. —(l. 9) Ñ2 D5.7 स लक्ष्मणं; M2 °णाम् ( for °ण ). —(l. 10) Ś1 Ñ1 ह्याश्वास्य; V1 प्रशास्य; B1.3.4 प्रशस्य; M2 lacuna; G( ed. ) प्राश्वास्य ( for आ° ). D5 मृदु- ( for मृग- ). Ñ1 illeg. for चारुलोचनां. D2 प्रशस्यमानो मृगलोचनायुतः; D3 प्रशस्य तामायतचारुलोचनः. —(l. 11) D2 विवेश ( for उवास ). Ś1 D2.3 स्वमा( Ś1 °का )श्रमे; Ñ1 illeg. ( for तदाश्रमे ). —(l. 12) B1 मुदितः ( for मुनिभिः ). ] ;

while Dg1 Dt1 Dm1 D1.4.6.8 S ( M2 after l. 4 of 583* ) ins. after 35:

584* मुदा परमया युक्ता दृष्ट्वा रक्षोगणान्हतान् ।
रामं चैवाव्ययं दृष्ट्वा तुतोष जनकात्मजा ।
ततस्तु तं राक्षससंघमर्दनम् ।
सभाज्यमानं मुदितैर्महर्षिभिः ।
पुनः परिष्वज्य शशिप्रभानना । [5]
बभूव हृष्टा जनकात्मजा तदा ।

[ D1 M2 om. l. 1–2. —(l. 1) T1 युक्तं. D6 [ अ ]रण्ये ( for रक्षो- ). —(l. 2) T1.2 G1.2 M3( *inf. lin. sec. m.* also ) [ अ ]व्ययं ( for °यं ). —(l. 3) D1 तद्- ( for तं ). D1 -सैन्य- ( for -संघ- ). —(l. 4) Dt1 D6 संपूज्यमानं; D1 संभाष्यमाणं; M2 संभाज्यमानो ( for सभाज्य° ). Dt1 D6 महात्मभिः ( for महर्षि° ). —(l. 5) G1 -[ आ ]ननं. Dt1 D1.4.6 T3 G2 मुदान्विता( D1 °शुभा )नना; M2 मुदान्वितं पतिं ( for शशिप्रभानना ). —(l. 6) M2 ( before corr. *sec. m.* ) जनकेश्वरात्मजा ( for °कात्मजा तदा ). ]

—Then M2 ins. l. 9–12 of 583*.

Colophon. —*Sarga name* : Ś1 Ñ V B1.3.4 D1–3.5.7 **खरवधः**. —*Sarga no.* ( figures, words or both ) : Ś1 Ñ1 B1.3 D2 om.; Ñ2 D5.7 36; V1 35; V2 37; B4 38; Dg1 Dt1 Dm1 D4.6.8 T G M1 30; D1 34; D3 39; M2.3 31. —After colophon, G concludes with **श्रीरामाय नमः**.

## 30

Before Sarga 30, Dg1 Dt1 Dm1 D4.6.8 S ins. an addl. Sarga ( Akampana episode ) which is relegated to App. I ( No. 10 ). T2 begins with **श्रीरामचन्द्राय नमः**; M1 with **श्रीरामाय नमः**.

1 [a] ) Ś1 Ñ V B1.3.4 D2.3.5.7 M2 **तानि** ( for **ततः** ). —After **शूर्पणखा**, G2 ins. **राम**. G1 **घोरा** ( for **दृष्ट्वा** ). B3 **दृष्ट्वा शूर्पणखा** ( by transp. ).

☞ V2 illeg. from 1[cd] for the whole Sarga. —[c] ) Ś1 D2 **रामेणैकेन** ( by transp. ). —[d] ) G2 **क्रूरकर्मणां** ( for **भीम°** ). Ś1 Ñ V1 B1.3.4 D2.3.5.7 **मानुषेण पदातिना**.

2 [ab] ) Dm1 D8 G3 **हतं** ( for **खरं** ). D4 G1 **तथा** ( for **रणे** ). Dg1 Dm1 D8 T G2.3 M1.3 **हतं**( Dg1 T2.3 **हतौ**; Dm1 D8 G3 **खरं** ) **त्रिशिरसा सह** ( for [b] ). Ś1 D2 **जिताहवान्महामर्षान्दुर्धर्षान्सुमहाबलान्**; Ñ V1 B1.3.4 D3.5.7 M2 **खरं त्रिशिरसं चैव दूषणं च**( Ñ1 **वि** ) **निपातितं**( D3 **महाबलं** ); D1 **दूषणं निहतं दृष्ट्वा खरं च विनिपातितं**. —Ñ2 V1 B4 D5.7 om.; B1.3 read 2[cd] in marg. —[c] ) Ś1 B1.3 D2.3 **हतान्** ; Ñ1 *सा ( illeg. ) ( for **पुनर्** ). Ś1 B1.3 Dt1 D6 G **महानादान्** ; Cg.k as in text ( for °**दं** ). D1 **संत्रस्ता सुमहानादं**; M3 **दृष्ट्वानुजान्महारौद्रान्** . —[d] ) Ś1 Dg1 D1–4 T3 **जलदोपमं**; B1.3 **जलदोपमान्** ; T1 G1.2 M2.3 **जलदो यथा**.

3 [a] ) Ś1 D1–3 **तद्** ( for **सा** ). Ś1 Ñ V1 B3.4 D1–3.5.7 M2.3 **रामेण** ( for **रामस्य** ). —[b] ) Ś1 **सैन्यैः** ( for **अन्यैः** ). Dg1 D2.5 **सुदुःकरं**. V1 B1 D1 **कृतमन्येन दुःक**( B1 °**ष्क** )**रं**. —[c] ) G2 **जघान** ( for **जगाम** ). Ś1 Ñ V1 B1.3.4 D2.3.5.7 **आजगाम समुद्विग्ना**( D5.7 **सुसंविग्ना** ).

G. 3. 36. 3
B. 3. 32. 4
L. 3. 36. 4

सा ददर्श विमानाग्रे रावणं दीप्ततेजसम् ।
उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम् ॥ ४
आसीनं सूर्यसंकाशे काञ्चने परमासने ।
रुक्मवेदिगतं प्राज्यं ज्वलन्तमिव पावकम् ॥ ५
देवगन्धर्वभूतानामृषीणां च महात्मनाम् ।
अजेयं समरे शूरं व्यात्ताननमिवान्तकम् ॥ ६
देवासुरविमर्देषु वज्राशनिकृतव्रणम् ।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम् ॥ ७
विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम् ।
विशालवक्षसं वीरं राजलक्षणलक्षितम् ॥ ८
स्निग्धवैदूर्यसंकाशं तप्तकाञ्चनकुण्डलम् ।
सुभुजं शुक्लदशनं महास्यं पर्वतोपमम् ॥ ९
विष्णुचक्रनिपातैश्च शतशो देवसंयुगे ।
आहताङ्गं समस्तैश्च देवप्रहरणैस्तथा ॥ १०
अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम् ।
क्षेप्तारं पर्वताग्राणां सुराणां च प्रमर्दनम् ॥ ११
उच्छेत्तारं च धर्माणां परदाराभिमर्शनम् ।
सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा ॥ १२

---

4 $^{b}$) M2 भ्रातरं (for रावणं). Ñ2 V1 B1.3.4 D5.7 लोकरावणं (for दीप्ततेजसम्). —$^{c}$) Ś1 Ñ2 V1 B1.3.4 D2.3.5.7 सहोपविष्टं; T3 उपोपविष्टैः.

5 $^{a}$) Ś1 B3.4 D1–4 M3 सूर्यसंकाशं. —Ś1 om. 5$^{bc}$. —$^{c}$) Ñ1 B1.3.4 Dg1 D2.3 M2 रुक्मवेदीगतं; Ñ2 D5.7 °वेदीस्थितं; M3 °वेदीकृतं. Ñ1 M2 पूज्यं; Ñ2 V1 B1.3.4 D5.7 देवं; D1.3 दिव्यं; D2 साज्यं; T2 प्राप्य (for प्राज्यं). —After 5, Ś1 Ñ V1 B1.3.4 D1–3.5.7 read 8 and 9.

6 Ś1 om. 6$^{ab}$. —$^{a}$) G(ed.) -दानव- (for -गन्धर्व-). Ñ V1 B1.3.4 D5.7 M2 -यक्षाणाम्; T2 -नागानाम् (for -भूतानाम्). —$^{b}$) D4 भावितात्मनां (for च महात्मनाम्). —$^{c}$) D4 T2 M1 अजय्यं. Dt1 D6 T1.2 घोरं; D1 शत्रुं (for शूरं). V1 अजेयं सर्वभूतानां. —$^{d}$) Ś1 D2.3 स्थितं व्यक्तम् (for व्यात्ताननम्).

7 $^{b}$) Ś1 Dg1 D2 T3 शक्राशनि-; Ñ1 बहुषु सु- (for वज्राशनि-). D5 -कृताव्रणं. —After 7$^{ab}$, D5 ins.:

585* कृतागसं विमलैश्च देवप्रहरणै रणे ।

—$^{c}$) Ś1 Ñ2 V1 B1.4 D1.2.5.7 ऐरावण- (for °वत-). Ñ2 B3 D5.7 -विषाणैश्च (for °णाग्रैर्). —$^{d}$) K(ed.) Cg उद्धृष्ट-; Cm*p* as in text (for उत्कृष्ट-). Ś1 Ñ V1 B1.3.4 D1–3.5.7 बहु(D1 शत)शः कृतलक्षणं.

8 Ś1 Ñ V1 B1.3.4 D1–3.5.7 read 8 and 9 after 5. —$^{a}$) Ś1 Ñ V1 B1.3.4 D1–3.5.7 दशास्यं विंशतिभुजं. —$^{b}$) D1 दर्शनीयमरिंदमं. —$^{c}$) Ś1 D2.3 रौद्रं (for वीरं). Ñ1 सविशालाक्षताम्राक्षं; Ñ2 V1 B1.3.4 D5.7 ताम्राक्षं विपुलोरस्कं; D1 विशालाक्षं सुताम्राक्षं. —$^{d}$) Dm1 D1.4.8 T2 G M -शोभितं (for -लक्षितम्).

9 Ś1 Ñ V1 B1.3.4 D1–3.5.7 read 8 and 9 after 5. —$^{a}$) Dt1 D6 Ct नद्ध-; Ct*p* as in text (for स्निग्ध-). Ś1 Ñ V1 B1.3.4 D2.3.5.7 -जीमूत-; D6.8 G M Cr.m.g.k -वैडूर्य- (for -वैदूर्य-). G(ed.) -सदृशं (for -संकाशं). —$^{b}$) Ś1 D2.3 -हाटक- (for -काञ्चन-). Ś1 B3 D2 G1 -भूषितं; Ñ2 V1 B1.4 Dt1 D1.3.5.7 -भूषणं (for -कुण्डलम्). —$^{c}$) Ñ V1 B1.3.4 D1–3.5.7 श्वेत-; M3 शुष्क- (sic) (for शुक्ल-). B3(m. also) Dg1 T2 G1 -वसनं (for -दशनं). —$^{d}$) D1 पर्वतोद्यमं; M2 दीप्तलोचनं (for पर्वतोपमम्).

10 $^{a}$) B1 देव-; B3 विभोश् (for विष्णु-). Ś1 D2 वसूनां शस्त्रपातैश्च. —After 10$^{a}$, D5 ins.:

586* बहुशो व्रणिनं रणे ।
वसूनां शस्त्रसंपातैर् .

—$^{b}$) Ś1 B1.3.4 D2.3.5 M2 बहुशो (for शतशो). Dg1 दिवि (for देव-). Ñ1 बहुशो ***** (illeg.); Ñ2 D7 बहुशो व्रणितं रणे; D1 महायुद्धेषु ताडितं. - After 10$^{ab}$, Dg1 Dt1 Dm1 D4.6.8 S ins.:

587* अन्यैः शस्त्रप्रहारैश्च महायुद्धेषु ताडितम् ।
[Dm1 D8 शत्रु-; G1 शक्तैः (for शस्त्र-).]

—$^{c}$) Ś1 D8 M3 अहतांगं; Ñ1 विक्षतांगं; Dt1 अहतांगैः; D1 अंकितांगं; D2.3 आहतांसं; D6 अहतांगैः (for आहताङ्गं). Dg1 T3 तैर्; Dm1 D8 G3 तु (for च). Ñ2 D7 कृतांग(D7 °त)संधिमन्यैश्च; V1 B1.3.4 D5 विक्ष(V1 °क्; D5 °स्रि)तांगं समग्रैश्च. —$^{d}$) Ś1 Ñ1 D2.3 M2.3 अपि; Ñ2 V1 B1.3.4 D5.7 रणे; Dt1 T3 तदा (for तथा).

11 $^{ab}$) D3 सहस्राणां; D4 सुरेंद्राणां (for समुद्राणां). Ś1 क्षोभणे; T1 G1.3 °कं; M2 °भिणं (for क्षोभणं). D6 समुद्रा***णं. Ś1 क्षिप्रकारणं; V1 क्षुद्रकारिणं (for क्षिप्रकारिणम्). —$^{c}$) Ś1 Ñ V1 B1.3.4 D1–3.5.7 भेत्तारं (for क्षेप्तारं). D4 T1.2 G1.2 पर्वतेंद्राणां; M3 °ताग्रांश्च (for °ताग्राणां). —M2 om. (hapl.?) from 11$^{d}$ up to the prior half of l. 1 in 588*. —$^{d}$) Dg1 सं- (for च). V1 D1 महाबलं; D6 G1 विमर्दनं (for प्रमर्दनम्). Ś1 Ñ B1.3.4 D2.3.5.7 पु(B1.3 शू)राणां(D2.3 °णं) च महाबलं; D4 G2 परेषां पुरमर्दनं(G2 °दर्शनं).

12 $^{a}$) D1 वर्णानां (for धर्माणां). —$^{b}$) Ś1 D2 -[अ]-भिमर्षणं; Ñ2 B3 D3 °मर्शिनं; V1 B1.4 °मर्दनं; Dg1 D5.7 °मर्षिणं; Dm1 G2 °दर्शनं; Ck °मर्शकं (for °मर्शनम्). Ñ1 अमित्राणां महाबलं. —$^{c}$) Dg1 T3 -योद्धारं; G1 -गोप्तारं (for

पुरीं भोगवतीं गत्वा पराजित्य च वासुकिम् ।
तक्षकस्य प्रियां भार्यां पराजित्य जहार यः ॥ १३
कैलासं पर्वतं गत्वा विजित्य नरवाहनम् ।
विमानं पुष्पकं तस्य कामगं वै जहार यः ॥ १४
वनं चैत्ररथं दिव्यं नलिनीं नन्दनं वनम् ।
विनाशयति यः क्रोधाद्देवोद्यानानि वीर्यवान् ॥ १५
चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परंतपौ ।
निवारयति बाहुभ्यां यः शैलशिखरोपमः ॥ १६
दशवर्षसहस्राणि तपस्तप्त्वा महावने ।
पुरा स्वयंभुवे धीरः शिरांस्युपजहार यः ॥ १७

G. 3. 36. 20
B. 3. 32. 18
L. 3. 36. 20

-योक्तारं ). T2 सर्वविद्याप्रयोक्तारं. —$^{d}$ ) M3 सर्व- ( for यज्ञ- ). G3 तथा ( for सदा ).—For $12^{cd}$, Ś1 Ñ1 V1 D1–3 M2 subst.; Ñ2 B1.3.4 D5.7 subst. l. 2–3 only for $12^{cd}$ :

588* हन्तारं च महर्षीणां व्रतानां च विदूषकम् ।
दैत्यानां राक्षसानां च गन्धर्वाणां च संयुगे ।
अस्त्राणां मानुषाणां च प्रयोक्तारं महारथम् ।

[ ( l. 1 ) M2 om. up to the prior half of l. 1 (cf. v.l. 11 ). D3 सहस्राणां ( for महर्षीणां ). D1 महर्षीणां च भेत्तारं ( for the prior half ).—After the prior half, D3 erroneously repeats $12^{b}$ and the prior half. D3 भूतानां ( for व्रतानां ). Ś1 D1–3 M2 चैव( D1 M2 चापि ) दूषणं ( for च विदूषकम् ).—( l. 2 ) Ś1 D2 दिव्यानां; Ñ1 D1.3 देवानां ( for दैत्यानां ). Ñ2 D5.7 दानवानां; D1 सयक्षाणां ( for राक्षसानां ).—( l. 3 ) D1 च समंत्राणां; L( ed. ) मनुष्याणां च ( for मानुषाणां च ). V1 B1.3.4 D5.7 हंतार( V1 दातार )मथ चास्त्राणां( B4 राष्ट्राणां ) ( for the prior half ). Ś1 D2.3 महाबलं ( for महारथम् ). ]

**13** Ñ1 om. 13. M2 reads 13 *inf. lin. sec. m.* —$^{a}$ ) Ñ2 V1 B1.3.4 D5.7 येन ( for पुरीं ). V1 हुत्वा; D1.3 भित्त्वा; K( ed. )प्राप्य ( for गत्वा ).—$^{b}$ ) V1 प्रविजित्य ( for परा° ).—$^{c}$ ) Ñ2 V1 B1.3.4 D5.7 प्रिया भार्या. —$^{d}$ ) D3 M2 परिजित्य ( for परा° ). Ś1 D2 सुंदरीमाजगाम( D2 °हार ) यः; Ñ2 V1 B1.3.4 D5.7 विक्रमेणा( V1 B1.3 °ण )हृता पुरा( V1 पुरा हृता [ by transp. ] ).—After 13, Ś1 Ñ V1 B1.3.4 D1–3.5.7 M2 ins.( Ñ1 V1 D1 subst. for $14^{cd}$ ) :

589* येन वैश्रवणो राजा पराक्रम्य रणे जितः ।

[ B4 पराजितः ( for रणे जितः ). Ś1 D2.3 बलाद्विक्रम्य निर्जितः; Ñ1 B1 D1 M2 रणे विक्रम्य निर्जितः ( for the post. half ). ]

**14** $^{a}$ ) Dg1 D6 T G1 कैलास-. Ś1 Ñ V1 B1.3.4 D1–3.5.7 पर्वतश्रेष्ठं ( for पर्वतं गत्वा ).—$^{b}$ ) Ś1 Ñ1 D1–3 अ( D1 यो )ध्यास्ते नरवाहनः; Ñ2 V1 B1.3.4 D5.7 अध्यासीनो महाबलः.—Ñ1 V1 D1 subst. 589* for $14^{cd}$.—$^{c}$ ) B1 D5 विमान- ( for °नं ). Ś1 D2.3 चैव; M3 दिव्यं ( for तस्य ). D3 तरसा ( for कामगं ). Ñ2 B1.3 D5.7 च; B4 तु ( for वै ). Ñ2 B1.4 D5.7 च; D4 ह ( for यः ).—After 14, Ś1 Ñ2 B1.3.4 D2.3.5.7 M2 ins. :

590* प्रासादद्रुमचित्राङ्गं नानाखगमृगाकुलम् ।

[ G( ed. ) प्रसाद-. Ś1 -द्रुमवंतं तं; D2 °चित्रं तं; D3 -शिखरैश्चित्रं ( for -द्रुमचित्राङ्गं ). Ś1 D2.3 -मृगगण-; B4 -खरमृग- ( for -खगमृग- ). M2 नानामृगवरायुतं ( for the post. half ). ]

**15** $^{a}$ ) D1 T1 रम्यं ( for दिव्यं ).—$^{b}$ ) Ś1 B1 D2.3.6.7 T1.2 M3 नलिनी-; V1 नाकिनां; B4 नंदिनीं; D5 T3 नलिनं ( for नलिनीं ). M1 वने; M2 यथा ( for वनम् ). D1 नलिनीं भेदनं शिवं.—$^{c}$ ) D2 यत् ( for यः ). D4 क्रुद्धो ( for क्रोधाद् ). Ñ2 V1 B1.3.4 D5.7 यो विनाशितवान्क्रोधाद्.—$^{d}$ ) T3 दिव्योद्यानानि.

**16** $^{a}$ ) Ś1 D2 महावेगाव् ; D3 °तेजा ( for °भागाव् ). Ñ2 V1 B1.3.4 D5.7 सूर्याचंद्रमसौ देवाव् .—$^{b}$ ) Ś1 Ñ2 V1 B1.3.4 D2.3.5.7 G2 M2 परंतपः; Ñ1 महाबलः ( for परंतपौ ).—$^{c}$ ) Ñ2 विधारयति ( for निवा° ).—$^{d}$ ) Ś1 D2.3 -शिखरे स्थितः; Ñ2 D5.7 °रोपमैः ( sic ).

**17** $^{b}$ ) D1.3 येन; T2 ततस् ( for तपस् ). Ś1 Ñ2 V1 B1.3.4 D1–3.5.7 तप्तं ( for तप्त्वा ). B1 महात्मना ( for °वने ).—After $17^{ab}$, Ś1 Ñ V1 B1.3.4 D1–3.5.7 M2 ins. :

591* ऊर्ध्वपादेन गोकर्णे येन पावकसंचये ।
ब्रह्मणा योऽभ्यनुज्ञातो निमेषान्तरचारिताम् ।
कामरूपधरत्वं च प्रतिपेदे महारथः ।
बालेन्दुनिभदंष्ट्राणि भास्कराभानि वीर्यवान् ।

[ ( l. 1 ) D1.3 एकपादेन ( for ऊर्ध्व° ).—After l. 1, D1.3 ins. :

591( A )* हुतानि स्वशिरांसीति पितामहमतोषयत् ।
परितुष्टश्च भगवान्ब्रह्मा लोकपितामहः ।
वरं ददौ यथाकामं परितुष्टोऽभवत्तदा ।

[ ( l. 2 ) D1 स ( for च ).—( l. 3 ) D1 तथा ( for तदा ).—( l. 2 ) Ś1 Ñ1 D1.2 समनुज्ञातं; D3 M2 समनुज्ञातो( M2 also °प्राप्तो ) ( for योऽभ्यनुज्ञातो ). D1.7 निमिषांतर-. Ś1 Ñ1 V1 B1.2 D1.2 M2 -चारिणं( V1 °तं; B1.3 °णा ).—( l. 3 ) Ś1 D2.3 सः ( for च ). Ñ1 B3( m. also )महाबलः; D3 M2 °वरं ( for °रथः ). D1 कामरूपं महाकायं घोररूपं महाय च ( sic ).—Ñ1 D1 om. from l. 4 up to $17^{d}$.—( l. 4 ) Ś1 वह्निवज्रास्त्रराणि च ( for the post. half ). ]

—Ñ1 D1 om. $17^{cd}$.—$^{c}$ ) T1.2 G2 वीरः ( for धीरः ). Ś1 D2.3 स्वयंभुवे चैव पुरा; Ñ2 V1 B1.3.4 D5.7 स्वयंभुवे यस्तरसा; M2 स्वयं हराय च पुरा. —$^{d}$ ) M2 [ अ ]भिजहार ( for [ उ ]प° ). Ñ2 V1 B3.4 D5.7 च; B1 ह ( for यः ).

G. 3. 36. 24
B. 3. 32. 18
L. 3. 36. 24

देवदानवगन्धर्वपिशाचपतगोरगैः ।
अभयं यस्य सङ्गामे मृत्युतो मानुषादृते ॥ १८

मन्त्ररभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः ।
हविर्धानेषु यः सोममुपहन्ति महाबलः ॥ १९

आप्तयज्ञहरं क्रूरं ब्रह्मघ्नं दुष्टचारिणम् ।
कर्कशं निरनुक्रोशं प्रजानामहिते रतम् ।
रावणं सर्वभूतानां सर्वलोकभयावहम् ॥ २०

राक्षसी भ्रातरं क्रूरं सा ददर्श महाबलम् ।
तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम् ।
राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम् ॥ २१

---

**18** Ś1 Ñ V1 B1.3.4 D1–3.5.7 M2 read 18 after $20^{cd}$. —$^{a}$) Ś1 Ñ V1 B1.3.4 D2.3.5.7 -यक्षाणां; D1 T2 -गंधर्वै: (for -गन्धर्व-). D4 देवगंधर्वसंकाश-. —$^{b}$) Ś1 D2.3 गंधर्वोरगरक्षसां; Ñ V1 B1.3.4 D5.7 पिशाचोरगरक्षसां. —$^{d}$) B1 D5.7 G3 मृत्युर्नो (for °त्युतो). —For $18^{cd}$, Ś1 Ñ1 D1–3 M2 subst.:

592* अवध्यं समरे घोरं वध्यं मानुषवानरैः ।

[Ś1 D1.2 राक्षसैः (for समरे). Ś1 D2 सर्वैः; D1 चापि; D3 शत्रुं (for घोरं). Ś1 D1.2 संग्रामे न तु मानुषैः (for the post. half).]

**19** $^{a}$) Ś1 V1 D2 अभिहुतं; B1.3 अभिष्ठुतं; B1 (m. also).4 अभिहतं; D3 M2 अपि हुतं; D5.7 अभिद्रुतं (for अभिष्टुतं). Ś1 D2.3 साज्यम्; Ñ2 V1 B1.3.4 D5.7 पूर्वम्; D1 पूतम् (for पुण्यम्). —$^{b}$) D1 अद्य पृथक् (for अध्वरेषु). —$^{c}$) B1 हविर्धाने च; B4 हविर्दानेषु; D1 हविर्द्धानुषु (sic). —$^{d}$) Ś1 D2 T2 अपहंति; D1 अभिजघ्ने (for उपहन्ति). D2 यथा बलः. Ñ V1 B1.3.4 D5.7 धर्षयामास नैकशः. —After 19, Ś1 Ñ2 V1 B1.3.4 D2.3.5.7 M2 ins.:

593* उपर्युपरि यस्यैति संगृहीतांशुरंशुमान् ।
पुर्यां राक्षसराजस्य भीतभीतो दिवाकरः ।

[(l. 1) Ś1 D2.3 M2 यस्यैष. M2 संगृह्याश्रून्सुरर्षिभिः (for the post. half). —(l. 2) Ś1 D2.3 पुरीं; L (ed.) पुरा (for पुर्यां). M2 पुरीमुपरि गच्छेत्र (sic) (for the prior half). V1 भीतिभीतो. Ś1 ददर्श ह; D2.3 [ऽ]ति (D3 भि) वर्तते (for दिवाकरः).]

**20** $^{a}$) Ñ2 Dt1 Dm1 D4.6.8 Cm.t प्राप्तयज्ञहरं; Cv.m*p*.g.k as in text (for आप्त°). Dg1 Dt1 Dm1 D6.8 T3 G3 M1 दुष्टं (for क्रूरं). Ś1 Ñ V1 B1.3.4 D2.3.5.7 M2 पुण्ययज्ञहनं (V1 M2 °रं) क्रूरं (V1 क्रुद्धं); D1 तपो यज्ञघ्नं क्रूरं च. ❀ Cr: दक्षिणाकालं प्राप्तान् यज्ञान् (यज्ञान्) हरति तथा. ❀ —$^{b}$) Dg1 Dt1 D6 T3 M1 क्रूरका (M1 °चा) रिणं. —$^{d}$) D1 प्रजानां भयदं तथा. —After $20^{cd}$, Ś1 Ñ V1 B1.3.4 D1–3.5.7 M2 read 18. —B4 reads $20^{ef}$ in marg. —$^{e}$) Ś1 Ñ V1 B1 Dm1 D2.3.5.7 G2 M2 सर्वलोकानां; B3.4 °सत्त्वानां (for °भूतानां). —$^{f}$) Ñ1 Dm1 D8 T1 G -भूत-; Ñ2 D5.7 -सत्त्व-; D3 -देव- (for -लोक-). Ś1 -निवारणं; Ñ V1 B1.3.4 D4.5.7 -भयंकरं; D1–3 -विरावणं (for -भयावहम्). —After 20, M2 ins.:

594* नीलजीमूतसंकाशं मर्यादानामतिक्रमम् ।
पापिषु क्रूरकर्माणं राक्षसानां सुखावहम् ।

**21** Ñ1 om. $21^{ab}$. D1 transp. $21^{ab}$ and $21^{ef}$. —$^{a}$) Ñ2 V1 B1.3.4 Dg1 D4.5.7 राक्षसं (for °सी). Ś1 D2 क्रुद्धं; Ñ2 V1 B1.3.4 D5.7 दृष्ट्वा; D1 भीमं; D3 M2 क्रुद्धा; T1 G2 शूरं (for क्रूरं). —$^{b}$) Ś1 D1.2 तं; Dm1 D4 सं-; D3 om. (subm.) (for सा). D3 महाबला. Ñ2 B1.3.4 D5.7 क्रुद्धा समधिसृत्य (B1.3 °मुपसृत्य; B4 °मुपपद्य) च; V1 क्रुद्धा सा समुपेत्य च. —Ñ2 B1.3.4 D5.7 om. $21^{cdef}$. —$^{c}$) Ś1 Ñ1 V1 D2.3 -माल्या (Ś1 °ला) भरणं (for -वस्त्रा°). D1 रक्तचंदनदिग्धांगं. —$^{d}$) Ś1 V1 D2.3 -वस्त्रोप- (for -माल्योप-). Ñ1 दिव्यवस्त्रविभूषितं. —After $21^{cd}$, Dg1 Dt1 Dm1 D4.6.8 T G M1.2 (M2 after 597*).3 ins.:

595* आसने सूपविष्टं तं कालकालमिवोद्यतम् ।

[Dg1 D4 G3 M2.3 आसनेषु (for °ने सु-). K (ed.) च (for तं). Dt1 Dm1 D4.6.8 G1.3 काले (D4 °लं) (for काल-).]

—$^{e}$) Ś1 D6 अजेयं च (for राक्षसेन्द्रं). Ñ1 illeg. from महाभागं up to नन्दनम् in $^{f}$. Ś1 V1 D1–3 M2 महेंद्राभं (for महाभागं). —After 21, Dg1 Dt1 D4.6.8 T G M1.2 (after 595*).3 K (ed.) ins.:

596* अभिगम्याब्रवीद्वाक्यं राक्षसी भयविह्वला ।
रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम् ।

[K (ed.) transp. l. 1 and 2. —(l. 1) Dt1 उपगम्य. M2 reads राक्षसी *inf. lin. sec. m.* ❀ Cv: तं दिव्येत्यादौ प्रथमतच्छब्दः पूर्वेण ददर्शेत्यनेन संबध्यते । द्वितीयोऽभिगम्येत्यनेन. ❀ —T1 om. l. 2.];

while M2 ins. after 21:

597* रौद्रं तं रौद्रकर्माणं रुद्रप्रतिममाहवे ।

Thereafter cont. 595*, 596* and then cont.:

598* राक्षसानां जनस्थानेऽब्रवीद्रामात्पराभवम् ।

तमब्रवीद्दीप्तविशाललोचनं
प्रदर्शयित्वा भयमोहमूर्छिता ।
सुदारुणं वाक्यमभीतचारिणी
महात्मना शूर्पणखा विरूपिता ॥ २२

इति श्रीरामायणे अरण्यकाण्डे त्रिंशः सर्गः ॥ ३० ॥

## ३१

ततः शूर्पणखा दीना रावणं लोकरावणम् ।
अमात्यमध्ये संक्रुद्धा परुषं वाक्यमब्रवीत् ॥ १
प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः ।
समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे ॥ २
सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिम् ।
लुब्धं न बहु मन्यन्ते श्मशानाग्निमिव प्रजाः ॥ ३
स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः ।
स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति ॥ ४
अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपम् ।
वर्जयन्ति नरा दूरान्नदीपङ्कमिव द्विपाः ॥ ५

G. 3. 36. 26
B. 3. 33. 5
L. 3. 37. 5

---

13 $^{a}$) Ś1 D1-3 स्वस्ताभरण-; B4 हस्ताभरण- (for तप्ताभरण-). Ñ B3.4 D5.7 -जुष्टा सा; V1 B1 -जुष्टांगी; Dt1 D6 -वर्णांगी (for -सर्वाङ्गी). —$^{b}$) Ñ1 D1 -वाससा (D1 °सी) (for -वासिनी). —$^{c}$) G3 M1 सा (for तु). Ś1 Ñ2 V1 B1.3.4 D1-3.5.7 राजपुत्री रराजाथ; Ñ1 रराज रावणस्यांके; T2 रराज राजपुत्रीति. —$^{d}$) Ñ2 V1 B1.3.4 D5.7 व्योम्नि (for विद्युत्). Ñ2 Dm1 (before corr. as in text) D6 T3 G M1.3 सौदामनी; Cm as in text (for °मिनी). D1 इव (for यथा). Ñ1 विद्युद्यानगता इव.

14 $^{a}$) V1 B3.4 Dm1 D3.4 उद्धूतेन; D5 M3 उद्धतेन (for उद्धूतेन). D4 G1 तु (for च). —$^{c}$) D3 परिजज्वाल; T1.3 G1 M प्रतिबभ्राज (for परिबभ्राज). —$^{d}$) D4 [अ]-ग्निमान् (for [अ]ग्निना). T2 M2 गिरिर्दीप्तो (M2 °प्ता) ग्निना यथा. —After 14, Ñ2 V1 B1.3.4 D5.7 ins.:

1000* नीलजीमूतवर्णाभस्तप्तकाञ्चनकुण्डलः ।
वायुक्षिप्त इवादाय भाति सौदामिनीं घनः ।

[(l. 1) V1 -संनिभां; B3.4 -सुप्रभां (for -कुण्डलः). —(l. 2) B1 तडित्सौदामिनीं घनः (for the post. half).]

15 Ñ2 V1 B1.3.4 D5.7 transp. 15 (followed by 1001*) and 16. —$^{a}$) Ś1 D1.2 कुसुमगंधीनि (for परमकल्याण्यास्). —$^{cd}$) Dm1 आकीर्यंत च; D8 अवकीर्यंत; Cm as in text (for अभ्य°). Ñ2 V1 B1.3.4 D5.7 च्युतानि पद्मपत्रा(B1 °रागा)णि रावणं समवाकिरन्. —After 15, Ñ2 V1 B1.3.4 D5.7 ins.:

1001* अनसूयया यद्दत्तं दिव्यमाच्छादनं तदा ।
अङ्गरागः स्रजश्चैव गगने तदशोभत ।

[(l. 1) D5 अनसूयया च (hypm.) (for अनसूयया). V1 महत्; B1 तथा (for तदा).]

16 Ś1 Ñ1 D1-3 om. (hapl.) 16. Ñ2 V1 B1.3.4 D5.7 transp. 15 (followed by 1001*) and 16. —$^{a}$) D6 उद्धतम्; D8 उद्धतम् (for उद्धूतम्). —$^{b}$) B1.3.4 D5.7 रजतप्रभं (for कनक°). —$^{c}$) Ñ2 V1 B1.3.4 D5.7 बभूव; M1 बभौ वा (for बभौ च). V1 -बाणेन (for -रागेण). —$^{d}$) D5.7 ताम्रपत्रम्; T2 ताम्रभूमिर् (for ताम्रमभ्रम्).

17 $^{a}$) T1 सुनसं (for विमलं). D8 T3 वस्त्रम् (for वक्त्रम्). —$^{b}$) T3 रावणांतिके (for रावणाङ्कगम्). —Ñ V1 B1.3.4 D5.7 om. 17$^{cd}$. Ś1 reads 17$^{cd}$ after 18, D1-3 read it after 1003*.

18 G2 reads 18$^{ab}$ after 1003*. —$^{ab}$) Ś1 D1-3 बभासे; Ñ1 प्रवृत्तो; T3 जंबुवज् (for बभूव). M3 ज्वलनं; Cv जलजं; Cm.g.k.t as in text (for जलदं). B4 नीलं जलदं (by transp.). Dm1 D8 G3 भित्वा नीलं (by transp.); M3 भित्त्वा दिवा; Cm as in text (for नीलं भित्त्वा). ❀ Cr: नीलं जलदं भित्त्वेति. ❀ Dg1 T3 Cm [उ]त्थितः; Cg.t as in text (for [उ]दितः). —Ñ1 om. (hapl.) 18$^{c}$-20. —$^{d}$) Ś1 D1-3 T2 पद्मपत्राभम् (for °गर्भाभम्). —$^{e}$) Ś1 D1-3 श्लक्ष्ण(D1.3 शुक्ल)तीक्ष्णसमैर्दंतैः. —$^{f}$) D8 प्रभावाद्भिरलं कृतं. —For 18$^{e}$-20, Ñ2 V1 B1.3.4 D5.7 subst. 1004*. —After 18, Ś1 reads 17$^{cd}$, while D3 ins.:

1002* अशोभत मुखं तस्याः प्रभावद्भिरलंकृतम् ।

[Cf. 18$^{ef}$.]

D3 cont.; while Dg1 Dt1 Dm1 D1.2.4.6.8 S (M1 after 19$^{ab}$) ins. after 18:

1003* तस्यास्तत्सुनसं वक्त्रमाकाशे रावणाङ्कगम् ।

[Cf. 17$^{ab}$. Dt1 D6 सुनयनं; D1.3 तु सुनसं; T1 तद्विमलं (for तत्सुनसं). D2 reads from रावणाङ्कगम् up to आकाशे in 19$^{d}$ in marg.]

—Thereafter, D1-3 read 17$^{cd}$, G2 reads 18$^{ab}$.

रुदितं व्यपमृष्टास्रं चन्द्रवत्प्रियदर्शनम् ।
सुनासं चारुताम्रोष्ठमाकाशे हाटकप्रभम् ॥ १९
राक्षसेन्द्रसमाधूतं तस्यास्तद्वदनं शुभम् ।
शुशुभे न विना रामं दिवा चन्द्र इवोदितः ॥ २०
सा हेमवर्णा नीलाङ्गं मैथिली राक्षसाधिपम् ।
शुशुभे काञ्चनी काञ्ची नीलं मणिमिवाश्रिता ॥ २१
सा पद्मगौरी हेमाभा रावणं जनकात्मजा ।
विद्युद्घनमिवाविश्य शुशुभे तप्तभूषणा ॥ २२

तस्या भूषणघोषेण वैदेह्या राक्षसाधिपः ।
बभूव विमलो नीलः सघोष इव तोयदः ॥ २३
उत्तमाङ्गच्युता तस्याः पुष्पवृष्टिः समन्ततः ।
सीताया ह्रियमाणायाः पपात धरणीतले ॥ २४
सा तु रावणवेगेन पुष्पवृष्टिः समन्ततः ।
समाधूता दशग्रीवं पुनरेवाभ्यवर्तत ॥ २५
अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजम् ।
नक्षत्रमाला विमला मेरुं नगमिवोत्तमम् ॥ २६

G. 3. 58. o
B. 3. 52. 28
L. 3. 58. 25

19 Ñ1 om. 19 (cf. v.l. 18). D2 reads up to आकाशे in $19^{d}$ in marg. (cf. v.l. 1003*). —$^{a}$) Dg1 Dm1 D8 T3 G1.2 M3 रुदित-; Cr.g.k.t as in text (for रुदितं). Ś1 रुदितस्यापमृष्टास्रं; D1.2 रुदितश्रम( D2 °व्यप )-मृष्टास्रं; D3 रुदितश्रमसृष्टाक्षं. —After $19^{ab}$, M1 ins. 1003*. —$^{c}$) Dg1 D4 M2.3 सुनसं; D1 सुवर्ण-; D3 सुतप्तं (for सुनासं). Ś1 D2.3 चारुताम्रौष्ठम्; Dm1 D8 °दंष्ट्रोष्ठम्; T2 G2.3 ( marg. ) °दंतोष्ठम् (for °ताम्रोष्ठम्). —$^{d}$) Ś1 D2 कनकप्रभं (for हाटक°).

20 Ñ1 om. 20 (cf. v.l. 18). —$^{a}$) D1 राक्षसेन (for राक्षसेन्द्र-). Ś1 -पराभूतं; T3 -समुद्धृतं (for -समाधूतं). —$^{b}$) M2 तु (for तद्). D4 वचनं (for वदनं). —$^{d}$) T2 देव्याश्र् (for दिवा). Ś1 D1-3 विना नक्तमिवोडुपः (D1.3 °पं). —For $18^{c}$–20, Ñ2 V1 B1.3.4 D5.7 subst.:

1004* तस्याः समुद्धृतं वस्त्रमाकाशे रावणाश्रितम् ।
दद्दशे मेघमारूढः सूर्यपाद इवोदये ।

[ (l. 1) D5.7 समुद्ध( D7 °द्ध )तं (for समुद्धृतं). B3.4 तस्या वस्त्रं समुद्धृतम् (for the prior half). —(l. 2) V1 [उ]दितः (for [उ]दये). ]

21 $^{a}$) B3.4 D6 T2 M2 नीलाभं (for नीलाङ्गं). —$^{c}$) D2.6 T2 कांचना (for काञ्चनी). B1 माला; D1 लेखा (for काञ्ची). —$^{d}$) V1 मालाम् (sic); Dt1 Dm1 D6.8 Ct गजम्; Cg as in text (for मणिम्). Dg1 T3 M1 मणिं नीलम् (by transp.); M3 मणिर्नीलम्; Cg as in text (for नीलं मणिम्). M3 श्रिया (for [आ]श्रिता).

22 $^{a}$) Ñ1 पद्म** (illeg.); Ñ2 V1 B1.3.4 D5.7 पद्मवर्णा; Dt1 D6 Ct पद्मपीता; Cm.g.k as in text (for °गौरी). Ś1 नीलांगे; Ñ V1 B1.3.4 D1-3.5.7 मेघाभं( D1-3 °भे ); T2 हाराभा (for हेमाभा). —$^{b}$) Ś1 D1-3 रावणे (for रावणं). —$^{c}$) V1 विद्युद्घनिम् (for °द्घनम्). B1 [आ]विद्धं; D8 [उ]द्दिश्य; G (ed.) [आ]विध्य (for [आ]विश्य). Ś1 D3 विद्युत्क्रांता इवांभोदे; D1 विद्युद्भानुरिवांभोदे; D2 विद्युत्क्रांतमिवांभोदे. —$^{d}$) B3.4 T2 रत्नभूषणा. —After 22, Dg1 Cm.g read 28.

23 $^{a}$) Ñ1 om.; B3.4 D1-3 -शब्देन (for -घोषेण). —$^{b}$) Dg1 Dt1 Dm1 D4.6.8 T3 G M राक्षसेश्वरः (for °साधिपः). —$^{c}$) K (ed.) बभौ स (for बभूव). V1 B1.3.4 D5.7 M1.2 गगने; T1 चपलो (for विमलो). —$^{d}$) G3 सनाद (for सघोष). ❀ Cg : सचपलः सविद्युत्-।; Ck : सचपलः चपलया विद्युता सहितः सचपलः।; Ct : 'अभूत्सचपलो नीलः' इति पाठे चपला विद्युत्तया सहितो घोषवान्मेघ इवाभूदित्यर्थः. ❀

24 $^{a}$) Dg1 D1.2 T G3 Cg उत्तमांगाच्च्युता( Dg1 T2 °तास् ) (for °ङ्गच्युता). ❀ Ct : उत्तमाङ्गेति। मातः! त्वया संपादितोऽस्मन्मनोरथ इति हर्षाद्देवैः क्रियमाणा पुष्पवृष्टिस्तदुत्तमाङ्गाच्च्युता तत्काले भूमौ पपातेति कतकः। वस्तुतो रावणसंनिधौ देवानां तथा वीर्यासंभवात् उत्तमाङ्गे धृतपुष्पाणां तद्वेगेन ततश्चोत्तमाङ्गच्युतेत्युक्तम्। अत एवाग्रे भूमौ पुष्पयुतं मार्गं दृष्ट्वा रामो वक्ष्यति "अभिजानामि पुष्पाणां तानीमानीह लक्ष्मण। अपिनद्धानि वैदेह्या मया दत्तानि कानने ॥" इति. ❀ —$^{b}$) Ñ2 V1 B1.3.4 D5.7 मनोहरा (for समन्ततः). —Ś1 D1-3 om. $24^{cd}$. —$^{c}$) T2 सीतायां ह्रियमाणायां. —$^{d}$) G2 पृथिवीतले (for धरणी°).

25 D6 om. 25. G2 om. $25^{ab}$. Ś1 D1-3 transp. $^{ab}$ and $^{cd}$. —$^{a}$) Dg1 [अ]त्र (for तु). —$^{b}$) Ś1 D1-3 समाधूता; Ñ V1 B1.3.4 D5.7 समुद्ध( V1 B3 °द्ध )ता (for पुष्पवृष्टिः). —$^{c}$) Ś1 D1-3 समाधूय; Ñ V1 B1.3.4 D5.7 पुष्पवृष्टिर् (for समाधूता). —$^{d}$) Ś1 D1.2 व्यशीर्यत; Ñ V1 B1.3.4 D5.7 G3 [अ]भ्यवर्षत; Dg1 T3 G2 M1 [अ]भ्यधावत; Dt1 [अ]भ्यवर्तते; Cg.k.t as in text (for [अ]भ्यवर्तत).

26 Ñ1 om. $26^{ab}$. —$^{a}$) Ś1 Ñ2 V1 B1.3.4 D1-3.5.7 अभ्यव( D3 °की [sic] )र्षत (for °वर्तत). —$^{b}$) Ś1 D1-3 वृष्टिर् (for धारा). —After $26^{ab}$, Ś1 reads 28 (including 1006*), while Ñ2 V1 B1.3.4 D5.7 ins.:

1005* तरुप्रवरमुक्तेव पुष्पवृष्टिर्महीधरम् ।
शोभयामास वैदेह्याः पुष्पवृष्टिर्मनोहरा ।

[ (l. 1) V1 महीतलं (for °धरम्). —(l. 2) Ñ2 V1 D5.7 मनोरमा (for °हरा). ]

—After $26^{ab}$, D3 ins.; Ś1 subst. for $28^{cd}$ :

G. 3. 58. 32
B. 3. 52. 29
L. 3. 58. 27

चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितम् ।
विद्युन्मण्डलसंकाशं पपात मधुरस्वनम् ॥ २७
तरुप्रवालरक्ता सा नीलाङ्गं राक्षसेश्वरम् ।
प्राशोभयत वैदेही गजं कक्ष्येव काञ्चनी ॥ २८
तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा ।
जहाराकाशमाविश्य सीतां वैश्रवणानुजः ॥ २९
तस्यास्तान्यग्निवर्णानि भूषणानि महीतले ।
सघोषाण्यवकीर्यन्त क्षीणास्तारा इवाम्बरात् ॥ ३०
तस्याः स्तनान्तराद्भ्रष्टो हारस्ताराधिपद्युतिः ।
वैदेह्या निपतन्भाति गङ्गेव गगनाच्च्युता ॥ ३१
उत्पातवाताभिहता नानाद्विजगणायुताः ।
मा भैरिति विधूताग्रा व्याजह्रुरिव पादपाः ॥ ३२
नलिन्यो ध्वस्तकमलास्त्रस्तमीनजलेचराः ।
सखीमिव गतोत्साहां शोचन्तीव स्म मैथिलीम् ॥ ३३

---

1006* भूषणैर्विविधैः सा तु राक्षसेन्द्रमशोभयत् ।

—D2 om. ( hapl. ? ) $26^{c}$–29. —$^{c}$ ) D7 om.; M3 वितता ( for विमला ). —$^{d}$ ) D1 गिरिम् ( for नगम् ). Ñ2 [ उ ]ज्ज्वलं; D4 [ उ ]त्तरं; T1 G3 M3 [ उ ]न्नतं ( for [ उ ]त्तमम् ). V1 B1.3.4 D5.7 रक्षो मेरुमिवोज्ज्वलं( B1 °ला ); Dm1 D8 G3 मेरुश्रृंगमिवोत्तमं( G3 °न्नतं ).

27 D2 om. 27 ( cf. v.l. 26 ). Ś1 reads 27 after 30. —$^{a}$ ) Dg1 श्रेष्ठं ( for भ्रष्टं ). —$^{b}$ ) Ś1 Ñ2 V1 B1.3.4 D1.3.5.7 पावकोपमं; Ñ1 धरणीतले; D4 मणि° ( for रत्नभूषितम् ). —D5 om. $27^{c}$–$28^{b}$. —$^{c}$ ) Ś1 D1.3 वलय- ( for मण्डल- ). V1 -वर्णाभं ( for -संकाशं ). —$^{d}$ ) Ñ1 Dm1 D1.3 G M मधुरस्वरं; Ñ2 V1 B1.3.4 Dt1 D6.7 T3 धरणीतले ( for मधुरस्वनम् ).

28 D2 om. 28 ( cf. v.l. 26 ). Ñ1 D5 om. $28^{ab}$ ( for D5, cf. v.l. 27 ). Ś1 reads 28 ( including 1006* ) after $26^{ab}$. Dg1 Cm.g read 28 after 22. —$^{a}$ ) Ś1 D1.3 तनु( D1.3 °रु )पल्लवरक्ता; Dg1 °रत्ना; Cm.g.t as in text ( for तरुप्रवालरक्ता ). ❀ Cm : तरुप्रवालरत्नेति पाठे प्रवालसदृशरत्ना. ❀ Ñ2 V1 B1.3.4 D7 निष्टप्तकनका( Ñ2 B1 °कांचना )भासा; M2 तरुप्रवालरक्ताभा. —$^{b}$ ) Ñ2 V1 B1.3.4 D4.7 G1 राक्षसाधिपं ( for °सेश्वरम् ). —$^{c}$ ) V1 B3.4 D1.3.5.7 अशोभयत; B1 शोभयामास; Dm1 D6 T1 प्रशो°; M3 प्राशोभत च ( for प्राशोभयत ). Ñ1 हेमप्रवरवच्छोभा. —$^{d}$ ) V1 गजकक्षेव; Dg1 D1.3–5.7 गजं कक्षेव; Cg as in text. —For $28^{cd}$, Ś1 subst. 1006*.

29 Ś1 D2 om. 29 ( for D2, cf. v.l. 26 ). —$^{a}$ ) D3 एकोल्काम्. —$^{b}$ ) B3.4 ज्वलमानां ( for दीप्य° ). —$^{c}$ ) Dm1 D8 M1 जगाम ( for जहार ). M1 आदाय ( for आविश्य ).

30 B3 reads $30^{ab}$ twice. —$^{a}$ ) M2 [ अ ]धिवर्णानि ( for [ अ ]ग्नि° ). —$^{c}$ ) B1 सुघोषाणि; Dg1 सघोषेण ( for सघोषाणि ). Ñ V1 B1.3.4 D5.7 व्यशीर्यंत; Dt1 D6 G2 [ अ ]वशीर्यंत; D1 [ अ ]वकीर्यंते; M2.3( after corr. as in text ) [ अ ]वतीर्यंत ( for [ अ ]वकीर्यन्त ). G( ed. ) सद्यः खाद्व्यिर्व्यशीर्यन्त. —$^{d}$ ) G1 क्षुण्णास् ( for क्षीणास् ). Ś1 उल्का भ्रष्टा; Ñ1 ताराः क्षीणा ( by transp.) ( for क्षीणास्तारा ). B1 [ अं ]बुदात् ( for [ अ ]म्बरात् ). —After 30, Ś1 reads 27.

31 $^{a}$ ) M2 स्तनांतर- ( for °राद् ). —For $31^{ab}$, Ś1 Ñ V1 B1.3.4 D1–3.5.7 subst. :

1007* विशीर्णः पाण्डुरः श्रीमांस्तस्या हारः स्तनान्तरात् ।

[ B1 स शीर्णः ( for विशीर्णः ). Ñ V1 B1.3.4 D7 पांडरः ( for पाण्डुरः ). V1 यस्या ( for तस्या ). ]

—Ñ1 partly illeg. for $31^{cd}$. —$^{c}$ ) Ś1 Dg1 D2 न्यपतद् ( Dg1 °तन् ); B1 निरतं ( for निपतन् ). Ś1 D2 गां वै ( for भाति ). —$^{d}$ ) Ñ2 V1 B1.3.4 D5.7 नभसश् ( for गगनाच् ). Dt1 Dm1 D4.8 T3 G1.3 गगनच्युता. Ś1 दिवि गंगेव भूतले; D1–3 दिवो गंगेव भूतलं( D2 °ले ).

32 $^{a}$ ) Ñ2 V1 B1.3.4 D5.7 ततस्तु; K( ed. ) उत्पन्न- ( for उत्पात- ). —$^{b}$ ) Ś1 D1.2 भ्रांता( D1.2 °त ) द्विजगणाकुलाः; Ñ2 V1 B1.3.4 D3.5.7 नानाद्विजशतारु( B1.3 °व्रृ; D5.7 °ह )ताः; G( ed. ) नानाद्विजकुलावृताः. —$^{c}$ ) Ñ2 B3 भैषीति ( for भैरिति ). D1 विधूतांगा; D8 T2 विधूताग्र्या ( for °ताग्रा ). V1 B1.4 D5.7 T3 मा भैषीरिति धूता( V1 D5 °मा )ग्रा. —$^{d}$ ) B1 व्याचक्रुर् ( for व्याजह्रुर् ). V1 इति ( for इव ).

33 T3 reads 33 after 35. —$^{b}$ ) V1 शांत-; B1.4 अस्त-; B3( *sup. lin.* as in text ) Dt1 D4 T1.3 स्रस्त-; D5.7 तप्त-; T2 ध्वस्त-; M2 ग्रस्त-; Cg.k.t as in text ( for त्रस्त- ). Ñ1 -जलाशयाः ( for -जलेचराः ). —$^{c}$ ) Ś1 D1–3 निरुच्छ्वासाः; Ñ1 illeg.; Dg1 Dm1 D8 G1 M1.2 Cr.m.g गतोच्छ्वासां; D4 जलोच्छ्वासा; T2 G2 M3 गतोच्छ्वासाः( M3 °साच् ); T3 G3 गतोत्साहाः; Ct as in text ( for गतोत्साहां ). ❀ Ck : गतोच्छ्वासा गतप्राणा ।; Ct : 'गतोच्छ्वासाः' इति पाठे रावणत्रासाच्छुष्कजलतया गतप्राणा इत्यर्थः. ❀ Ñ2 V1 B1.3.4 D5.7 वयस्या इव चोद्बाष्पाः( V1 सोद्बाष्पाः; B1 चामुष्याः ). —$^{d}$ ) Dm1 D8 [ इ ]ह; Cm.g.t as in text ( for [ इ ]व ). D3 हि; D6 om.( subm. ); T2 च ( for स्म ). Ñ1 प्रावेपंत च; T1 अन्वशोचंत; G2.3 शोचंति स्म च( G3 हि ) ( for शोचन्तीव स्म ). Ñ2 V1 B1.3.4 D5.7 शोचंति( V1 °ते ) जनकात्मजां.

समन्तादभिसंपत्य सिंहव्याघ्रमृगद्विजाः ।
अन्वधावंस्तदा रोषात्सीताच्छायानुगामिनः ॥ ३४
जलप्रपातास्रमुखाः शृङ्गैरुच्छ्रितबाहवः ।
सीतायां ह्रियमाणायां विक्रोशन्तीव पर्वताः ॥ ३५
ह्रियमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः ।
प्रविध्वस्तप्रभः श्रीमानासीत्पाण्डुरमण्डलः ॥ ३६
नास्ति धर्मः कुतः सत्यं नार्जवं नानृशंसता ।
यत्र रामस्य वैदेहीं भार्यां हरति रावणः ॥ ३७
इति सर्वाणि भूतानि गणशः पर्यदेवयन् ।
वित्रस्तका दीनमुखा रुरुदुर्मृगपोतकाः ॥ ३८
उद्वीक्ष्योद्वीक्ष्य नयनैरास्रपाताविलेक्षणाः ।
सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः ॥ ३९
विक्रोशन्तीं दृढं सीतां दृष्ट्वा दुःखं तथागताम् ।
तां तु लक्ष्मण रामेति क्रोशन्तीं मधुरस्वराम् ॥ ४०
अवेक्षमाणां बहुशो वैदेहीं धरणीतलम् ।
स तामाकुलकेशान्तां विप्रमृष्टविशेषकाम् ।
जहारात्मविनाशाय दशग्रीवो मनस्विनीम् ॥ ४१

G. 3. 58. 45
B. 3. 52. 43
L. 3. 58. 40

34 Ñ1 (illeg. for 34$^{a}$) transp. 34 and 35.—$^{a}$) Dg1 D4 T3 अभिसंपद्य; T2 अभिसंत्याशु; G2 अपि निष्पत्य; G3 अधिसंपद्य; Cg as in text (for अभिसंपत्य). Ñ2 V1 B1.3.4 D5.7 तथा महावने क्रूराः (V1 B1.3.4 क्रुद्धाः); D1 राममाहात्म्यसंयुक्ताः.—$^{b}$) V1 -व्याघ्रा (for -व्याघ्र-). Ñ2 D5.7 -महाद्विपाः; B1 D4 -मृगद्विपाः; D6 M3 -मृगा द्विजाः (for -मृगद्विजाः).—$^{c}$) Ś1 Ñ2 V1 B1 Dg1 D5.7 अभ्यधावंस्; Cg as in text (for अन्व°). Ñ1 V1 Dg1 Dm1 D8 T3 G3 M2 ततो; D2 तथा; Cg as in text (for तदा). Ñ2 V1 B1.3.4 D5.7 सीतां; G3 घोषात् (for रोषात्).—$^{d}$) Ñ2 V1 B1.3.4 D5.7 सर्वे; Dm1 D2.3.8 T1 M2.3 सीतां (for सीता-). Ś1 D2 -[अ]नुयायिनः; Cg °सारिणः (for °गामिनः).

35 Ñ1 transp. 34 and 35.—$^{a}$) Ś1 D2 जलप्रवाहपति(D2 °वित)तैः; Ñ1 जलस*सुप्रमुखाः; Ñ2 V1 B3.4 D5.7 जलप्रपातविरुतैः; B1 जलप्रयातविततैः; Dg1 T3 जलप्रवाहाश्रु(T3 °स्र)मुखाः; Dm1 जलप्रयातास्रुमुखाः; D1 जलप्रपातसलिलैः; D3 जलप्रपातविपुलैः; D8 T2 G3 जलप्रपातास्रु(G3 °श्रु)मुखाः; Cm.g.k.t जलप्रपातास्रमुखाः (as in text).—$^{b}$) Dg1 Dt1 D6 T1.3 M3 -बाहुभिः; T2 -पादपाः; Cg as in text (for -बाहवः).—$^{d}$) Ñ1 illeg. for पर्वताः.—After 35, T3 reads 33.

36 Ñ1 (illeg. for 36$^{a}$) reads 36$^{a}$–38$^{b}$ after 40$^{ab}$.—$^{a}$) Ś1 D1–3 च (for तु). D4 om. (hapl.) from दीनो in $^{b}$ up to दृष्ट्वा in 40$^{b}$.—$^{b}$) Ñ1 सीतां; D3 दीनां (for दीनो). V1 निशाकरः (for दिवा°).—$^{c}$) Ś1 T प्रतिध्वस्तप्रभः; Ñ1 संहृतास्तप्रभः; D1 प्रतिध्वस्तगतिः; M3 विध्वंसितप्रभः. Ñ2 V1 B1.3.4 D5.7 प्रवि(B1 परि)ध्वस्तप्रभाजालं.—$^{d}$) D1 सीतां (for आसीत्). B1.3.4 Dg1 Dm1 D7 T1.2 G M पांडर- (for पाण्डुर-).

37 For om. of 37 in D4 and sequence in Ñ1 cf. v.l. 36.—$^{d}$) Ñ V1 B1.3.4 Dt1 Dm1 D5–8 सीतां (for भार्यां).

38 For om. of 38 in D4 and sequence in Ñ1 cf. v.l. 36.—$^{a}$) B3.4 Dg1 Dt1 Dm1 D6.8 T3 भूतानि सर्वाणि (by transp.).—$^{b}$) Ś1 Ñ V1 B1.3.4 D2.3.5.7 गगने; Dm1 गणेशं; D1 गमने; Cr.g.k.t as in text (for गणशः). G2 पर्यवेदयन् (for °देवयन्).—After 38$^{ab}$, Ś1 Ñ1 D1.2 ins., while Ñ2 V1 B1.3.4 D3.5.7 subst. for 40$^{ab}$:

1008* दृष्ट्वा सीतां परामृष्टां रावणेन यशस्विनीम् ।
[Ś1 D1–3 तपस्विनीं (for यश°).]

—Ñ2 V1 B1.3.4 D5.7 om. 38$^{c}$–39.—$^{c}$) T3 वित्रस्तास्ते; G3 वित्रस्तांगा; M1 विस्रस्तका; M3 वित्रस्तपा; Cg as in text (for वित्रस्तका). M3 ***खा (damaged) (for दीनमुखा). Ś1 D1–3 त्रस्तका दीनमुखका; Ñ1 त्रस्ता वै दीनवदना; Dg1 T3 वित्रस्ता दीनवदना.—$^{d}$) Ś1 Ñ1 D1–3 उन्मुखा (for रुरुदुर्).

39 D4 om. 39 (cf. v.l. 36). Ñ2 V1 B1.3.4 D3.5.7 om. 39 (for all except D3, cf. v.l. 38). Dg1 om. 39$^{ab}$.—$^{a}$) Ñ1 उद्वीक्ष्य ता बभूवार्ता.—$^{b}$) Ś1 Ñ1 Dm1 D1.2.8 अश्रु-; T1 चास्र-; T3 अस्र- (for आस्र-). T3 G1 M2 -[ई]क्षणैः (for -[ई]क्षणाः). Dt1 D6 भयादिव विलक्षणैः.—$^{c}$) Ś1 Ñ1 D1.2 संप्रवेपित- (for सुप्र°).—$^{d}$) G2 वरदेवताः (for वन°).

40 D4 om. up to दृष्ट्वा in $^{b}$ (cf. v.l. 36).—$^{a}$) Ś1 D2 भृशं; M3 तु तां (for दृढं).—$^{b}$) Ñ1 D1 T2 दुःखात् (for दुःखं). Dg1 G2 तदागतां; D2 तथागतं. G1 दृष्ट्वा दुःखसमागतां.—For 40$^{ab}$, Ñ2 V1 B1.3.4 D3.5.7 subst. 1008*.—After 40$^{ab}$, Ñ1 reads 36$^{a}$–38$^{b}$.—Ś1 D1–3 om. 40$^{c}$–41$^{b}$.—$^{c}$) Ñ1 हा (for तु). Ñ2 V1 B1.3.4 D5 हा लक्ष्मणेति (for तां तु लक्ष्मण). D7 हा राम हा लक्ष्मणेति.—$^{d}$) Ñ2 D6.7 मधुरस्वनां (D6 °नं); T1.2 G3 M2 मधुरस्वरं; G(ed.) मधुराक्षरं (for °स्वराम्).

41 Ś1 D1–3 om. 41$^{ab}$ (cf. v.l. 40).—$^{ab}$) V1 Dg1 D5.8 M2 अवेक्ष्यमाणां (D5 °णो); B1 अरक्ष्यमाणां; Dm1 आवेक्ष्यमाणां; Cm.g.t as in text (for अवेक्ष°). Ñ2 V1 B1.3.4 D5.7 वैदेहीं बहुशो (by transp.). D7 धरणीतले (for °तलम्).—Ñ1 om. 41$^{cd}$.—$^{c}$) Ś1 D2 सतीम्; B3 (after corr. *sec. m.*) D1.3.4 G2.3 सीताम् (for स ताम्).

G. 3. 58. 46
B. 3. 52. 44
L. 3. 58. 41

ततस्तु सा चारुदती शुचिस्मिता
　　विनाकृता बन्धुजनेन मैथिली ।
अपश्यती राघवलक्ष्मणावुभौ
　　विवर्णवक्त्रा भयभारपीडिता ॥ ४२

इति श्रीरामायणे अरण्यकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

## ५१

खमुत्पतन्तं तं दृष्ट्वा मैथिली जनकात्मजा ।
दुःखिता परमोद्विग्ना भये महति वर्तिनी ॥ १
रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम् ।
रुदती करुणं सीता ह्रियमाणेदमब्रवीत् ॥ २
न व्यपत्रपसे नीच कर्मणाऽनेन रावण ।
ज्ञात्वा विरहितां यो मां चोरयित्वा पलायसे ॥ ३

—$^{d}$) Ñ2 D5.7 प्रविलुप्त-; V1 B1.3.4 D1 विप्रण( D1 °क्र )ष्ट- ( for विप्रमृष्ट- ). Ś1 D2 -शिरोरुहां ( for -विशेषकाम् ). —After $41^{cd}$, Ñ2 B1.3.4 D5.7 ins. :

1009* वरप्रदानसंपन्नो बलवीर्यमदेन च ।

—$^{f}$) Ñ2 महाबलः; Dg1 T3 G2 यशस्विनीं; G1 तपस्विनीं; Cg as in text ( for मनस्विनीम् ). Ñ2 D5.7 वैदेहीं तु तपस्विनीं.

42 Ñ1 partly illeg. for $^{a}$. —$^{a}$) V1 च ( for तु ). G( ed. ) वै रुदती ( for चारुदती ). Ś1 Ñ2 V1 D2.3.5.7 G2 सीता रुदती ( for सा चारुदती ). Ś1 D1.2 व्यचिंतयद् ; D5.7 सुविस्मिता ( for शुचि° ). —$^{c}$) B3.4 G3 लक्ष्मणराघवाव् ( by transp. ). —$^{d}$) G3 विवर्णवर्णा. Ñ2 V1 B3.4 D5.7 भयमोहमूर्छिता; B1 भयमोहशंकिता ( for भयभारपीडिता ).

Colophon. —*Sarga name*: Ś1 D2 सीताप्रमाथः; Ñ1 D1.3 सीताहरणं; Ñ2 D5.7 रावणप्रयाणं; V1 B3.4 सीताहरणे रावणप्रयत्नः( V1 B4 °प्रयाणं ); B1 रावणप्रतिप्रयाणं. —*Sarga no.* ( figures, words or both ): Ś1 Ñ1 B1.3 D2 om.; Ñ2 D5.7 58; V1 57; B4 D3 59; Dg1 Dt1 Dm1 D6.8 T G M1.2 52; D1 55; D4 54; M3 53. —After colophon, G1.2 conclude with श्रीरामाय नमः.

### 51

D8 begins with ॐ; T2 with श्रीरामः शरणं मम, श्रीरामचन्द्राय नमः; M1 with श्रीरामाय नमः.

1 V2 illeg. up to $4^{b}$ ( cf. v.l. 3.46.7 ). —$^{a}$) Ñ2 B3 दृष्ट्वा तं ( by transp. ); B1 M3 दृष्ट्वा तु; B4 lacuna ( for तं दृष्ट्वा ). Ñ1 नभस्तलगतं दृष्ट्वा. —$^{b}$) V1 रावणं; M2 वैदेही ( for मैथिली ). —$^{d}$) Ś1 T2.3 वर्तते; D1 वर्तती; M3 मैथिली ( for वर्तिनी ). ❀ Cm.k.t : वर्तिनीत्यसुप्यपि णिनिरार्षः. ❀ Ñ V1 B1.3.4 D5.7 वर्तमाना( V1 °र्णमाला [ sic ]) महाभये. —After 1, Ś1 D1-3 ins. :

1010* वेपमाना चलत्काया पूर्णचन्द्रनिभानना ।
व्यसनस्यात्मनो नान्तं पश्यन्ती वरवर्णिनी ।
विहायसा नीयमाना रुदन्ती करुणं वनात् ।
अचिन्तयद्वरारोहा दुःखे महति वर्तती ।
कथं ज्ञास्यति मे भर्ता लक्ष्मणो वा महाबलः । [5]
रावणस्य वशं प्राप्ता मिथिलाधिपतेः सुता ।
रुरोद करुणं बाला विललापातिदुःखिता ।

[ ( l. 1 ) Ś1 बलाच्छाया ( for चलत्काया ). D2 -शुभानना. —( l. 3 ) D1 करुणं महत; D2 करुणाविला ( for °णं वनात् ). —( l. 4 ) Ś1 वर्तते; D2 वर्तिनी ( for वर्तती ). —( l. 5 ) D2 यास्यति ( for ज्ञास्यति ). —( l. 6 ) D2 वशे प्राप्तां. D2 मैथिलाधिपतेः सुतां ( for the post. half ). —( l. 7 ) D1 तु-; D3 च ( for [ अ ]ति- ). ];
while Ñ2 V1 B1.3.4 D5.7 ins. :

1011* गच्छन्ती साथ वैदेही रावणाङ्के मनस्विनी ।

[ V1 च; B1 तु ( for [ अ ]थ ). ]

2 V2 illeg. ( cf. v.l. 1 ). —$^{a}$) Ñ1 illeg. up to रोदन. —$^{b}$) D3 भीमाख्यं; D5.7 भीमांकं ( for °क्षं ). Ñ1 तत्र राक्षसं; G3 M3 राक्षसेश्वरं ( for राक्षसाधिपम् ). —$^{c}$) Ś1 विक्रुवं; D1-3 विक्रुवा; D6.8 T2.3 G2.3 M1.3 रुदंती ( for रुदती ). Ś1 Ñ2 V1 B1.3.4 D1-3.5.7 रावणं; Ñ1 कृपणं; Dm1 करुणा ( for °णं ). —$^{d}$) Dt1 D6 T तम् ( for [ इ ]दम् ). —After 2, Ś1 D1-3 read $4^{cd}$; V1 reads $5^{ab}$ for the first time repeating it in its proper place. —After 2, B3.4 D5.7 ( twice ) read $5^{ab}$. —After 2, B1 ins. :

1012* विक्रुष्टं त्वत्प्रयोगेन दृश्यते राक्षसाधिप ।

3 V2 illeg. ( cf. v.l. 1 ). Ñ2 om. 3-4. —$^{a}$) B1 न ह्यपत्रपसे; B4 D5.7 न चापत्रपसे; D8 नव्यपत्रपसे. V1 वीर ( for नीच ). —$^{b}$) B3.4 D4 G1 राक्षस ( for रावण ). —$^{c}$) Dg1 T3 पत्या; T2 भर्त्रा ( for ज्ञात्वा ). Ś1 D2.3 हि रहितां( D2 °ते )

त्वयैव नूनं दुष्टात्मन्भीरुणा हर्तुमिच्छता ।
ममापवाहितो भर्ता मृगरूपेण मायया ।
यो हि मामुद्यतस्त्रातुं सोऽप्ययं विनिपातितः ॥ ४
परमं खलु ते वीर्यं दृश्यते राक्षसाधम ।
विश्राव्य नामधेयं हि युद्धे नास्मि जिता त्वया ॥ ५
ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे ।
स्त्रियाश्च हरणं नीच रहिते च परस्य च ॥ ६

कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम् ।
सुनृशंसमधर्मिष्ठं तव शौण्डीर्यमानिनः ॥ ७
धिक्ते शौर्यं च सत्त्वं च यत्त्वया कथितं तदा ।
कुलाक्रोशकरं लोके धिक्ते चारित्रमीदृशम् ॥ ८
किं शक्यं कर्तुमेवं हि यज्जवेनैव धावसि ।
मुहूर्तमपि तिष्ठस्व न जीवन्प्रतियास्यसि ॥ ९

G. 3. 59. 10
B. 3. 53. 10
L. 3. 59. 13

(for विरहितां). T1 यन् (for यो). D1 रामेण रहिते यो मां. —[d]) Dg1 reads पलायसे in marg. Ś1 Ñ1 V1 B1.3.4 D1–3.5.7 ब(Ś1 Ñ1 D1.2 छ)लात्त्वं हर्तुं(Ś1 Ñ1 हंतु)मिच्छसि (Ś1 D2 °मर्हसि).

4 V2 illeg. for [ab] (cf. v.l. 1). Ñ2 om. 4 (cf. v.l. 3). M3 om. 4–5. —[a]) B1 त्वमेव; G3 (before corr.) तवैव (for त्वयैव). M2 ननु (for नूनं). —[b]) Ñ1 वचनाद् (for भीरुणा). Ś1 D1–3 पापकर्मणा (for हर्तुमिच्छता). —[c]) Ñ1 चैवाहतो; D3 [आ]र्यो मोहितो; D6 [अ]द्य वाहितो (for [अ]पवाहितो). —Ñ1 V B1.3.4 D5.7 om. 4[cf]. Ś1 D1–3 read 4[cf] after 2. —[f]) D1 पक्षी (for ऽप्ययं). —After 4, Dg1 Dt1 Dm1 D4.6.8 T G M1.2 ins.:

1013* गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम ।

[ Dt1 reads the post. half in marg. ]

5 M3 om. 5 (cf. v.l. 4). V1 repeats 5[ab] here (cf. v.l. 2). B3.4 D5.7 read (D7 twice) 5[ab] after 2. —[a]) D6 खल (for खलु). Ś1 Ñ2 V(V1 second time) B1.3.4 D1.2.5.7 (both times) transp. ते and वीर्यं. V1 (first time) अपारं धनुवीर्यं ते. —[b]) Ś1 Ñ2 V B1.3.4 Dg1 D1–3.5.7 (both times) राक्षसाधिप. —[c]) Ś1 Ñ V B1.3.4 D1–3.5.7 स्वं; G(ed.) ते (for हि). —[d]) Dt1 नास्ति; Cg as in text (for नास्मि). Ñ1 त्वया हृता; M2 स्थिता त्वया; G(ed.) विनिर्जिता (for जिता त्वया). T1 G1 M1 युद्धे नाप(G1 °स्ति)जितस्त्वया. ❀ Cv : परममित्यादि । परमं खलु ते वीर्यं दृश्यते यदयं वृद्धो युद्धेनापजितः । युद्धे नास्मि जिता त्वयेति च पाठः । तदानीं युद्धपदं सप्तम्यन्तम् ।; Cr.k.t परमं खल्विति व्यङ्ग्योक्तिः ।; Cg : परममिति सोल्लुण्ठनं वचनम् । अतिनीचमित्यर्थः । तत्र हेतुमाह-विश्राव्येति । हि यस्मात्स्वनामधेयं विश्राव्य अहं रावणोस्मीति स्वनाम प्रख्याप्य युद्धे नास्म्यहं जितेति व्यतिरेकोक्तिः । यद्वा ते परमं अवीर्यं क्लीबत्वं हि यस्माद्युद्धे न जितास्मि. ❀ —After 5, Ñ2 V B1.3.4 D5.7 ins.:

1014* रामस्य सदृशेनैव स्वरेण करुणं च यत् ।
विक्रुष्टं त्वत्प्रयोगोऽसावस्मद्धृदयतापनः ।

[ (l. 1) Ñ2 D5.7 त्वं; V2 [अ]पि (for [ए]व). —(l. 2) B3 तव (for त्वत्). ]

6 [a]) T2 ईदृक्सद्-. Ñ1 कुत्सितं (for गर्हितं). —[b]) Ñ1 कुर्वन् (for कृत्वा). Dg1 transp. कथं and कृत्वा. —[c]) Ś1 D1.3 स्त्रियोप- (sic); D2 स्त्रियाप- (sic) (for स्त्रियाश्च). Ñ1 V2 B1 Dg1 Dt1 D4.6 T G [आ]हरणं; V1 रहिते (for हरणं). Ñ1 पाप (for नीच). —[d]) Dg1 T3 Cm रहितेन; Ct as in text; K(ed.) रहिते तु (for रहिते च). ❀ Cg : रहिते स्वामिरहितप्रदेशे. ❀ Ñ2 V B1 D5.7 परस्परं; D4 परस्य हि.

7 [a]) Ñ2 D5.7 लोके ते; V B1.3.4 ते लोके (for लोकेषु). —[b]) T2 धर्म- (for कर्म). Ñ2 V B1.3.4 D5.7 जनाः(Ñ2 D5.7 नराः) कर्म जुगुप्सितं. —[c]) D1.5.7 सनृशंसम्; D4 T2 आत्मशौ(T2 °का)र्यम्; M3 आनृशंसम् (for सुनृ°). Ñ1 नृशंसं वापि पापिष्ठं. ❀ Cv : सुनृशंसमधर्मिष्ठमिति सम्यक्. ❀ —[d]) Ś1 Ñ V B1 D5.7 शौटीरमानिनः; B3.4 °शालिनः; D1–3 शौंडीर°; G2 °मादिनः; Cg.k as in text; Ct शौटीर्य° (for शौण्डीर्यमानिनः).

8 [a]) Ś1 V B1 Dm1 D1–4.8 वीर्यं च; G2 शौंडीर्य- (for शौर्यं च). Ñ2 D5.7 वीर्यं; V2 Dm1 D8 शौर्यं (for सत्त्वं). Ñ1 B3.4 धिक्ते सत्त्वं च वीर्यं च. —[b]) B4 transp. यत् and त्वया. Ś1 Ñ V B1.4 D1–3.5.7 स्वयं; Dg1 T2.3 मम (for तदा). Dm1 D4.8 T1 G M यस्त्वं(T1 G M1 °त्त्वं) कथितवांस्तदा(G3 M1 °था). —[c]) D4 -क्रोशकरं (for -[आ]क्रो°). M2 कुलं क्रोशकरं लोके. —[d]) V1 विक्रमम् (for चारित्रम्).

9 [ab]) D1 T1 G3 M2 transp. शक्यं and कर्तुम्. Ś1 D1.2 एवेह (for एवं हि). Ñ1 किं नु शक्यं मया कर्तुं; T2 M1 किं कर्तुमिह शक्यं हि (for [a]). Dg1 T3 Cm भयेन; Cg as in text (for जवेन). Ś1 D1–3 [अ]सि-; Dg1 D4 G1.2 M2 [इ]ह; T2.3 [इ]व; Cg as in text (for [ए]व). Ñ2 V B1.3.4 D5.7 एवं ग(V कृ)ते तु किं शक्यं कर्तुं यस्त्वं पलायसे. —After 9[ab], G1 ins.:

1015* त्वयैव नूनं दुष्टात्मन्यद्वीर्यं कथितं मम ।

—G2 om. (hapl.?) 9[cd]. —[c]) Ś1 D2 अव-; Ñ1 चैव; Dg1 D3 उप-; D1 इव; T2 इह; Cg as in text (for अपि). Ñ2 V B1.3.4 Dt1 Dm1 D5–8 Cr.k.t तिष्ठ त्वं; Cm.g as in text (for °स्व). —[d]) D5 G1 प्रतियास्यति.

G. 3. 59. 11
B. 3. 53. 11
L. 3. 59. 14

न हि चक्षुःपथं प्राप्य तयोः पार्थिवपुत्रयोः ।
ससैन्योऽपि समर्थस्त्वं मुहूर्तमपि जीवितुम् ॥ १०
न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन ।
वने प्रज्वलितस्येव स्पर्शमग्नेर्विहंगमः ॥ ११
साधु कृत्वात्मनः पथ्यं साधु मां मुञ्च रावण ।
मत्प्रधर्षणरुष्टो हि भ्रात्रा सह पतिर्मम ।
विधास्यति विनाशाय त्वं मां यदि न मुञ्चसि ॥ १२
येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि ।
व्यवसायः स ते नीच भविष्यति निरर्थकः ॥ १३
न ह्यहं तमपश्यन्ती भर्तारं विबुधोपमम् ।
उत्सहे शत्रुवशगा प्राणान्धारयितुं चिरम् ॥ १४
न नूनं चात्मनः श्रेयः पथ्यं वा समवेक्षसे ।
मृत्युकाले यथा मर्त्यो विपरीतानि सेवते ॥ १५
मुमूर्षूणां हि सर्वेषां यत्पथ्यं तन्न रोचते ।
पश्यामीव हि कण्ठे त्वां कालपाशावपाशितम् ॥ १६

---

10 $^a$) Ñ1 न त्वं; Ñ2 D7 न तु; D5 ननु (for न हि). Ś1 Dg1 T3 G2 M2 चक्षुष्पथं. —$^b$) Ñ2 V B1.3.4 D5.7 तयोः पुरुषसिंहयोः. —$^c$) Ñ1 D3 ससैन्यो न (for °ऽपि). —$^d$) V1 मुहूर्तं त्वं न जीवसि.

11 Dg1 reads 11 in marg. —$^a$) Ñ2 V B1.3.4 D5.7 न त्वं शक्तः; Dg1 स त्वं तयोः; T2 सत्यं तयोः; G1 न त्वेतयोः; Cg as in text (for न त्वं तयोः). Ñ1 न तयोः शरसंस्पर्शः. —$^b$) Ñ2 V B1.3.4 D5.7 तयोः सोढुं; T2 स्थातुं शक्तः; G3 शक्तः सोढुं (by transp.) (for सोढुं शक्तः). —$^c$) M [ए]व (for [इ]व).

12 Ñ V B1.3.4 D5.7 om. 12. —$^a$) Dg1 T1 M2 Cm.t*p* कुरु (for कृत्वा). D4 पश्यन् (for पथ्यं). Ś1 D1-3 मुंच मां रावणासाधो. —$^b$) D2.3 मुंचस्व; T2 M3 मा मुंच (for मां मुञ्च). Ś1 [ऽ]साधो मुंचस्व रावण; D1 [ऽ]साधुत्वं च विरावण. —After 12$^{ab}$, Ś1 D1-3 M3 ins.:

1016* बुद्ध्या संचिन्त्य शनकैर्न क्षंस्यति यथा तथा ।

[ M3 तु शनैर् (for शनकैर्). Ś1 निक्षिप त्वं; D1 न शाम्यति; D3 विवक्ष्यसि (for न क्षंस्यति). M3 यत्क्षमं तद्यथातथं (for the post. half). ]

—$^c$) Dg1 मत्प्रधर्षेण; M3 तत्प्रधर्षण-; Cg मत्प्रधर्षण- (as in text). Ś1 -रुष्टोसि; Dt1 D6 -संक्रुद्धो; D1 -दुष्टोसि; D2.3 -दुष्टो हि; T3 -रुद्धो हि (for -रुष्टो हि). —$^d$) Ś1 D2.3 सह भ्रात्रा (by transp.); D1 स भ्रात्रा च. —$^e$) Ś1 D1-3 विनाशं ते (for °शाय). T3 विधास्यते विनाशं च. —$^f$) Dm1 D8 मुंचसे (for °सि). Ś1 D2 देशान्ते (D2 °शांते) नोपमोक्ष्यसि (L[ed.]°से); D1 सांत्वेन न विमोक्ष्यसि; D3 न ताभ्यां त्वं विमोक्ष्यसि.

13 $^b$) D3 T2 M3 मा (for मां). Ñ2 B3.4 D5.7 अभिवांछसि; V अभिकांक्षसि; B1 बलवान्माभिवांछसि. —Dg1 om. 13$^{cd}$. —$^c$) Dt1 D6 तु (for स). Ś1 Ñ V B1.3.4 D1-3.5.7 पाप (for नीच). —$^d$) Dm1 निरर्थकं.

14 $^a$) M1 नापि (for न हि). —$^b$) Dm1 D4.8 G1.3 वासवोपमं. —Ñ1 reads 14$^c$-15$^b$, after 16. —$^c$) Ñ1 वसेहं; D1 नोत्सहेच् (sic) (for उत्सहे). D2 M3 शत्रुवशगान्. —$^d$) D1 चिरात् (for चिरम्). —After 14, Ñ2 V B1.3 (l. 2-3 ins. after 1018*).4 D5.7 ins.:

1017* सत्यो लोकप्रवादोऽयं श्रूयते भुवि राक्षस ।
यदि ते न श्रुतं पूर्वं गुरुभ्यः श्रूयतां मम ।
दीपनिर्वाणगन्धं च सुहृद्वाक्यमरुन्धतीम् ।
न जिघ्रति मुमूर्षुर्यो न शृणोति न पश्यति ।

[ (l. 1) Ñ2 illeg.; B1 देव-; B4 सत्य- (for सत्यो). V राक्षसः. —(l. 2) B3.4 यदि न श्रुतपूर्वोक्त (B4 °र्वं ते) (for the prior half). B3 lacuna; G(ed.) तरुण्याः (for गुरुभ्यः). —(l. 4) D5.7 वै (for यो). V2 मुमूर्षुर्वै न जिघ्रति (for the prior half). V1 न जिघ्रति न शृण्वंति न पश्यंति गतायुषः. ]

15 B1 om. 15. Ñ1 reads 14$^c$-15$^b$ after 16. —$^a$) Ś1 V2 B3.4 D2 नूनं च न; Ñ1 * * पुत्र; Ñ2 D5.7 नूनं त्वम्; V1 नूनं बाल; Dg1 नूनं न च; D3 नूनं चैव; M3 ननु तं च (for न नूनं च). —$^b$) Dg1 D4 T2 समवेक्ष्यसे; Cg.t समवेक्षसे (as in text). Ś1 D1.2 संप्रेक्षितुमिहे (D2 °तुं यथे)च्छसि; Ñ1 D7 समुपेक्षितुमिच्छसि; Ñ2 V B3.4 D5 समवेक्षितुमिच्छसि; D3 ह्यवेक्षितुमिहार्हसि. —V1 om. 15$^{cd}$. —$^c$) Ñ1 नरा मृत्योर् (for यथा मर्त्यो). —$^d$) Ñ1 M3 विपरीतं (M3 °ते) निषेव (M3 °वि)ते. —For 15$^{cd}$, Ñ2 V2 B3.4 D5.7 subst.:

1018* शूरनाथवतीमेवं यो मां त्वं हर्तुमिच्छसि ।

—Then B3 cont. l. 2-3 of 1017*.

16 D6 reads 16$^{ab}$ in marg. —$^a$) Dg1 T3 मुमूर्षतां; D1-3 G3 मुमूर्षाणां (sic) (for °र्षूणां). Ñ Dt1 Dm1 D6.8 T1.2 तु; V1 Dg1 D4 T3 च (for हि). Ś1 D1-3 मर्त्यानां; Ñ1 यत्पथ्यं (for सर्वेषां). —$^b$) Ñ1 रोचते तन्न रावण. —$^c$) Ś1 [ए]व च; B1 Dm1 D8 G2 M3 [ए]व हि; B3 [इ]मं हि; Dg1 T3 [अ]हं तु; Dt1 [इ]ह हि; D6 च हि; T1 G3 [अ]द्य हि (for [इ]व हि). D1 ते कंठे; D3 मर्त्यानां (for कण्ठे त्वां). T2 पश्यामि दशकंठ त्वा. —$^d$) Ś1 B3 (*sup. lin.* also) -[अ]वसादितं (for °पाशितम्). Ñ D5.7 कालपाशेन पाशितं; D1 कालपाशं च पातितं. —After 16, Ñ1 reads 14$^c$-15$^b$.

यथा चास्मिन्भयस्थाने न बिभेषि दशानन ।
व्यक्तं हिरण्मयान्हि त्वं संपश्यसि महीरुहान् ॥ १७
नदीं वैतरणीं घोरां रुधिरौघनिवाहिनीम् ।
खड्गपत्रवनं चैव भीमं पश्यसि रावण ॥ १८ ॥
तप्तकाञ्चनपुष्पां च वैदूर्यप्रवरच्छदाम् ।
द्रक्ष्यसे शाल्मलीं तीक्ष्णामायसैः कण्टकैश्चिताम् ॥ १९
न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः ।
धारितुं शक्ष्यसि चिरं विषं पीत्वेव निर्घृण ॥ २०
बद्धस्त्वं कालपाशेन दुर्निवारेण रावण ।
क्व गतो लप्स्यसे शर्म भर्तुर्मम महात्मनः ॥ २१
निमेषान्तरमात्रेण विना भ्रातरमाहवे ।
राक्षसा निहता येन सहस्राणि चतुर्दश ॥ २२
स कथं राघवो वीरः सर्वास्त्रकुशलो बली ।
न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणम् ॥ २३
एतच्चान्यच्च परुषं वैदेही रावणाङ्कगा ।
भयशोकसमाविष्टा करुणं विललाप ह ॥ २४

G. 3. 59. 24
B. 3. 53. 25
L. 3. 59. 29

17 [a]) Ñ1 V2 M1 तथा. Ś1 चाति-; B3 वास्मिन्; D2 नाभि- (sic) (for चास्मिन्). D3 जनस्थाने (for भय°). —[b]) Dg1 Dt1 Dm1 D6.8 T3 M1 निशाचर; T2 M3 कदाचन (for दशानन). D3 दशग्रीव बिभेषि न. —[c]) Dt1 Dm1 D6.8 transp. हि and त्वं. Ñ V B1.3.4 D5.7 नूनं (Ñ1 व्यक्तं) हिरण्मयान्मोहात्; M3 व्यक्तं हिरण्मयानां त्वं. —[d]) Ñ2 V B1 D5.7 त्वं पश्यसि; B3.4 पश्यसि त्वं; T3 संद्दश्यसि. Ś1 वनेचरान्; V1 महीरुहः; D1 वने मृगान्; D2 वने नगान् (for महीरुहान्).

18 Ñ1 om. 18–19. —[a]) Ś1 D2.3 त्वं हि; D1 त्वं वै (for नदीं). Dt1 Dm1 D2 वैतरिणीं. Ś1 Ñ2 V B1.3.4 D1–3.5.7 मृत्योः (for घोरां). —[b]) Dg1 T2.3 -प्रवाहिनीं; Dt1 D4.6 T1 -विवाहिनीं; Cg -निवाहिनीं (as in text). Ś1 रचिताशुगमालिनीं; Ñ2 V B1.3.4 D5.7 क्षा (V2 क्षी)-रगंभीरवाहिनीं; D1 नचिरात्क्षुरमालिनीं; D2 रचितां सुरमालिनीं; D3 नचिरात्क्षारवाहिनीं; L (ed.) रचितामूर्मिमालिनीं. —[cd]) Ś1 -वनारूढाम्; V -वनं तं च; B1.3.4 D1–3 -वनं तच्च; G (ed.) -बलं तत्र; L (ed.) -वनानद्धाम् (for -वनं चैव). G2 M3 महीं (for भीमं). V1 B1.4 द्रक्ष्यसि; B3 दृश्यसि. Ś1 D1–3 भीमं (Ś1 इमां) द्रक्ष्य (Ś1 D2 °ष्टा) सि राक्षस (for [d]). Ñ2 D5.7 असिपत्रवनं यत्तु (Ñ2 °त्त्वं) तीव्रं द्रक्ष्यसि रावण.

19 Ñ1 om. 19 (cf. v.l. 18). —[a]) D1 -प्रक्षं (sic); G (ed.) -प्रख्यां (for -पुष्पां). —[b]) Ś1 Dg1 Dm1 D2–8 G M Cg वैडूर्य- (for वैदूर्य-). Ñ2 D5.7 -रचितच्छदां (D5 °दं); V B3.4 -हरितच्छदां (V2 °दं); B1 -दुरितच्छदां; D1–3 -प्रवरच्छदं; G2 -प्रवरच्छदीं. —[c]) D8 T1 G M2.3 शल्मलीं. V B3.4 कीर्णां; B1 घोरां; D3.4 G1.2 M2 तीक्ष्णैर् (for तीक्ष्णाम्). Ś1 D1.2 द्र (Ś1 ई) क्ष्यसे शाल्मलिं तीक्ष्णैर्. —[d]) D8 श्रितां (for चिताम्). Ś1 Ñ2 V B1.3.4 D1.3.5.7 तीक्ष्णै (Ś1 D1.3 घोरै) रायसकंटकैः; D2 घोरं राक्षसकंटकैः.

20 Ñ V B1.3.4 D5.7 transp. 20 and 21. —[ab]) M2 (after corr. *sec. m.* as in text) ह (for हि). Dg1 T3 transp. कृत्वा and तस्य. Ñ2 V B1.3.4 D5.7 दशानन (for महात्मनः). Ñ1 तस्य लोकयशस्विनः (for [b]). —D4 om. (hapl.) 20[c]–21. —[c]) Ñ2 V B1.3.4 D3.5.7 M2 (also after corr. *sup. lin. sec. m.*) जीवितुं; D8 G2 Cg.k धरितुं; T1.2 G1.3 M1.3 चरितुं (for धारितुं). ❀ Ct : धारितुं धर्तुम् जीवितमिति शेषः. ❀ B1 द्रक्ष्यसि (for शक्ष्यसि). Ś1 D1.2 जीवितुं शक्यसे मूढ; Dg1 T3 न चिरं तिष्ठसे नीच. —[d]) V1 [इ]ह (for [इ]व). Ś1 D1–3 बालिशः; Ñ1 मानवः; Ñ2 V B1.3.4 D5.7 दुर्मतिः; Dg1 T3 G2.3 M2.3 निर्घृणः.

21 D4 om. 21 (cf. v.l. 20). Ñ V B1.3.4 D5.7 transp. 20 and 21. —[a]) Ñ1 V1 बद्धस्त्वं दुर्निवार्ये (V1 °रे) ण. —[b]) Ś1 दुर्विधा (L [ed.] °दा) र्येण रावण; Ñ1 V1 कालपाशेन रावण (V1 °क्षस); D1.2 दुर्निवार्येण रावण. —[c]) Dt1 लक्ष्यसे (for लप्स्यसे). —[d]) Dt1 D6 G1 M1.2 Ct transp. भर्तुर् and मम. Ś1 D1–3 सपुत्रामात्यबांधवः.

22 [a]) Ś1 D1–3 निमिष-.

☞ Ñ1 missing from 3.51.22[b] up to अभिवाद्य in 3.52.28[b] on lost folios. —[b]) Ś1 Ñ2 V B1.3.4 D1–3.5.7 T1 M2 विना भ्रात्रा महात्मना (Ś1 D1–3 T1 °वने; M2 °हवे); Ct as in text. —[c]) Ś1 D1–3 हतानि रक्षसां येन; Ñ2 V2 B1.3.4 D5.7 रक्षांसि (V2 B1.3.4 °क्षसां) निहतान्याजौ; V1 सहस्राणि हतान्याजौ. —[d]) V1 राक्षसानां (for सहस्राणि).

23 [a]) Dt1 D4.6.8 T2 G1 M2 transp. स and कथं. Ś1 Ñ2 Dg1 T2 G1 वीर. —[c]) D6 G3 M3 त्वा (for त्वां). B3 हन्यते (hypm.) (for हन्याच्). —[d]) V B1.3.4 रिपुं; Dm1 D8 G3 दृष्टा (for इष्ट-).

24 [a]) Ñ2 तदुक्त्वा * च; D5 एतावदुक्त्वा; D7 एतदुक्त्वा च (for °च्चान्यच्च). Ś1 सततं (for परुषं). —[b]) Ś1 Ñ2 V B1.3.4 D1–3.5.7 मैथिली (for वैदेही). B3 राक्षसांकगा. —[c]) Ñ2 V B1.3.4 D5.7 दुःख- (for भय-). —[d]) D3 रावणं (for करुणं). G2 हा (for ह). —After 24, M3 ins. :

1019* परस्य चाङ्गसंस्पर्शं प्रियेण च विनाभवम् ।
विषण्णवदना वीक्ष्य रुरोद जनकात्मजा ।

G. 3. 59. 27
B. 3. 53. 26
L. 3. 59. 30

तथा भृशार्तां बहु चैव भाषिणीं
विलापपूर्वं करुणं च भामिनीम् ।
जहार पापस्तरुणीं विवेष्टतीं
नृपात्मजामागतगात्रवेपथुम् ॥ २५

इति श्रीरामायणे अरण्यकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

# ५२

ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ।
ददर्श गिरिशृङ्गस्थान्पञ्च वानरपुंगवान् ॥ १
तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम् ।
उत्तरीयं वरारोहा शुभान्याभरणानि च ।
मुमोच यदि रामाय शंसेयुरिति मैथिली ॥ २
वस्त्रमुत्सृज्य तन्मध्ये विनिक्षिप्तं सभूषणम् ।
संभ्रमात्तु दशग्रीवस्तत्कर्म न च बुद्धवान् ॥ ३

25 $^{a}$) V1 B1.3 Dt1 D6 T2.3 तदा. Ś1 D2 भृशं तां (for भृशार्तां). Ś1 Dm1 D1–3.8 G3 बहुरूपभाषिणीं; Ñ2 V B1.3.4 D5.7 बहुशस्तदातुरां (D5 °दातां); Dg1 D4 T3 बहुधैव भाषिणीं (D4 °षतीं); G1 बहु चैव भाषतीं; M1 बहुवैरभाषिणीं. —$^{b}$) V1 -पूर्वां; B1 -पूर्णां (for -पूर्वं). Ś1 B1 D2 G3 करुणं च भाषिणीं; Ñ2 V B3.4 D5.7 करुणाभि (B3 °णोप )भाषिणीं (V2 °मिनीं). —$^{c}$) Dm1 D4.8 T1.2 G M1 Cg करुणं; D3 पतितुं; M2.3 कृपणं (for तरुणीं). Dg1 Dt1 Dm1 D3.6.8 विचेष्टतीं; D4 T2 G1 च वेष्टतीं (for विवेष्टतीं). Ś1 D1.2 जहार तां पापमतिर्विचेष्टतीं. —$^{d}$) G1 आकुल- (for आगत-). Ś1 D1–3 -दुःख-; Dg1 T3 -रौद्र-; Cg as in text (for -गात्र-). Dt1 D6 G1 -चेपथुः. —For $25^{cd}$, Ñ2 V B1.3.4 D5.7 subst. :

1020* जहार पापः कृपणां सुदुःखितां
विचेष्टमानां धृतबाष्पवेपथुम् ।

Colophon. —*Sarga name* : Ś1 D2 सीताप्रमाथे सीताप्रलापः; Ñ V B1.3.4 D1.3.6.7 सीतावाक्यं; G (ed.) रावणभर्त्सनं. —*Sagra no.* (figures, words or both) : Ś1 B1.3 D2.5 om.; Ñ2 D7 59; V1 58; V2 62; B4 D3 60; Dg1 Dt1 Dm1 D6.8 T G M1.2 53; D1.4 56; M3 54. —After colophon, G1.2 conclude with श्रीरामाय नमः.

## 52

☞ Ñ1 missing from 1 up to अभिवाद्य in $28^{b}$ (cf. v.l. 3.51.22). D8 begins with ॐ; T2 with श्रीरामचन्द्राय नमः; M1 with श्रीरामाय नमः. —Before 1, Ñ2 V B1.3.4 D5.7 ins. :

1021* संभ्रान्तश्चैव संहृष्टः प्रगृह्य जनकात्मजाम् ।
जवेन महताविष्टः स प्रयातो नभस्तलम् ।
पूर्वां दिशं जनस्थानान्मूढचेता जगाम सः ।
जटायुषा वै निहतो घोरविक्रमशालिना ।
वीक्ष्यमाणो दिशः सर्वा नेत्रैरनिमिषैरिव । [5]
संभ्रान्तोऽथ स दिङ्मूढः पम्पामभिमुखो ययौ ।
उपर्युपरि पम्पाया ऋश्यमूकं च पर्वतम् ।
जगामादाय रुदतीं मैथिलीं राक्षसेश्वरः ।

[ (l. 1) Ñ2 V D5.7 हृष्टश्च (for संहृष्टः). V1 संगृह्य (for प्र°). —(l. 2) B3 च महाविष्टः (for महता°). V B1.4 सं- (for स). —(l. 4) B1 वैरिभूतो; B3 विनि°; D5.7 वै विहि (D7 °ह )तो (for वै निहतो). V B4 -गामिना (for -शालिना). —(l. 5) B4 वीक्षमाणो (for वीक्ष्य°). D5.7 अपि (for इव). —(l. 6) Ñ2 D5.7 पथि (for ऽथ स). B3 मूढः (for दिङ्मूढः). V समं भ्रांतोथ दिङ्मूढः (for the prior half). Ñ2 V अभिमुखे (for °मुखो). ]

1 $^{a}$) Ñ2 B3 Dg1 Dm1 D5.7.8 [अ]थ; V1 च (for तु). —$^{b}$) V1 कथंचिन् (hypm.); D1.7 किंचिन्; D6 T2 कचिन्; G (ed.) क्वचिन् (for कंचिन्). B4 न प° (for अपश्यती). —$^{d}$) Ś1 तत्र (for पञ्च). Ñ2 D5.7 वानरयूथपान्.

2 $^{e}$) Ś1 D2 सा हि; D1 ते हि; L (ed.) मां हि (for यदि). Ñ2 V B1.3.4 D5.7 रामस्य (for रामाय). —V2 illeg. for $2^{f}$–$3^{b}$. —$^{f}$) B4 समेयुर् (for शंसेयुर्). Ñ2 V1 B1.3.4 D5.7 जानकी (V1 °कीं); Dt1 D6 भामिनी; D1 °लीं (for मैथिली). —After 2, Ś1 D1–3 ins. :

1022* एतां बुद्धिं तदा कृत्वा सीता करतलोदरी ।
[ D3 समास्थाय (for तदा कृत्वा). ];

while Ñ2 V1 B1.3.4 D5.7 ins. after 2 :

1023* वसुधासक्तनयना नेत्रजं वारि मुञ्चती ।

3 V2 illeg. for $3^{ab}$ (cf. v.l. 2). —$^{a}$) G3 उन्मुच्य. —$^{b}$) M2 विभूषणं; M3 सु° (for स°). Dg1 Dt1 Dm1 D6.8 T1 M1 Cg.k.t नि (Dt1 वि )क्षिप्तं सहभूषणं. —For $3^{ab}$, Ś1 D1–3 subst. and read after $3^{cd}$ :

पिङ्गाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव ।
विक्रोशन्तीं तदा सीतां ददृशुर्वानरर्षभाः ॥ ४
स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम् ।
जगाम रुदतीं गृह्य मैथिलीं राक्षसेश्वरः ॥ ५
तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः ।
उत्सङ्गेनैव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम् ॥ ६
वनानि सरितः शैलान्सरांसि च विहायसा ।
स क्षिप्रं समतीयाय शरश्चापादिव च्युतः ॥ ७
तिमिनक्रनिकेतं तु वरुणालयमक्षयम् ।
सरितां शरणं गत्वा समतीयाय सागरम् ॥ ८

G. 3. 60. 18
B. 3. 54. 9
L. 3. 60. 9

1024* भूषणानि विधुन्वन्ती तेषां मध्ये वनौकसाम् ।
[ Ś1 विनिघ्नंती; D1 विचि° ( for विधुन्वन्ती ). ];

while Ñ2 V1 B1.3.4 D5.7 subst. for $3^{ab}$ :

1025* वस्त्रं सभूषणं क्षिप्रं तेषां मध्ये न्यपातयत् ।

—$^{c}$ ) Ś1 Dg1 D1.2 T3 संभ्रमाच्च; Ñ2 D5.7 °मार्तो; B3.4 संभ्रांतस्तु; Dt1 स भ्रमात्तु; D3 स्वदेहाच्च; M2 स संभ्रमाद् ( for संभ्रमात्तु ). —$^{d}$ ) Dt1 Dm1 D4.6.8 T1 च न ( by transp. ); T2 न वि-; Cr.k as in text; K( ed. ) न स ( for न च ). Ś1 D1-3 वै( D1 * )देहीं नोपलब्धवान् ; Ñ2 V1 B1.3.4 D5.7 सीतां नैवाव( V1 नैव वि; D5 नोवाच )बुद्धवान् . —After 3, Ñ2 V B1.3.4 D5.7 M3 ins. :

1026* भूषणानि हि सर्वाणि दिव्यं चूडामणिं विना ।
विसृजन्तीं वरारोहां तदा वानरसंनिधौ ।

[ (l. 1) V1 M3 च ( for हि ). M3 मुख्यानि ( for सर्वाणि ). —V2 illeg. from दिव्यं in the post. half up to रिव in $4^{b}$. M3 पुण्य- ( for दिव्यं ). —M3 om. l. 2. ]

4 V2 illeg. for $4^{ab}$ ( cf. v.l. 3 ). —$^{a}$ ) Ś1 ततस्तेपि; Ñ2 V1 B1.3.4 D1-5.7 °क्षा( D2 °क्षया )स्ते; G3 पिंगाक्षिस्तां ( sic ) ( for पिङ्गाक्षास्तां ). —$^{b}$ ) Ś1 B1 D2.3 अपि ( for इव ). —$^{c}$ ) Ś1 D2 विवे( D2 °चे )ष्टंतीं; ( for विक्रोशन्तीं ). Dg1 Dm1 D4 T1 G3 M1 Cg तथा सीतां; D3 lacuna; G1 तदा दीनां ( for तदा सीतां ). —$^{d}$ ) Dt1 D8 वानरोत्तमाः. —After 4, Ñ2 V B1.3.4 D5.7 ins. :

1027* तस्या विचेष्टमानायाः शस्तं तद्वस्त्रमुत्तमम् ।
स्रजश्च विविधाश्छिन्नाः पेतुराभरणानि च ।
तानि वै कलधौतानि पावकार्चिनिभानि च ।
नक्षत्रविमलाभानि निपेतुर्गिरिसानुषु ।
संभ्रमात्तु दशग्रीवो वैदेहीं नोपलब्धवान् । [ 5 ]
भूषणानि विधुन्वन्तीं तेषां मध्ये वनौकसाम् ।
ऋष्यमूकं च दृष्ट्वा स पम्पां चैव निशाचरः ।
उपलभ्य दिशं तत्र चकार गमने मतिम् ।

[ (l. 1) Ñ2 D5.7 तथा ( for तस्या ). —V2 illeg. from शस्तं in the post. half up to निपेतुर् in the post. half of l. 4. Ñ2 V1 B1 D5.7 स्रस्तं ( for शस्तं ). B1 वनम् ( for वस्त्रम् ). —( l. 3 ) Ñ2 चैव ( hypm. ) ( for वै ). Ñ2 D5.7 -[ अ ]र्कै- ( for -[ अ ]र्चि- ). —( l. 5 ) V1 च ( for तु ). —V2 illeg. from लब्धवान् in the post. half up to मध्ये in the post. half of l. 6. —( l. 7 ) Ñ2 B1 D5.7 तु ( for च ). B1 तं दृष्ट्वा ( for दृष्ट्वा स ). —( l. 8 ) B1.3 दिशस् ( for दिशं ). —V2 illeg. from तत्र up to मतिम्. ]

5 $^{a}$ ) Ś1 Ñ2 V B1.3.4 Dg1 D2.5.7 T3 तु ( for च ). Ś1 पङ्क्याम् ; M2 ( after corr. *sec. m.* as in text ) पुंसाम् ( for पम्पाम् ). T2 अभिक्रम्य. D1.3 स च तां समति( D3 समभि )क्रम्य. —$^{b}$ ) Dt1 अभिमुखं; D3 °गतः; G3 °मतः ( for अभिमुखः ). G2 ततः ( for पुरीम् ). —V2 illeg. from जगाम in ° up to तीक्ष्ण in $6^{d}$. —$^{cd}$ ) Ś1 D2 बाहुना; D1.3 तां तथा ( for जगाम ). Dm1 D6.8 मैथिलीं; T2 महतीं ( for रुदतीं ). Ñ2 V1 B1.3.4 D5.7 जगामादाय रुदतीं ( for $^{c}$ ). Dg1 वैदेहीं; Dm1 D6.8 रुदंतीं ( for मैथिलीं ). Dt1 transp. रुदतीं and मैथिलीं. Ñ2 B1 D1.5.7 राक्षसाधिपः; B3.4 °सोत्तमः ( for °सेश्वरः ).

6 V2 illeg. up to तीक्ष्ण in $6^{d}$ ( cf. v.l. 5 ). —$^{a}$ ) Ś1 D1-3 transp. तां and जहार. D3 च ( for सु- ). Ś1 तदा सीतां; Ñ2 सुसंतुष्टो; D5 सु * * ष्टो ( for सुसंहृष्टो ). —$^{b}$ ) Ś1 ददृशुर् ( sic ); D1.2 रूपिणीं ( for रावणो ). —Ś1 om. $6^{c}$–7. —$^{cd}$ ) V1 Dt1 Dm1 D3.5-8 T1.3 G1.2 [ इ ]व ( for [ ए ]-व ). Ñ2 V1 B1.3.4 D5.7 महादंष्ट्रां; D4 °भोगां ( for तीक्ष्णदंष्ट्रां ). G3 M2( after corr. *sec. m.* as in text ) महाभुजां ( for °विषाम् ). D1.2 उत्संगेनैव( D2 °नेति ) भुजगं महादंष्ट्रं महाविषं.

7 Ś1 om. 7 ( cf. v.l. 6 ). —$^{a}$ ) Dg1 T3 सरांसि ( for वनानि ). G2 चैव ( for शैलान् ). —$^{b}$ ) Dg1 T3 वनानि ( for सरांसि ). —$^{c}$ ) D3 समतीत्याशु ( for °याय ). Ñ2 V B1.3.4 क्षिप्रं समभि( B1 °ति )चक्राम( V2 °* * [ illeg. ] ); D1.2 पश्यंस्तूर्णमतीयाय. —V2 illeg. from शर in $7^{d}$ up to वरुणाल in $8^{b}$. —$^{d}$ ) Ñ2 V1 B1.3.4 D1-3.5.7 चापाच्छर इव ( by transp ). —After 7, Ñ2 V1 B1.3.4 D5.7 read 10.

8 V2 illeg. up to वरुणाल in $^{b}$ ( cf. v.l. 7 ). —$^{a}$ ) Ś1 D2 मीननक्राकु( D2 तिमिनक्रातु )लं तं तु. —V2 illeg. from $8^{c}$ to l. 1 of 1029*. —$^{c}$ ) Dm1 D8 G1.2 ( after corr. *inf. lin. sec. m.* ) M2 रम्यं; D4 गम्यं; G3 गृह्य ( for गत्वा ). Ś1 D1-3 सरितः समतिक्रम्य; Dg1 T3 सरितां पतिमासाद्य. —$^{d}$ ) D3 शनैरुत्तीर्य सागरं. —For $8^{cd}$, Ñ2 V1 B1.3.4 D5.7 subst. :

1028* क्षणेनैवातिचक्राम सागरं सरितां पतिम् ।
[ D7 क्षणे चैव. V1 [ अ ]भि- ( for [ अ ]ति- ). ]

G. 3. 60. 19
B. 3. 54. 9
L. 3. 60. 10

संभ्रमात्परिवृत्तोर्मी रुद्धमीनमहोरगः ।
वैदेह्यां ह्रियमाणायां बभूव वरुणालयः ॥ ९
अन्तरिक्षगता वाचः ससृजुश्चारणास्तदा ।
एतदन्तो दशग्रीव इति सिद्धास्तदाऽब्रुवन् ॥ १०
स तु सीतां विवेष्टन्तीमङ्केनादाय रावणः ।
प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः ॥ ११
सोऽभिगम्य पुरीं लङ्कां सुविभक्तमहापथाम् ।
संरूढकक्ष्याबहुलं स्वमन्तःपुरमाविशत् ॥ १२
तत्र तामसितापाङ्गीं शोकमोहपरायणाम् ।
निदधे रावणः सीतां मयो मायामिवासुरीम् ॥ १३
अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः ।
यथा नैनां पुमान्स्त्री वा सीतां पश्यत्यसंमतः ॥ १४
मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ।
यद्यदिच्छेत्तदेवास्या देयं मच्छन्दतो यथा ॥ १५

---

9 V2 illeg. for ९ (cf. v.l. 8). —$^{a}$) Ñ2 V1 B1.3.4 D5.7 सधूम-(V1 B1.3.4 °मः) (for संभ्रमात्). V1 इव वृत्तोर्मि-; Dg1 Dt1 Dm1 D1.2.6.8 परिवृत्तोर्मि-; D4 M3 °वृद्धोर्मी (for परिवृत्तोर्मी). —$^{b}$) Ś1 V1 B1.4 D1.2 क्रुद्ध-; Ñ2 D3.5.7 क्षुब्ध-; G3 कूर्म- (for रुद्ध-). D1 -महोरगं (for °रगः). M3 रुद्धमीनमिवोरगः. —$^{d}$) B3.4 मकरालयः.

10 V2 illeg. for १० (cf. v.l. 8). Ñ2 V1 B1.3.4 D5.7 read 10 after 7. —$^{a}$) B1.3 D7 अंतरीक्षगता. —$^{b}$) Ś1 D1-3 दारुणास् (for चार°). V1 G3 ततः; B1 Dg1 Dt1 D6 T2.3 M1.2 तथा (for तदा). —$^{c}$) L(ed.) एतदंतं. —$^{d}$) D6 G2 M1 तथा (for तदा). Ñ2 V1 B1.3.4 D5.7 इति हृष्टतनूरुहाः; D3 इति सिंहास्तमब्रुवन्. ❀ Cv : स्निग्धास्तथाऽब्रुवन्। सिद्धाश्च तथाऽब्रुवन्. ❀

11 $^{a}$) Dt1 Dm1 D1-4.6.8 G1 विचेष्टंतीम्; M3 प्रवे° (for विवेष्टन्तीम्). —$^{c}$) Ś1 D2.3 प्रावेशयत् (for प्रविवेश). T2 प्रावेशत तदा लंकां. —$^{d}$) Ś1 विशंको; D1.8 रूपिणं (for रूपिणीं). —For 11, Ñ2 V B1.3.4 D5.7 subst.:

1029* स सागरमतिक्रम्य लङ्कामासाद्य रावणः ।
विवेशादाय तां वेश्म सीतां मृत्युमिवात्मनः ।

[ V2 illeg. up to l. 1 (cf. v.l. 8). —(l. 2) B3 G(ed.) शीघ्रं (for वेश्म). V1 B1 विवेशालयमासाद्य (B1 °दाय) (for the prior half). B4 मृत्युर् (for मृत्युम्). ]

12 V2 illeg. from पु in $12^{a}$ up to घों in $14^{b}$. —$^{a}$) Ñ2 प्रविश्य च; V B1.3.4 D5.7 स प्रविश्य (V2 °: illeg.); D8 सोपि गम्य; T2 सोधि° (for सोऽभिगम्य). Ś1 D2 दिव्यां (for लङ्कां). —$^{b}$) Ś1 D2 प्रविभक्त-; M3 °भक्तां (for सुविभक्त-). —Ś1 Ñ2 V1 B1.3.4 D1-3.5.7 om. $12^{c}$–$13^{b}$. —$^{c}$) Dg1 -कक्षा-; T2 -कक्ष्यां (for -कक्ष्या-). Dt1 Dm1 (after corr. *sec. m.*) T1 Ct संरूढकक्ष्यां बहुलां (Dm1 [before corr.] °लं); Cv.g.t*p* as in text.

13 V2 illeg. for १३; Ś1 Ñ2 V1 B1.3.4 D1-3.5.7 om. $13^{ab}$ (for both, cf. v.l. 12). —$^{a}$) T1.2 G M1 असितापांगां (for °पाङ्गीं). —$^{b}$) Dt1 D6 -समन्वितां; T2 -परायणः (for -परायणाम्). —$^{c}$) Ś1 D1.2 निदध्यौ; B1 Dg1 विदधे; D3 निर्दयो; Cg as in text (for निदधे). —$^{d}$) D1.4 G3 मय- (for मयो). B1 मायां मय (by transp.). Ś1 [अं]बरे; Ñ2 V1 B1.3.4 D5.7 [अ]सुरः; K(ed.) Cg स्त्रियं (for [आ]सुरीम्).

14 V2 illeg. up to घों in $^{b}$ (cf. v.l. 12). —$^{a}$) Ś1 D1.2 अथाब्रवीद्; M1 °त्तु; G(ed.) संदिदेश (for अब्रवीच्च). —$^{b}$) Dt1 पिशाचा; D1 °च्यो; D4 राक्षसीर् (for पिशाचीर्). —After $14^{ab}$, Ñ2 V B1.3.4 D5.7 ins.:

1030* रक्षणार्थं समाहूय वैदेह्या राक्षसेश्वरः ।
कृताञ्जलिपुटाः सर्वाः सहिताः पुरतः स्थिताः ।

[ (l. 1) B4 रक्षणाय. —(l. 2) V2 illeg. from पुरतः up to मतः in $14^{d}$. D7 om. पुरतः. ]
—$^{c}$) Dt1 मैनां; Dm1 D8 T1 G M1.2 Cv.g.k नेमां; D1 मे न; Cm as in text (for नैनां). G2 पुमान् in marg. —$^{d}$) Ñ2 V1 B1.3.4 D5.7 पश्येद् (for पश्यति). T1 [अ]संमतं (for °मतः). D1 सीतां पश्येत दर्शने. —For $14^{cd}$, Ś1 D2.3 subst.:

1031* यथा मां मत्स्त्रियं तद्वत्सीतां पश्यत संमताम् ।

[ D2 यथा मानस्तु मां स्त्री वा (sic) (for the prior half) and संमताः (for °ताम्). ]
—After 14, Ñ2 V1 B1.3.4 D5.7 M2 ins.:

1032* कश्चित्तथाप्रमत्ताभिर्भवितव्यं सदैव हि ।
तथैव प्रतिपत्तव्यमप्रमत्ताभिरेव हि ।

[ V1 B1.3 M2 om. (hapl.) l. 1. —B4 reads l. 1 in marg. —(l. 1) B4 मम (for सदा). —(l. 2) B1 प्रयतितव्यं (unmetrical) (for प्रति°). M2 तथा भवत्यो रक्षंतु यदि मां प्रीतमिच्छथ. ]

15 $^{a}$) Ś1 Ñ2 V2 B1.3.4 D1.2.5.7 transp. मुक्ता and मणि. Ś1 Ñ2 D1.2.5.7 -प्रवालानि; D3 -विचित्राणि (for -सुवर्णानि). —$^{b}$) Ś1 Ñ2 V B1.3.4 D1-3.5.7 [अ]जिन(D1 [अ]पि च)चंदनं. —$^{c}$) Ś1 तत्तदस्यै; Dt1 D6 T1.2 M1 तदैवास्या; D1.3 °स्यै (for तदेवास्या). D2 यद्यदैच्छत्तदेवास्यै. —$^{d}$) L(ed.) स्वच्छंदतो (for मच्छ°). Ś1 D1.2 [ऽ]पि च (Ś1 वा); Dg1 तथा (for यथा). D3 देयं स्वच्छंदतो हि मे. ❀ Ck : यद्यदिच्छेत्तदा चास्या देयं मच्छन्दतो यथेति पाठः. ❀ —For $15^{cd}$, Ñ2 V B1.3.4 D5.7 subst.:

1033* यद्यदिच्छति वैदेही तद्देयं विदितं मम ।

[ B3.4 विहितं (for विदितं). B1 मया (for मम). ]

या च वक्ष्यति वैदेहीं वचनं किंचिदप्रियम् ।
अज्ञानाद्यदि वा ज्ञानान्न तस्या जीवितं प्रियम् ॥ १६

तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान् ।
निष्क्रम्यान्तःपुरात्तस्मात्किं कृत्यमिति चिन्तयन् ।
ददर्शाष्टौ महावीर्यान्राक्षसान्पिशिताशनान् ॥ १७

स तान्दृष्ट्वा महावीर्यो वरदानेन मोहितः ।
उवाचैतानिदं वाक्यं प्रशस्य बलवीर्यतः ॥ १८

नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः ।
जनस्थानं हतस्थानं भूतपूर्वं खरालयम् ॥ १९

तत्रोष्यतां जनस्थाने शून्ये निहतराक्षसे ।
पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥ २०

बलं हि सुमहद्यन्मे जनस्थाने निवेशितम् ।
सदूषणखरं युद्धे हतं तद्रामसायकैः ॥ २१

ततः क्रोधो ममापूर्वो धैर्यस्योपरि वर्धते ।
वैरं च सुमहज्जातं रामं प्रति सुदारुणम् ॥ २२

निर्यातयितुमिच्छामि तच्च वैरमहं रिपोः ।
न हि लप्स्याम्यहं निद्रामहत्वा संयुगे रिपुम् ॥ २३

G. 3. 60. 34
B. 3. 54. 24
L. 3. 60. 23

---

**16** —$^{a}$) Ś1 यच् ( for या ). D1.2 याश्च वक्ष्यंति. B4 D5.8 T2 वैदेही. —G3 om. ( hapl. ) $16^{cd}$. —$^{c}$) After वा, B4 ins. श्रीमद्गुरुचरणात् श्रीमन्मातृचरणे मम भक्तिरस्तु श्रीरामचन्द्रः. —$^{d}$) D8 तत् ( for न ). D1.2 तासां ( for तस्या ). G2 भवेत् ( for प्रियम् ). Ś1 तत्सोढव्यं निरंतरं.

**17** $^{a}$) Dt1 तथोक्ता; M2 ( after corr. *inf. lin. sec. m.* as in text ) ततो वा ( for तथोक्त्वा ). Ś1 D1.2 राक्षसीश्च ( D1 °स्तु ) तथोक्त्वा स; Ñ2 V B1.3.4 D5.7 तथा स ( V1 स तथा [ by transp. ] ) राक्षसीरुक्त्वा; D3 तथोक्त्वा तु राक्षस्यो ( subm. ). —$^{c}$) Ś1 D1.2 निर्गम्य ( Ś1 °त्य ); D4 M3 निष्क्राम्य ( for निष्क्रम्य ). Ñ2 B1.3.4 D5.7 तस्थौ ( for तस्मात् ). —$^{d}$) D1 कार्यमन्य ( sic ) ( for कृत्यमिति ). D3 निश्चयं ( for चिन्तयन् ). —After $17^{cd}$, Ñ2 V1 B1.3.4 D1–3.5.7 M3 ins. :

1034* स चिन्तयित्वा सुचिरं रावणो राक्षसेश्वरः ।

[ V1 M3 राक्षसाधिपः. ]

—Ś1 om. $17^{ef}$. —V2 illeg. from $17^{e}$ up to $18^{b}$. —For $17^{ef}$, Ñ2 V1 B1.3.4 D5.7 subst. :

1035* आजुहाव महावीर्यानष्टौ राक्षसपुंगवान् ।

[ Ñ2 आजहार. ]

—After 17, D8 ins. राम.

**18** V2 illeg. for $18^{ab}$ ( cf. v.l. 17 ). —$^{a}$) Ñ2 V1 B1.3.4 D5.7 भीमान् ( for दृष्ट्वा ). V1 B1.4 D1.3 महावीर्यान् ( for °वीर्यो ). —$^{b}$) B1 दर्पितः; G2 गर्वितः ( for मोहितः ). D5 वरदाने समाहितः. —$^{c}$) Dt1 D6 T1 G3 तान्; D4 T3 G1.2 M2.3 [ ए ]नान् ( for [ ए ]तान् ). Ñ2 V B1.3.4 D5.7 उवाच वचनं स्निग्धं; D3 उवाचैतानि तद्वाक्यं ( sic ). —$^{d}$) V2 illeg.; D8 -वीर्यवान् ( for -वीर्यतः ).

**19** V2 illeg. from 19 up to निहत in $20^{b}$. —$^{a}$) Dg1 T3 शीघ्रम् ( for क्षिप्रम् ). Ś1 D1.2 नानाप्रहरणोपेताः. —$^{b}$) Ś1 D2 क्षिप्रं ( for इतो ). D1.2 गच्छंतु; D3 °थ ( for गच्छत ). Ñ2 V1 B1.3.4 D5.7 राक्षसाः. —$^{c}$) Ñ2 reads in marg.; Dm1 हृतस्थानं; D5 भूतपूर्वं ( for हतस्थानं ). —$^{d}$) Ś1 D2.4 भूतं पूर्वं; V1 B3.4 °पूर्व-; D1 शून्यभूतं ( for भूतपूर्वं ). D5 खरालयं तु सत्तमाः.

**20** V2 illeg. up to निहत in $20^{b}$ ( cf. v.l. 19 ). —$^{a}$) B1.3 Dt1 D6 [ आ ]स्यतां ( for [ उ ]ष्यतां ). —$^{c}$) B3.4 D3 आस्थाय ( for आश्रित्य ).

**21** Dg1 D4 T2.3 om. 21–23. —$^{a}$) Ñ2 D5.7 च ( for हि ). V2 illeg. from महद् up to in $22^{b}$. Ś1 बलं च मे बहुरूपं; Dt1 Dm1 D6.8 M2 बहुसैन्यं महा ( M1 °हद् ) वीर्यं; D1.3 बलं मे बहुभृत्यं च; D2 बलं च मे बह्वनूपं; G2 बलं हि सुमहावीर्यं. —$^{b}$) D3 M1 जनस्थान-; D5 जन्म° ( for जनस्थाने ). —M3 om. $21^{c}$–23. —$^{c}$) Ñ2 V1 B1.3.4 D5.7 संख्ये ( for युद्धे ). —$^{d}$) Dt1 Dm1 D6.8 G2.3 M1 निहतं; D3 हतं वै ( for हतं तद् ). D1 रामस्य; T1 G1 रामेण ( for तद्राम- ).

**22** Dg1 D4 T2.3 M3 om. 22; V2 illeg. for $22^{ab}$ ( for all, cf. v.l. 21 ). B3 om. $22^{ab}$. —$^{a}$) Cr.g तत्र ( for ततः ). T1 Cg [ अ ]मर्षाद्; G1.3 [ अ ]मर्षो ( for [ अ ]-पूर्वो ). —$^{b}$) G1 रामस्य ( for धैर्यस्य ). T1 G M1 वर्तते ( for वर्धते ). M2 धैर्येणेव निगृह्यते. —For $22^{ab}$, Ś1 D1–3 subst. :

1036* तस्य क्रोधान्महामर्षो वीर्यं च समवर्धत ।

[ D3 तत्र ( for तस्य ) and मम ( for महा- ). D1.2 रोषं ( sic ); D3 वैरं ( for वीर्यं ). D3 परिवर्धते ( for समवर्धत ). ]; while Ñ2 V1 B1.4 D5.7 subst. :

1037* तेनामर्षेण महता ममाविष्टस्य राक्षसाः ।

[ V1 B1 हतेन तेन. Ñ2 D7 मयाविष्टस्य; V1 मनादिष्टस्य ( sic ); B4 समा°; G( ed. ) मया सृष्टेन ( for ममाविष्टस्य ). ]

—$^{c}$) Ñ2 V B1.3.4 D5.7 संजातं सुमहद्वैरं.

**23** Dg1 D4 T2.3 M3 om. 23 ( cf. v.l. 21 ). —$^{a}$) Ś1 निवारयितुम् ( for निर्यात° ). —$^{b}$) Ś1 D1.2 तस्य; Dm1 D8 तं च ( for तच्च ). Ś1 Dt1 Dm1 D6.8 G1 M1 महा- ( for अहं ). V2 illeg. from महं up to $24^{a}$. Ñ2 V

G. 3. 60. 35
B. 3. 54. 25
L. 3. 60. 24

तं त्विदानीमहं हत्वा खरदूषणघातिनम् ।
रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥ २४
जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता ।
प्रवृत्तिरुपनेतव्या किं करोतीति तत्त्वतः ॥ २५
अप्रमादाच्च गन्तव्यं सर्वैरेव निशाचरैः ।
कर्तव्यश्च सदा यत्नो राघवस्य वधं प्रति ॥ २६
युष्माकं हि बलज्ञोऽहं बहुशो रणमूर्धनि ।
अतश्चास्मिञ्जनस्थाने मया यूयं नियोजिताः ॥ २७

ततः प्रियं वाक्यमुपेत्य राक्षसा
महार्थमष्टावभिवाद्य रावणम् ।
विहाय लङ्कां सहिताः प्रतस्थिरे
यतो जनस्थानमलक्ष्यदर्शनाः ॥ २८
ततस्तु सीतामुपलभ्य रावणः
सुसंप्रहृष्टः परिगृह्य मैथिलीम् ।
प्रसज्य रामेण च वैरमुत्तमं
बभूव मोहान्मुदितः स राक्षसः ॥ २९

इति श्रीरामायणे अरण्यकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

---

B1.3.4 D5.7 वैरं तस्य दुरा( V1 B1 महा )त्मनः( V2 **** [ illeg. ] ). —$^{c}$) B1.3.4 D3 लप्स्यामहे; Dt1 Dm1 D8 ( before corr. ) G2 M1 पश्या° ( for लप्स्याम्यहं ). V1 नाहं लप्स्यामहे निद्राम् ( sic ); M2 न हि निद्राम्यहं रामम्. —$^{d}$) Ñ2 V1 B1.4 D5.7 राघवं रणे; B3 राक्षसं रणे; M1 संगरे रिपुं ( for संयुगे रिपुम् ). —After 23, Ñ2 V1 B1.3.4 D5.7 ins. :

1038* तस्माद्भवद्भिस्तत्कार्यं यथा वध्येत मे रिपुः ।

[ Ñ2 D5.7 तथा ( for तस्माद् ). Ñ2 V1 बा( V1 ब )ध्येत ( for वध्येत ). ]

24 V2 illeg. for 24$^{a}$ ( cf. v.l. 23 ). —$^{a}$) D3 G1 तत्. D1.3 इदानीम् ( for त्वि° ). Ñ2 V1 B1.3.4 D5.7 तमहं निहतं श्रुत्वा( B3 दृष्ट्वा ). —$^{c}$) Ñ2 V B1.3.4 D5.7 [ अ ]धि ( V B1 [अ]भि )गच्छेयं; Dt1 [ उ ]पलक्ष्यामि ( for [ उ ]-पलप्स्यामि ). —$^{d}$) D3 लाभं ( for धनं ). D6 [ ए ]व ( for [ इ ]व ). —After 24, Ś1 D1–3 ins. :

1039* मया हतस्य समरे चीरवल्कलवाससः ।
